संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 137 पुष्पम्

# संस्कृतशिक्षणम्


प्रधान-सम्पादकः

**प्रो. मुरलीमनोहरपाठकः**

कुलपतिः

लेखकः

**डॉ. परमेशकुमारशर्मा**



शोध-प्रकाशनविभागः

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

नवदेहली-110016

संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 137 पुष्प

# संस्कृतशिक्षणम्

प्रधान-सम्पादकः
**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः

लेखकः
**डॉ. परमेशकुमारशर्मा**

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**नई दिल्ली-110016**

प्रकाशकः

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

बी–4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–110016

© प्रकाशकाधीन

प्रकाशनवर्षम् : 2024

ISBN : 978-81-972035-3-4

मूल्यम् : ₹ 550.00

मुद्रकः

**डी.वी. प्रिन्टर्स**

97–यू.बी., जवाहरनगरम्, देहली–110007

# आशीर्वाक्

केषाञ्चन जनानामेव मनसि उत्तमविचाराः प्रकटिताः भवन्ति। प्रकटितान् विचारान् तेष्वपि विरलाः प्रचारयन्ति। तत्रापि अङ्गुलिगण्याः तान् विषयान् लेखनीबद्धान् कुर्वन्ति। संस्कृतशिक्षणं संस्कृतभाषया भवेदिति जनाग्रहः परमेतत् कर्म तदा एव सम्भवति यदा भाषा मुखे विराजते। भाषा श्रवणेन एव आयाति यतः भाषायाः प्रथमं कौशलं श्रवणमेव। एतदेव मनसि निधाय अस्माकं विश्वविद्यालयी-यान्तेवासिनां भाषा विकाशो भवतु अध्येतुः सामग्री अपि संस्कृतेन उपलब्धा भवेत्। तदर्थम् आचार्याणां प्राध्यापकानां महनीयं योगदानं भवति।

**छात्रोपयोगीदमहो नितान्तं,**
**नामास्ति तत्संस्कृतशिक्षणं हि।**
**तत् षोडशाध्यायविभूषितं च,**
**वाचः सुराणामुपकारकर्तृ॥**

डॉ. परमेशकुमारशर्मणा षोडशाध्ययात्मकः अयं ग्रन्थः संस्कृतशिक्षण-नाम्ना लिखितः इति अवश्यं प्रेरकविषयः। अस्य ग्रन्थस्य अध्ययनेन छात्रेषु अवश्यं काचिद् दृष्टिः समुत्पत्स्यते। या च दृष्टिः न केवलं प्रेरयिष्यति अपितु दृग्दर्शनम् अपि करिष्यति। अस्मिन् शर्मणि भगवत्-कृपया लेखन-शक्तिः उत्पद्येत इति कामयमानः आशीर्वादेन पोषयामि। अत एव -

**विद्वान् च यस्संस्कृतकर्मनिष्ठः,**
**सरस्वतीराधनतत्परोति।**
**शिष्यः सुनम्रः परमेशशर्मा,**
**ददामि तस्मै शुभशंसनं मे॥**

अयं ग्रन्थः संस्कृतशिक्षकेभ्यः अन्तेवासिभ्यः च उपयोगी भवेत् इति प्रार्थयमानः विरमामि।

**-प्रो. मुरलीमनोहरपाठकः**
कुलपतिः, श्रीला.ब.शा.रा.सं.वि.वि., नवदेहली

# प्राक्कथनम्

मातुः ज्वालादेव्याः कृपया प्रेरणया च 'संस्कृतशिक्षणम्' इति पुस्तकस्य लेखनविचारः मनसि समुत्पन्नः। पुस्तकमिदम् अत्यन्तं छात्राणामुपयोगाय भविष्यतीति विश्वासो जायते। अस्मिन् पुस्तके सामान्यत्वेन संस्कृतशिक्षणाय ये विषयाः आरम्भिकस्तरे अपेक्षिताः ते वर्णिताः वर्तन्ते। किन्तु पुस्तकमिदं सर्वेषामपि उपकाराय आरम्भिकस्तरे भविष्यति यतोहि पूर्वं व्याकरणज्ञानम् अत्यन्तम् अनिवार्यं भवति तदनु संस्कृतशिक्षणं छात्रान् प्रति कथं पाठनीयमिति महत्त्वभूतं जायतेऽस्मिन् पुस्तके संस्कृतविश्वविद्यालयानां संस्कृतशिक्षणस्य सर्वोऽपि पाठ्यक्रमः यथाक्रमम् उपस्थापयितुं प्रयत्नः कृतः वर्तते। केचन विषयाः बहुषु पुस्तकेषु यद्यपि वर्णिताः वर्तन्ते तथापि तेषां परित्यागपूर्वकं यथानियमं यथावश्यकं च विषयाणामुपस्थापनाय प्रयत्नो विहितोऽस्ति।

संस्कृतशिक्षणस्याध्ययनेन छात्रेषु संस्कृतभाषणदाक्ष्यं समुत्पत्स्यते, संस्कृतप्रविधीनामध्ययनेन छात्राः पाठनसामर्थ्यं संधारयिष्यन्ति इति अस्माकीनः दृढीयान् विश्वासः। छात्राणाम् आवश्यकतां मनसि निधाय तेषाम् आवश्यकतानुगुणमेवास्य पुस्तकस्य सर्जनाय प्रयत्नः व्यधायि। अत्र हि प्राचीनभारतस्य शिक्षापद्धतेः आरभ्य आन्तं सर्वेऽपि विषयाः छात्रैः आरम्भिकस्तरे ज्ञाताः स्युः इति प्रयत्नः विहितोऽस्ति। अस्मद्विश्वविद्यालयस्य यशस्विनां कुलपतीनां **'प्रो. मुरलीमनोहरपाठकवर्याणां'** सततं मार्गदर्शकानां कुलपतिचराणां **'प्रो. रमेशकुमारपाण्डेयमहाशयानां'** पौनःपुण्येन कार्तज्ञ्यं प्रकटयामि। कार्तज्ञ्यं प्रकट्यते शिक्षापीठस्य अध्यक्षाणां प्रो. सदनसिंहवर्याणाम् अन्येषां समेषाम् आचार्याणां प्रेरकाणां च।

अस्य पुस्तकस्य प्रणयने छात्राः अस्माकीनाः अवश्यं स्मर्तव्याः येषां साहाय्येन जिज्ञासया च कार्यमिदं साफल्यं प्राप्नोति। तत्र हि प्रामुख्येण

पङ्कजः, **गोविन्ददासः, निर्भयः, वैष्णवी, नीरजः चिन्मयी, फरेन्द्रः, गदाधरपदानः, आकाशकुमारमिश्रः** अन्ये च गरलीपरिसरस्य शिक्षा-शास्त्रिच्छात्राः अभिनन्दनीयाः। प्राप्तेऽवसरे ते सर्वेऽपि समादरणीयाः आचार्याः अपि स्मर्यन्ते येषाम् आशीर्वादेन प्रेरणया च कार्यमिदं सम्पादयितुं प्रयत्नः समाचरितः, तत्र हिमाचल-स्थराष्ट्रिय- संस्कृतसंस्थानस्य सरलहृदयाः प्राचार्याः प्रो. लक्ष्मीनिवासपाण्डेयाः तत्रत्याः सर्वेऽपि आचार्याः सहाचार्याः सहायकाचार्याः वा अस्मिन् कर्मणि अस्माकं महत्साहाय्यं समाचरितवन्तः सन्ति। विशेष्य संस्मरामि आचार्यान् **गणेशशङ्करविद्यार्थिगुरून्,** एषां सत्प्रेरणया पुनःपुनः कथनेन कार्यमिदम् अकरवम्, वास्तविकं पश्यामः चेत् ते एव अस्य ग्रन्थस्य कर्तारः, अहं तु निमित्तमात्रमेव।

सर्वान् अपि आचार्यान् प्रति मनसा प्रणामाञ्जलिं समर्पयामि। येषां प्रेरणया आशीर्वादेन च कार्यमिदं सम्पन्नताम् अगात्।

प्रत्यक्षाप्रत्यक्षतया ये केऽपि विद्वांसः मूर्धन्यः चास्मान् प्रेरितवन्तः तेभ्यः सर्वेभ्यः प्रणामाञ्जलिं समर्पयामि अग्रिमाङ्के इतोऽपि परिष्कारपूर्वकं विषयान् प्रकाशयिष्यामि इदानीं सामान्यरूपेण शीघ्रतया च प्रथमवर्षीय-द्वितीयवर्षीयच्छात्राः च पाठ्यक्रमसम्बद्धां सामग्रीं प्राप्नुयुः इति मनसि संधार्य शीघ्रं कार्यं परिणमयितुं प्रयत्नः विहितः। प्राप्तेऽस्मिन् अवसरे ममाभिन्नमित्रं **श्रीमान् टीकारामवर्यः डॉ. दिनेशयादवः डॉ. कौशलेशशर्मा** डॉ. सुनीलकुमारशर्मा च अवश्यं स्मरणीयाः। ये च सर्वदा उत्तमकार्याय सततं प्रेरयन्ति।

एतत्पुस्तकलेखने येषां पुस्तकानां गुरूणां च साहाय्यं स्वीकृतं तेभ्यः सर्वेभ्यः प्रणामाञ्जलिं समर्पयामि। अज्ञानकारणेन लेखनवेगकारणेन केचन दोषाः स्युः एव। तान् सर्वान् दोषान् अदृष्ट्वा विद्वांसः प्रेरणमुखेन अस्मान् बोधयेयुः, एवञ्च येषामपि पिपठिषूणां मार्गदर्शनं प्राप्स्यते तदनुगुणं परिष्काराय प्रवृत्तो भविष्यामि। अस्मिन् पुस्तके अत्यन्तं सरलभाषया विषयः समुपस्थितः वर्तते, यतः सर्वस्य विषयस्य पूर्णज्ञानं जायेत भाषाशैल्या पाठनशैल्या वा।

अतः विद्वांसः एतं विषयं शास्त्रीयपद्धत्या भाषया वा मा आकलयन्तु इति। परिष्कारावसराः सर्वदा भवन्ति करिष्यन्ते च। अतः भवन्तः विद्वांसः अस्माकं दोषज्ञानेन परिपोषयन्तु। अत्र पाठयोजनासु मातृकल्पायाः, प्रो. सन्तोषमित्तलवर्यायाः प्रो. वै.एस. रमेशवर्याणां, प्रो. फतहसिंहवर्याणां च साक्षात्सहयोगः स्वीकृतः वर्तते। एवञ्च अन्येषाम् आचार्याणां च लेखने समग्रे मार्गदर्शनं प्राप्तम् अस्ति।

अन्ते पुनरेकवारं सर्वान् अपि संस्कृतजगतः विदुषः पूज्यान् गुरून् **प्रो. वाई. एस. रमेशवर्यान्, प्रो. सन्तोषमित्तलवर्याः** संस्थानकुलपतिं च प्रणम्य विरमामि।

**-डॉ. परमेशकुमारशर्मा**

# विषयानुक्रमणिका

| **विषयाः** | **पृ.सं.** |
|---|---|
| **आशीर्वाक् - प्रो. मुरलीमनोहरपाठकः** | **iii** |
| **प्राक्कथनम्** | **v** |
| **प्रथमोऽध्यायः** | **1-9** |
| प्राचीनभारते शिक्षापद्धतिः, संस्कृतेन शिक्षणं च | |
| **द्वितीयोऽध्यायः** | **10-18** |
| संस्कृतस्य सम्प्रत्ययात्मिका पृष्ठभूमिः | |
| **तृतीयोऽध्यायः** | **19-24** |
| भाषायाः आयामाः कौशलानि च | |
| **चतुर्थोऽध्यायः** | **25-32** |
| संस्कृतशिक्षणोपागमाः | |
| **पञ्चमोऽध्यायः** | **33-38** |
| संस्कृतशिक्षणे नवाचारः | |
| **षष्ठोऽध्यायः** | **39-43** |
| भाषागतसामान्यदोषाः निवारणोपायाश्च | |
| **सप्तमोऽध्यायः** | **44-49** |
| व्याकरणशिक्षणप्रणाल्यः | |
| **अष्टमोऽध्यायः** | **50-55** |
| भाषाधिगमप्रक्रमः | |

**नवमोऽध्यायः** 56–62

भाषाविज्ञानस्योद्भवः विकासश्च

**दशमोऽध्यायः** 63–69

संस्कृतस्य लोकप्रियतासम्पादनम्

**एकादशोऽध्यायः** 70–86

संस्कृतस्य प्रचारप्रसाराभिकरणानि

**द्वादशोऽध्यायः** 87–107

संस्कृतभाषाविज्ञानम्

**त्रयोदशोऽध्यायः** 108–114

पाठ्यसहगामिक्रियाः

**चतुर्दशोऽध्यायः** 115–137

विविधविधाः तत्सोपानानि च

**पञ्चदशोऽध्यायः** 138–143

संस्कृतभाषाप्रयोगशालायाः प्रयोगः

**षोडशोऽध्यायः** 144–150

मूल्याङ्कनम्

**परिशिष्टम्–1** 151–152

परियोजनारूपात्मकम्

**परिशिष्टम्–2** 153–164

विविधपाठयोजनाः

**सन्दर्भग्रन्थसूची** 165–166

## प्रथमोऽध्यायः

# प्राचीनभारते शिक्षापद्धतिः, संस्कृतेन शिक्षणं च

### प्राचीनभारते शिक्षापद्धतिः

बालकस्य सर्वशक्तीनां विकासे शिक्षैव प्रधानं साधनमिति निश्चितमेव। शिक्षायाः साहित्यस्य, इतिहासस्य, विज्ञानस्य, गणितस्य च अध्ययनं बालकस्य मानसिकं सामाजिकं सांस्कृतिकं च विकासं समुत्पादयति। शिक्षयैव साहित्यस्याध्ययनं विषयग्रहणशक्तिः आशयप्रकाशनशक्तिः चिन्तन-शक्तिः रचनाशक्तिः च वर्धन्ते। सर्वासु भाषासु साहित्यं शास्त्राणि च प्राचीनकाव्यनाटकादीनि सूक्ष्मतया अधीत्य, रसानन्दमनुभवितुं च कौशलानां साहाय्यम् अपरिहार्यमेव। प्राचीनैः शास्त्रकारैः शब्दार्थप्रतिपत्तौ उपयुज्यमानेषु उपायेषु कोशस्यापि स्थानं प्रधानतया निर्दिष्टम्। अध्यापनकार्यं सफलं कर्तुम् अधीतिबोधाचरणैः परिनिष्ठितविषयाः एव उपस्थाप्यन्ते। छात्राणां विषयसम्मुखीकरणाय सन्दर्भः परिचार्य्यते। अध्ययनस्य आत्यन्तिकं प्रयोजनं परिवर्तनं व्यवहारे जायेत तदर्थमेव पूर्वनिर्धारितक्रमेणैव छात्राणाम् अध्ययन-स्थितेः स्वरूपं परिचिन्तनपुरस्सरं विषयाणां समुचितक्रमेण पाठनमेव मुख्यमिति। भारतस्य मौलिकता प्राचीनता आध्यात्मिकता श्रेष्ठता च विश्वेऽस्मिन् विश्वे सर्वसिद्धा विद्यते। प्राचीनशिक्षाव्यवस्था तात्कालीनभारतीयसमाजस्य उन्नतये संसाराय नूतनदिशां प्रददाति स्म। संस्थासु सभ्यतायाः संस्कृतेः च मूर्तरूपं दृश्यते स्म। बालेभ्यः यथायोग्यम् आचरणानुरूपं शिक्षायाः व्यवस्था शिक्षणकेन्द्रे जायते स्म। प्राचीनकालेआदर्शानां परिस्थितीनां च महत्त्वपूर्णं स्थानम् आसीत्। भारतीयदर्शनं यथाविस्तृतम् आसीत्, न तथा कस्यापि देशस्य साहित्यं वैशिष्ट्यावहं प्रसिद्धं च आसीत्। शिक्षा प्रकाशरूपा वर्तते।

शिक्षयैव मानवे कश्चन अद्भुत: प्रकाश: समुत्पद्यते येन स: प्रतीतमानपदार्थान् सुसम्यक्तया द्रष्टुं शक्नोति। प्राचीनकाले शिक्षा मोक्षदायिनी स्वीक्रियते स्म। शिक्षयैव प्राचीनकालेऽहङ्कारस्य स्थाने प्रकाशपुञ्ज: मानवेषु समुत्पाद्यते स्म।

## गुरुकुलप्रणाली

प्राचीनकाले मूलरूपेण गुरुकुलप्रणाली एव प्रचलने आसीत्। गुरुकुलप्रणाल्यैव जना: विषयान् अधिगच्छन्ति स्म। गुरो: गृहे एव छात्रा: विषयाणां सुस्थिररूपेणाध्ययनं कुर्वन्ति स्म। तेषाम् एकमेव ध्येयं भवति स्म यत् शास्त्रस्य यथावत् ज्ञानमिति। तदा चरित्रनिर्माणविषये प्रामुख्येणावधानं क्रियते स्म। यदि छात्र: चरित्रवान् वर्तते तर्हि अन्ये गुणा: तस्मिन् स्वयमेव समुत्पत्स्यन्ते इति सर्वेषाम् अभिप्राय: भवति स्म। प्राचीनकाले उद्देश्यानि मनसि निधाय छात्राणामध्ययनं विधिवत् कार्यते स्म। तानि च यथा–

## प्राचीनभारते शिक्षोद्देश्यानि

1. धार्मिकभावनाया: विकास:।
2. आध्यात्मिकोन्नति:।
3. चरित्रनिर्माणम्।
4. ज्ञानप्राप्ति:।
5. व्यक्तित्वविकास:।
6. सामाजिकताया: विकास:।
7. जीविकोपार्जनम्।
8. सांस्कृतिकोद्देश्यम्।
9. मोक्षप्राप्ति:।

आरम्भात् अन्तपर्यन्तं प्राचीनकाले मोक्षविषये विशेषावधान वर्तते स्म इति प्रतीयते यत: परमपुरुषार्थत्वेन मोक्ष: एव अङ्गीक्रियते स्म। तस्मिन् काले आचार्यच्छात्रयो: सम्बन्ध: कश्चन विशिष्टो भवति स्म।

## गुरुशिष्यसम्बन्धः

गुरुशिष्ययोः सम्बन्धः विद्यासम्बन्धः आसीत् द्वयोः सम्बन्धः पवित्रः प्रभावपूर्णः चासीत्। छात्राः ब्रह्मचर्यस्य पालनम् अवश्यं सर्वं त्यक्त्वा कुर्वन्ति स्म। वेदाध्ययनं छात्राणां प्रामुख्येण लक्ष्यमासीत्। उपनयनसंस्कारात् परमेव अध्ययनस्य समारम्भः जायते स्म। नैसर्गिकसम्बन्धः। पितृवत् पालनम्। व्यापकं प्रेम घनिष्ठता च। परस्परं सम्माननं विश्वासश्च। परस्परं क्रोधाभावः। गुरूणां छात्रान् प्रति प्रगाढवात्सल्यम्। छात्रेभ्यः कन्याप्रदानम्। पूर्णरूपेण छात्राणां नियन्त्रणम्। निःशुल्कं पाठनम्। गृहसदस्यरूपेणोपस्थितिः। रुग्णच्छात्राणां सेवा। समेकितरूपेण चिन्तनेनाभिज्ञायते यत् प्राचीनकाले गुरुशिष्ययोः सम्बन्धः अत्यन्तं प्रगाढः अनुकरणीयश्चासीत्।

## प्राचीनकालीनपद्धतिः

पूर्वं विद्याध्ययनस्य पद्धतिद्वयम् आसीत्। 1. दण्डमाणवः 2. अन्तेवासी च। दण्डमाणवः सः भवति स्म यः बाल्यात् एव दण्डधारणं करोति स्म। तत्रैव तस्य प्राधान्यं स्वीक्रियते स्म। प्रसिद्धमाभाणकमपि आसीत् दण्डप्रधानाः माणवाः इति। ते एव छात्राः आश्रमस्य रक्षायां साहाय्यं कुर्वन्ति स्म। अन्तेवासिनः ते छात्राः भवन्ति स्म ये गुरूणामाज्ञयैव सर्वाणि कार्याणि यथायोग्यरीत्या परिपालनाय निरन्तरं प्रयतन्ते स्म। शिक्षावल्यां प्रथितमस्ति आचार्यः पूर्वरूपम् 2. अन्तेवास्युत्तररूपम् 3. विद्यासन्धिः इति। आधुनिककालेऽपि त्रीणि तत्त्वानि प्रामुख्येण उच्यन्ते शिक्षकः विद्यार्थी पाठ्यक्रमश्च। पूर्वं गुरुशिष्यपरम्परा नितराम् अनुकरणीयासीत्। तत्र हि शिष्यः पूर्णरूपेण गुरूणामुत्तमोत्तमगुणानां स्वीकारेण स्वीयं निरन्तरं विकासं विदधाति स्म। गुरुः विषयं पाठयति स्म। छात्राः पठन्ति स्म। छात्राः कनिष्ठच्छात्रान् पाठयन्ति स्म। ततश्च परस्परं सहयोगेन विषयज्ञानं वर्धते यः शास्त्रार्थं कर्तुं प्रभवति स्म सः एव भाषणानि कर्तुं प्रभवति स्म। गुरुकुलपद्धतिः अस्यां पद्धतौ छात्राः शारीरिकश्रमं कुर्वाणाः गुणान् आश्वादयन्ति स्म। बालाः अस्मिन् स्वाभाविके ब्रह्मचर्यनियमे निवसन्तः नितरां सुखमेव प्राप्नुवन्ति स्म। अनेन तेषां सन्निर्मलम्, उज्ज्वलं च मनः यत् अस्मिन्नेव काले अङ्कुरितं भवति स्म। सर्वेऽपि तेषां शरीरे नूतनप्रकाशं विस्तारयन्ति

स्म। गुरुकुले सर्वां व्यवस्थां गुरुः एव करोति स्म। प्रवेशनिमित्तं गुरोः एव सर्वं दायित्वं छात्रान् प्रति भवति स्म। आचार्याः तान् एव छात्रान् अध्ययनाय स्वीकुर्वन्ति स्म। ये अध्ययनदक्षाः गुरोः मार्गदर्शने स्थातुं सज्जाः च स्युः। छात्राः गुरुकार्यं स्वकार्यं मत्वैव कुर्वन्ति स्म। धनहीनच्छात्राणां सर्वविधसाहायाय्यं गुरुः एव करोति स्म। परस्परं सम्माननं विश्वासः वात्सल्यम् उदारता,त्यागः अत्यन्तम् अपेक्षितं भवति स्म। छात्रः गुरोः पूर्वं जागर्ति स्म, प्रत्येकं दिने ब्रह्ममुहूर्ते उद्बुद्धो भवति स्म। प्रणतिं गुरुं प्रति समर्पयति स्म। गुरोः छात्रेण पुत्रेण च सह समानः व्यवहारः भवति स्म। गुरोः आज्ञा छात्राणां कृते प्रमुखा भवति स्म। नियमपालकः छात्रः व्यर्थवार्तां नैव करोति स्म। छात्राः आश्रमस्य किमपि वस्तु न त्रोटयन्ति स्म। शिष्याः पूर्णरूपेण गुरुकुलस्य आचार्यस्य वा चिन्तनं कुर्वन्ति स्म। तदा गुरोः आदरस्यापि व्यवस्था क्रियते स्म। गुरुः सर्वान् विषयान् छात्रस्तरवर्धनपुरस्सरं पाठयति स्म। छात्राणां कथनं भवति स्म, गुरुगृहमेव अस्मभ्यमपेक्षते। वनानि अस्माकं सञ्जीवनिवासस्थानानि गुरवश्च अस्माकं सहृदयाः शिक्षकाः सन्ति। अद्यापि तेषु वनेषु गुरुगृहेषु बालाः ब्रह्मचर्यपालनपुरस्सरं शिक्षाम् प्राप्नुवन्ति स्म। गुरुगृहमेव आदर्शविद्यालयरूपेण प्रतिष्ठितमासीत्। निवासस्थानतो दूरं निर्जनस्थाने सुविस्तृते आकाशे विस्तृतायां भूमौ च गुल्मवृक्षादीनां मध्ये विद्यालयस्य व्यवस्था आसीत्। तत्राध्यापकाः एकान्ते पठनं पाठनं कुर्वन्ति स्म।

### छात्राणां वेशभूषा

प्राचीनकाले छात्राणां कृते नितरां नियमाः भवन्ति स्म। छात्रैः प्रातः समयेन जागरणीयं भवति स्म। गुरोः अभिवादनं, सर्वदा अधः आसने उपवेशनं, सामान्यवस्त्राणां धारणं कर्तव्यं भवति स्म। अपशब्दानां पूर्णरूपेण निवारणम् आसीत्। यदा छात्राः एतेषु किमपि दोषम् आचरन्ति स्म, तदा गुरुः एकान्ते आहूय तान् बोधयति स्म, वस्त्राणां महत्त्वपूर्णस्थानमध्ययनाय वर्तते इति। शिष्टाचारसदाचारयोः पालनविषयेऽत्यधिकम् अवधानम् आसीत्। छात्रैः शिखा अवश्यं धारणीया भवति। यदि आचार्यः धर्ममार्गात् च्युतः भवति स्म तर्हि छात्रः आज्ञाम् मन्तुम् अमन्तुं वा स्वतन्त्रः भवति स्म।

**अध्ययनाध्यापनसमयः**

प्राचीनकालेऽध्ययनस्य समारम्भः उपनयनसंस्कारात् जायते स्म, वर्णानुगुणम् उपनयनसंस्काराणां वर्णनं शास्त्रेषु कृतं विद्यते। तदनुसारमेव सर्वेऽपि वर्णाः स्वीयम् अध्ययनं समारभन्ते स्म। सः कालः विविधानां वर्णानां कृते वैविध्यपूर्णो भवति स्म। तथाहि ब्राह्मणस्य गर्भाधानात् अष्टमे वर्षे क्षत्रियस्य एकादशे वर्षे वैश्यस्य द्वादशे च वर्षे उपनयनं जायते स्म। तदपि विभिन्नं चिन्तितं विद्यते। ब्राह्मणस्य वसन्तौ, क्षत्रियस्य ग्रीष्मे, वैश्यस्य शरदृतौ चोपनयनं विधीयते स्म। उपनयनसंस्कारः शरीरं पवित्रं करोति मस्तिष्कं च वैदिकज्ञानं संधारयितुं समर्थं योग्यं च करोति। अस्मात् संस्कारात् परं वाध्ययनस्य समारम्भः जायते स्म तदारभ्य समावर्तनसंस्कारं यावत् अध्ययनम् अध्यापनं च छात्रस्य प्रचलति स्म। छात्राः आचार्यस्य सन्निधौ दश वर्षाणि, द्वादश वर्षाणि चतुर्दश वर्षाणि वा उषित्वा विद्यार्जनं परिसमाप्य गृहस्थाश्रमे प्रवेशाय उद्युक्ताः भवन्ति स्म। तदा पर्यन्तं विद्याध्ययनकालः उच्यते। ब्रह्ममुहूर्तमेवाध्ययनाय योग्यमिति आसीत्।

**कथं संस्कृतं संस्कृतमाध्यमेन**

संस्कृतविकासोऽपि विज्ञानविकासेन सह जायेत इति महत्त्वपूर्णो विषयः दृश्यते, कारणं हि तत्र संस्कृतसाहित्यमेव अचिरं जनेषु परिवर्तनानि परिवर्धनानि च आनेतुं शक्नोति। समाजविदः भणन्ति यत् सामाजिकपरिवर्तनं साम्प्रतिके वैज्ञानिकप्रगत्या प्रचलतीति। साम्प्रतं मानवानां कृते किमपि नूतनं विज्ञानम् आविष्क्रियमाणमेव दृश्यते। तत्र वैज्ञानिकाङ्गीकारः महत्त्वपूर्णः दृश्यते इति सर्वेषां महानुभावानाम् अभिप्रायः। तत्रैव कश्चन महत्त्वपूर्णः विषयोऽस्ति संस्कृतस्याध्ययनं संस्कृतेनैव जायेत इति।

संस्कृतं हि मानवसमाजं यथास्थिरं रक्षितुं प्रभवति संस्कृतसाहित्यं विश्वभावनायाः संरक्षकमस्ति। विश्वशान्तेः विषये संस्कृतेऽवधानं विधातव्यम्। जातिवर्णधर्मसाम्प्रदायिकं भावं समापयितुं संस्कृतसाहित्यमलमस्ति। विज्ञानस्य पूरकं विद्यते संस्कृतम्। वैज्ञानिकतथ्यानि सुस्थिरं संस्कृते निहितानि विद्यन्ते। संस्कृतसाहित्यं मानवजीवनं पूर्णरूपेण उदात्तीकरणेन संयोजयति।

**आदौ किमर्थं संस्कृतव्यवहारः आधिक्येन न भवति?**

1. समाजेऽन्यासां भाषाणाम् आगमनम्।
2. क्षेत्रभेदेन क्षेत्रीयभाषासु व्यवहारस्य निर्वहणम्।
3. अङ्ग्रेजीभाषायाः समाजे अधिकाधिकप्रभावः।
4. आङ्ग्लभाषाद्वारा जीविकासम्पादनसुलभता।
5. संस्कृतभाषां प्रति रुचेः अभावः।
6. संस्कृतस्य पर्याप्तप्रोत्साहनस्याभावः।
7. संस्कृतभाषा सरला न इति भावोत्पादनम्। उपरिलिखितानि कारणानि बाहुल्येन परिदृश्यन्ते अतः संस्कृतेन व्यवहारः न्यूनः जायते, तत्कारणेन केचन संस्कृतं जानानाः अपि स्वमातृभाषया संस्कृतैः स्वक्षेत्रस्थैः जनैः व्यवहरन्ति अतः अपि संस्कृतेन व्यवहारः नैव जायते।

**संस्कृतमाध्यमस्याभावे कारणम्**

1. विद्यालये शिक्षकः संस्कृतं संस्कृतमाध्यमेन न पाठयति।
2. शिक्षकेषु संस्कृतमाध्यमेन पाठयितुं सामर्थ्यं नास्ति।
3. विद्यालयेषु संस्कृतमाध्यमानुकूलवातावरणस्याभावः।
4. शिक्षकस्य छात्राभिभावान् प्रति प्रेरयितुं सामर्थ्याभावः।
5. शिक्षकेषु संस्कृतमाध्यमप्रशिक्षणस्य न्यूनता। एतेषां कारणानां प्रभावेण प्रायेण माध्यमस्य ह्रासः जायमानः दृश्यते तद्बलेनैव।

अद्यत्वे संस्कृतस्याभावः सर्वत्रापि दृश्यते, तस्य कारणमस्ति। संस्कृतं माध्यमरूपेण समारब्धुमुपायाः –

1. शिक्षकाणां चयनं संस्कृतमाध्यमाधारेण जायेत।
2. शिक्षकेषु सम्प्रेषणविधिना संस्कृतसम्भाषणसामर्थ्यस्य सम्पादनम्।
3. कक्षायाः आरम्भे मासमेकं मासद्वयं वा सम्भाषणमाध्यमेन छात्राणां संस्कृतमाध्यमेन पाठनम्।

4. विद्यालयेषु शिक्षकाणां छात्राणां च संस्कृतवातावरणनिमाणाय प्रेरणम्।
5. शिक्षकेभ्यः श्रवणभाषणकौशलाधारेण सम्यक् प्रशिक्षणप्रदानम्।
6. छात्रेभ्यः अधिकाधिकानां संस्कृतशब्दानां श्रवण-भाषण-वाचन-संस्काराणां प्रदानम्।
7. पाठनीयशब्दानाम् अर्थबोधनपुरस्सरम् अभिनयेन पाठनम्।
8. चित्रमाध्यमेन पदानां वाक्यानां वर्णनम्।
9. पौनःपुन्येन विषयस्य भाषया अभ्यासः।
10. पाठनीयपदस्य प्रत्यक्षविधिना बोधनम्।
11. अभिनयविधिना अधिकाधिकविषयाणां बोधनम्।

क्वचित् केचन भणिन्त रुचेः अभावकारणेन पाठनदाक्ष्यकारणेन संस्कृतमाध्यमभाषा नास्ति केषाञ्चनाभिप्रायोऽस्ति यत् यावत् पर्यन्तं रोचकतायै प्रयत्नः न विधीयते तावत्कार्यं न भविष्यतीति। तथा हि-

**संस्कृतमाध्यमस्य रोचकतायै उपायाः**

1. संस्कृतभाषाशिक्षणं क्रीडाद्वारा।
2. संस्कृतभाषाशिक्षणम् अभिनयद्वारा।
3. संस्कृतभाषाशिक्षणं प्रश्नोत्तरविधिना।
4. संस्कृतभाषाशिक्षणं सान्दर्भिकचित्रद्वारा।
5. संस्कृतभाषाशिक्षणं सम्प्रेणसम्भाषणद्वारा।
6. संस्कृतभाषाशिक्षणं स्पर्धाद्वारा।
7. संस्कृतभाषाशिक्षणं प्रत्यक्षप्रदर्शनविधिना।
8. संस्कृतभाषाशिक्षणं नाटकादिद्वारा।
9. संस्कृतभाषाशिक्षणं पद्यान्त्याक्षरीद्वारा।
10. संस्कृतभाषाशिक्षणं दृश्यश्रव्यसाधनद्वारा।

एतैः उपायैः संस्कृताध्यापने रोचकतां नेतुं शक्यते अतः संस्कृतशिक्षकैः विभिन्नमाध्यमैः अध्यापनं विधातव्यमस्ति। कथं संस्कृतं समाजोपयोगि भवेत् योगविशेषज्ञः योगशास्त्राधारेण, आहारविशेषज्ञः आयुर्वेदाधारेण, सौन्दर्यविशेषज्ञः वास्तुविशेषज्ञः पर्यावरणवैज्ञानिकः, परामर्शकश्च गृहसूत्रधर्मसूत्रं ज्योतिषाधारेण, अर्थशास्त्रपरामर्शकः कौटिल्यशास्त्रानुसारेण कामविशेषज्ञः कामशास्त्रानुसारेण, प्रबन्धकः दर्शनशास्त्रानुसारेण, संगणकविशेषज्ञः, व्याकरण-न्यायशास्त्रयोः ज्ञानेन सह विषयाणां प्रतिपादनं कुर्वन्ति तर्हि अवश्यं शीघ्रमेव काचित् नूतना स्थितिः समाजे समुत्पादयितुं शक्यते इति। संस्कृतं प्रति छात्राणां रुचिः वर्धेत इति महत्त्वपूर्णो विषयः यतः रुच्यैव छात्राः सहजतया आनन्देन च विषयं पठितुं संलग्नाः भवन्ति।

**रुचेः वर्धनाय केचन उपायाः**

1. संस्कृतं प्रति रुचेः वास्तविकं ज्ञानम्।
2. संस्कृतं प्रति रुचेः तत्सम्बद्धकारकाणाम् अध्ययनम्।
3. संस्कृतं प्रति रुचेः अभिवर्धनाय केषाञ्चन सहसम्बद्धकारकाणां निर्धारणम्।
4. संस्कृतविषयकरुचिं प्रभावयतां कारकाणां निरूपणम्।
5. रुचेः मापनार्थम् उत्तमोपकरणानां निर्धारणम्।
6. विकासाय उपायानाम् अन्वेषणम्।
7. सांस्कृतिकपृष्ठभूमौ संस्कृताध्ययनारम्भः।
8. संस्कृताध्ययनं प्राथमिकस्तरादारभ्य स्यात्।
9. संस्कृतनिष्ठानां वैज्ञानिकविषयाणां व्यापकरूपेण प्रचारः स्यात्।
10. संस्कृतबालगीतानां पाठनाय पाठ्यक्रमे स्थानम्।
11. संस्कृताध्यापनाय आधुनिकोपकरणानां प्रयोगः।
12. जनसंचारमाध्यमेन व्यापकरूपेण संस्कृतस्य प्रचारः।
13. संस्कृताध्ययनार्थम् आधुनिकविद्यालयेषु छात्रवृत्तिपुरस्कारादीनां प्रदानम्।

14. मूल्याधारितशिक्षायाः प्रदानम्।
15. संस्कृतव्याकरणस्य सारल्येन अध्यापनम्।
16. संस्कृतभण्डारस्य समुचितरूपेण पाठनम्।
17. संस्कृते विद्यमानसमस्यानाम् अनुसन्धानम्।

निष्कर्षरूपेण वक्तुं शक्यते यदि रोचकतया जीविकोपार्जनं मनसि निधाय छात्राणां नियमितम् अध्यापनं विधीयते तर्हि अवश्यं संस्कृतमाध्यमेन पाठनम् अत्यन्तं सरलतया कर्तुं शक्यते इत्यत्र नास्ति सन्देहः। सर्वविधसंस्कृत–प्रचारस्यावश्यकतां पूर्णां विधातुं नियन्तरप्रयत्नः आरम्भिकदिनेषु शिक्षकैः कर्तव्यः। अवश्यं सार्वत्रिकं संस्कृतं भविष्यति इति शम्।

## द्वितीयोऽध्यायः

# संस्कृतस्य सम्प्रत्ययात्मिकापृष्ठभूमिः

संस्कृतंकेवलम् एका भाषाएवनास्ति, अपितु अस्याम् अनेके विषयाः अपिअन्तर्भूताः सन्ति। जगति यत्किमपि अद्य दृश्यते तत् सर्वमपि संस्कृतभाषया पूर्वमेव विद्यमानमस्ति। वैज्ञानिकप्रगतेः आधारोऽपि संस्कृतमेव इति वैज्ञानिकाः अपि स्वीकुर्वन्ति। चिकित्साक्षेत्रस्य मूलाधारः आयुर्वेदः, विमानक्षेत्रस्य मूलाधारः भारद्वाजविरचितग्रन्थः तथाच योगस्य मूलाधारः पातञ्जलसूत्राणि। अनेन क्रमेण पश्यामश्चेत् सर्वेषु क्षेत्रेषु संस्कृतस्य योगदानं दृष्टिपथमायाति। संस्कृतस्य पाठनं द्विविधं- एकं भाषापाठनं, द्वितीयं विषयपाठनम्। अत्र भाषापाठनस्य विवेचनमस्ति।

### संस्कृतस्य भाषावैज्ञानिकस्वरूपम्

संस्कृतं वैज्ञानिकी भाषा इति सर्वेऽपि स्वीकुर्वन्ति। संस्कृतभाषया यद् लिख्यते तद् पठ्यतेऽपि,किन्तु सर्वासु भाषासु एवं न दृश्यते। उदाहरणस्वरूपं पश्यामश्चेत् यथा- आङ्ग्लभाषायां- Go = गो, परं To = टो न भूत्वा टूभवति। किन्तु संस्कृतभाषायाः उच्चारणे लेखने वा एवं न भवति, अत्र ट् + ओ = टो एव उच्यते लिख्यते च। संस्कृतभाषायाः प्रतिशब्दं व्युत्पत्तिमाध्यमेन प्रतिपाद्यते, रूपसिद्धिः च जायते। अनेन संस्कृतभाषायाः वैज्ञानिकस्वरूपं स्वतः जनानां पुरतः आयाति।

### ऐतिहासिकं सांस्कृतिकं महत्त्वञ्च

संस्कृतस्य इतिहासः सामान्यरूपेण विभागद्वये विभज्यते-1. वैदिकेतिहासः 2. लौकिकेतिहासश्च।

1. **वैदिकेतिहासः**:- वेदेषु येषां यज्ञानां वर्णनं विद्यते अद्यापि लोके जनाः तान् यज्ञान् कुर्वन्ति। अद्यापि मानवः वैदिक-परम्परायाः निर्वहणं कुर्वन्नस्ति।

2. **लौकिकेतिहासः**– संस्कृतस्य लौकिकेतिहासस्य प्रारम्भः वाल्मीकिरामायणतः मन्यते। तदनन्तरं महाभारतं तु इतिहास–ग्रन्थरूपेण प्रतिष्ठितमपि अस्ति। एतेषु ग्रन्थेषु यादृशानाम् आदर्शानां वर्णनं विद्यते, तेषां दर्शनं संस्कृतज्ञानां जीवने सम्भवति। भारतस्य विकासे संस्कृतस्य महत्त्वपूर्णम् अवदान–मस्ति। संस्कृतं विना भारतस्य कल्पनापि न शक्या। संस्कृतिक–स्वरूपम् 'भाषा संस्कृतेः संवाहिका भवति' इति वाक्यं नास्ति नूतनम्। भाषा एव संस्कृते संरक्षणे सर्वतः अग्रे भवति। संस्कृतभाषायाः कारणेनैव भारतीयसंस्कृतिः अद्यापि जीवति।

## आधुनिकभारते संस्कृतशिक्षणस्य आवश्यकता

राष्ट्रनिर्माणाय संस्कृतस्य आवश्यकतास्ति। संस्कृतं विना व्यक्तित्वनिर्माणं न शक्यम्। भारतीयपरम्पराणां संरक्षणे संस्कृतस्य महत्त्वपूर्णयोगदानमस्ति। संस्कृतं शान्तिभावनायाः प्रसारं करोति। संस्कृतं प्रेमभावम् उत्पादयति। सांस्कृतिकपोषणं करोति। एकतायाः सूत्रेण बध्नाति। आत्मनः ज्ञानमपि संस्कृतं कारयति। बन्धुत्वभावमुत्पादयति। अस्माकं संस्कारान् सुस्थिरान् करोति। संस्कृतम् अस्मान् व्यवहारं शिक्षयति। संस्कृतम् अस्मान् दायित्वबोधञ्च कारयति। इत्थं संस्कृतं विना किमपि न शक्यम्। अतः सर्वेषु क्षत्रेषु संस्कृतस्य महती आवश्यकतास्ति।

## संस्कृतशिक्षणस्य उपहुतिः

संस्कृतक्षेत्रे अनेकानि स्पर्धावाहनानि सन्ति, येषां कारणेन अनेकाः समस्याः समुत्पद्यन्ते, ताः अत्र उपस्थाप्यन्तेद्ययथा–उद्योगाभावः। सम्मानाभावः। सस्कृतेन प्रेरणपुरस्सरं पाठयितघ्णामभावः। सस्कृतवातावरणस्याभावः। उत्तमानां छात्राणाम् अभावः। संस्कृतशिक्षकाणां प्रशिक्षणस्याभावः। संस्कृतभाषायाः अन्यभाषाभिः सह समञ्जनस्य अभावः। समाजे आदाराभावः। रुचेः अभावः। संस्कृतस्य क्लिष्टतापरिकल्पनम्। संस्कृतस्य वर्गविशेषेण सह सम्बन्धः।

## संस्कृतशिक्षकस्य व्यक्तित्वम् उत्तरदायित्वञ्च–

- **संस्कृतशिक्षकः**– सामाजिकमूल्यानि, नैतिकमूल्यानि, राष्ट्रिय-मूल्यानि, धार्मिकमूल्यानि, जीवनमूल्यानि च संस्कृतशिक्षके स्युः। संस्कृतशिक्षकस्य सर्वदा प्राधान्यं भवति। संस्कृतशिक्षकः ज्ञानेन तोषयति। संस्कृतशिक्षकः उत्तमः मार्गदर्शकः भवति। संस्कृतशिक्षकः संस्कृतेः संरक्षणं करोति। विश्वबन्धुत्वभावनायाः रक्षणमपि संस्कृतशिक्षकः करोति। संस्कृतशिक्षकः छात्राणां सर्वविधं विकासं साधयति।

- **संस्कृतशिक्षकस्य व्यक्तित्वम्**– संस्कृतशिक्षकः वाक्पटुः स्यात्। संस्कृतशिक्षकः शिक्षणविधिषु निपुणः स्यात्। उत्साही भवेत्। ध्यानकेन्द्रितः स्यात्। नेतृत्वक्षमतायुक्तः भवेत्। सत्यनिष्ठः स्यात्। विश्वासपात्रं भवेत्। संवेगात्मकसन्तुलनयुक्तः स्यात्। आत्मसंयमी गम्भीरः च भवेत्।

- **संस्कृतशिक्षकस्य उत्तरदायित्वम्**– संस्कृतशिक्षकः संस्कृत-विद्यायाः रक्षणं कुर्यात्। छात्रान् उच्चस्थानेषु नेतुं यत्नं कुर्यात्। शान्तवातावरणस्य निर्माणं विद्यात्। सत्यनिष्ठसमाजस्य निर्माणं कुर्यात्। दिग्भ्रान्तसमाजस्य परिप्रेरणं कुर्यात्। छात्राणां चरित्रनिर्माणं कर्तुं प्रयतेत। निजोत्तरदायित्वानां निर्वहणं कुर्यात्। नैतिकगुणानां विकासं कारयेत्। राष्ट्रभक्तिभावनायाः विकासस्य आवश्यकतां समुत्पादयेत्। संस्कृतपठनाय छात्राणां मनसि रुचिम् उत्पादयेत्। संस्कृतभण्डारं समुचितरूपेण पाठयेत्।

संस्कृते विद्यमानसमस्याः अनुसन्धीयात्।

## अध्यापकगुणाः–

सामाजिकमूल्यानां, नैतिकमूल्यानां जीवनमूल्यानां, राष्ट्रियमूल्यानां, धार्मिकमूल्यानां च स्थापनाय अध्यापकाः प्रामुख्यं भजन्ते। एवं सर्वेषु कालेषु शिक्षकस्यैव प्राधान्यं भवति ज्ञानं तृतीयं मनुजस्य नेत्रम्, बुद्धिर्ज्ञानेन शुध्यति बुद्धिर्यस्य बलं तस्य, विद्या ददाति विनयं, विद्याविनयेन शोभते,

विद्याविहीनः पशुः, नास्ति विद्यासमं चक्षुः', सा विद्या या विमुक्तये इत्यादिभिः आदर्शवाक्यैः शिक्षायाः सत्तां सर्वेऽपि अङ्गीकुर्वन्ति। शारीरिकशक्तीनां मानसिकशक्तीनाम्, अध्यात्मिकशक्तीनां च प्राप्त्यर्थम् उत्तमनागरिकाणां निर्माणाय च अपेक्षितः शिक्षकः। प्राचीनकालादेव शिक्षालयं मन्त्रदृष्टारः ऋषयः, महर्षयः, आचार्याः, गुरवः, उपाध्यायः अध्यापकाः शिक्षकाः, प्रेरकाः च सञ्चालयन्ति स्म जीवनयापनार्थं समाजरक्षार्थं राष्ट्रस्य मार्गदर्शनार्थं संस्कृतिसंरक्षणार्थं, विश्वबन्धुत्वभावनायाः विकासार्थं च शिक्षकाः सक्रियाः दृश्यन्ते। शिक्षकः–वाक्चतुरः, शिक्षणविधिषु निपुणः, उत्साहितः, अभ्युत्साहकः, ध्यानकेन्द्रितः सम्बोधयिता, नेतृत्वक्षमतायुक्तः, सत्यनिष्ठः, विश्वासपात्रं, संवेगात्मकसंतुलितः, आदरणीयः,आत्मसंयमितः, गम्भीरः उत्तरदायित्वनिर्वहणदक्षः।

**शब्दकल्पद्रुमे वाचस्पत्ये च–**

> **शान्तो दान्तः कुलीनश्च विनीतः, शुद्धवेशवान्।**
> **शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान्॥**
> **आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः।**
> **विग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते॥**

**महाभारतेऽध्यापकः**

> **प्रवृत्तवाक् चिन्तकश्च, ऊहवान् प्रतिभानवान्।**
> **आशुग्रन्थस्य वक्ता च यः सः पण्डितः उच्यते॥**

**पद्मपुराणे**

> **आचार्यो वेदसम्पन्नो विष्णुभक्तो विमत्सरः।**
> **मन्त्रज्ञो मन्त्रभक्तश्च सदामन्त्रात्मकः शुचिः॥**

**मनुस्मृतौ**

> **उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः।**
> **सङ्कल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥**

**अथर्ववेदे**

**आचार्य उपनयनमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।**
**तं रात्रिस्तिस्त्रः उदरे विभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः॥**

शिक्षकः समाजस्य आधारः भवति यस्मिन् मार्गे जनान् नेतुम् ईहते तस्मिन् मार्गे जनान् नेतुं शक्नोति यथा समाजं विकासयितुम् इच्छति तथा विकासयति च। शिक्षकः न केवलं सामान्यः अपितु ईश्वरगुणयुक्तः एव भवति।

**पाठ्यचर्यायां संस्कृतस्य स्थानम्**

यस्याधारेण वयम् अध्ययनं कुर्मः सः एव पाठ्यक्रमः भवति। पाठ्यक्रमः व्यापकः भवति। पाठ्यक्रमः पाठ्यचर्यायाः अङ्गमस्ति। पाठ्यचर्यायाः स्तरत्रयमस्ति, यथा प्राथमिकस्तरे संस्कृतम्। माध्यमिकस्तरे संस्कृतम्। उच्चस्तरे संस्कृतम्। संस्कृतपठनेन संस्काराः आगच्छन्ति। संस्कृतायोगस्य अध्यक्षः सुनीतिकुमारचटर्जिमहोदयः 1956–57 तमे वर्षे संस्कृतस्य विकासाय स्वविचारान् उपस्थापितवान्।

**प्राथमिकस्तरे संस्कृतस्य स्थानम्**

प्राथमिकस्तरे संस्कृतश्लोकानाम् उच्चारणं भवेत्। शुद्धोच्चारणदृष्ट्या लयसहितानां श्लोकानां गानं वैयक्तिकं सामूहिकञ्च। शब्दभण्डारस्य वृद्धिकरणम्। सरलसुबोधश्लोकानाम् अर्थबोधः कारणीयः। पाठस्य कतिचन शब्दरूपाणि स्मारणीयानि। अभ्यासमाध्यमेन व्याकरणनियमाः पाठनीयाः। व्यवहारिकशब्दानां संस्कृतरूपाणि वक्तव्यानि।

**माध्यमिकस्तरे संस्कृतस्य स्थानम्**

माध्यमिकस्तरे छात्राणां कृते लघुलघुश्लोकानां गद्यपद्यनाटककथादीनां व्यापकतया उद्बोधनसामर्थ्यं प्रकटयितुम् अवसरो देयः।

**उच्चमाध्यमिकस्तरे संस्कृतस्य स्थानम्**

अत्र छात्राणां स्तरवर्धनाय संस्कृतेन चिन्तनसामर्थ्यस्योत्पादनाय

व्यवहारिविषयाणां बोधनाय पाठ्यक्रमो चेयः। येन छात्राः शीघ्रतया विषयम् अवगन्तुं सामर्थ्यं संधारयेयुः।

## संस्कृतशिक्षणस्य उद्देश्यानि

साम्प्रतं जगति धनप्राप्त्यर्थमेव सर्वाणि कार्याणि क्रियन्ते, परं धनेनैव सर्वं न लभते। मानवस्य सर्वाङ्गीणविकासः धनेनैव न शक्यः, एतदर्थं ज्ञानस्य चरित्रस्य च आवश्यकता भवति। संस्कृतशिक्षणस्य मुख्यम् उद्देश्यं छात्राणां चारित्रिकोन्नतिरेव। संस्कृतशिक्षकेण दुर्जनाः अपि सन्मार्गे आनीयन्ते। छात्रः चरित्रवान्, नीतिवान् बुद्धिमान्, निष्ठावान्, साहसी, धीरः, अध्ययनशीलः स्यात् एतदर्थं संस्कृतशिक्षणं भवति। पारम्परिकधारायां विविधस्तरेषु संस्कृतशिक्षणस्योद्देश्यानि संस्कृतविश्वविद्यालयेषु गुरुकुलेषु च येन विधिना पठनपाठनं भवति, सः विधिः परम्परागतविधिः उच्यते। पारम्परिकधारायां संस्कृतशिक्षणस्य मुख्यतः त्रयः स्तराः भवन्ति प्राथमिकस्तरः माध्यमिकस्तरः उच्चस्तरश्च।

## प्राथमिकस्तरे संस्कृतशिक्षणस्योद्देश्यानि

छात्राणां मनसि संस्कृतभाषां प्रति अभिरुच्युत्पादनम्। वर्णमालायाः संयुक्ताक्षराणां चाध्यापनम्। गद्यपद्यादीनां पठने नैपुण्यसम्पादनम्। सरलपद्यानां मातृभाषया भावकथने तत्कण्ठस्थीकरणे च प्रेरणा प्रदेया। पुस्तके मुद्रितांशानां पठने लेखने च नैपुण्यसम्पादनम्। पाठ्यांशे आगतानां शब्दानां व्याकरणदृष्ट्या परिचयप्रदानम्। संस्कृतकवीनां परिचयप्रदानम्। सरलसम्भाषणे दक्षतासंवर्धनम्। माध्यमिकस्तरे संस्कृतशिक्षणस्योद्देश्यानिभाषां प्रति रुच्युत्पादनम्। श्लोकानां स्पष्टोच्चारणे कौशलसम्पादनम्। श्लोकानां गति-यति-लय-भावाभिनयपुरस्सरं पठने दक्षतोत्पादनम्। संस्कृतभाषायाः सरलसाहित्येन सह परिचयसम्पादनम्। गद्यपद्यादीनां विविधशैलीद्वारा पाठनम्। पद्यगद्यादीनां तुलनात्मकं ज्ञानसम्पादनम्। आध्यात्मिकज्ञानेन सहलौकिकज्ञानस्य सम्पादनम्। कल्पनाशक्तेः विकास-करणम्। सर्जनात्मकशक्तेः संवर्धनम्। रसानुभूतेः सम्पादनम्। छन्दश्शास्त्रे प्राथमिक-ज्ञानसम्पादनम्। उच्चस्तरे संस्कृतशिक्षणस्योद्देश्यानि उत्कृष्टसाहित्य-रचनासु अभिरुचिवर्धनम्। भावाभिव्यक्तेः ज्ञानसम्पादनम्। विविधपाठन-

शैलीनां परिचयप्रदानम्। रस–ध्वन्यलङ्कारभेदानाञ्च ज्ञापनम्। अभिधा–लक्षणा–व्यञ्जनादि–उच्चसाहित्यिकगुणानां ज्ञानसम्पादनम्। छात्राणां कवित्वशक्तेः बहिरानयनम्। संस्कृतस्य उत्कृष्टशास्त्रद्वारा उत्कृष्टज्ञानस्य सम्पादनम्।

**आधुनिकधारायां विविधस्तरेषु संस्कृतशिक्षणस्योद्देश्यानि–**

ईशवन्दना। संस्कृतेन क्रीडनम्। भाषणे दक्षतोत्पादनम्। भाषाक्रीडा सहायकक्रीडारूपेण करणीया। विभिन्नसांस्कृतिक–कार्यक्रमाणाम् आयोजनम्। अन्त्याक्षरीप्रतियोगितायै सिद्धता। नैतिकगुणानां विकासाय कार्यक्रमाः करणीयाः। सामाजिकावश्यकतानां पूर्त्यर्थं कार्यक्रमाः। नागरिकतायाः प्रशिक्षणम्। विशिष्ट–रुचीनां विकासः। अवकाशदिनानां सदुपयोगः।

**संस्कृतशिक्षणस्य गुणवत्तावर्धनम्–**

संस्कृतशिक्षणं प्रायः परम्परागतविधिना एव क्रियते,एतस्मात् कारणात् संस्कृतक्षेत्रे नूतनप्रयोगाणां न्यूनतास्ति। आधुनिकयुगे प्रयोगस्य महत्त्वमस्ति एतदर्थम् अस्माभिः संस्कृतशिक्षणक्षेत्रे आधुनिकविधिप्रविधीनामपि प्रयोगः करणीयः एतेन संस्कृतक्षेत्रे क्रान्तिः समुत्पत्स्यते, तथा च संस्कृतच्छात्रेषु पाठं प्रति उत्साहस्य वर्धनं भविष्यति। एवं कृत्वा संस्कृतशिक्षणे गुणवत्ता उत्पत्स्यते। गुणवत्ता द्विधा अपेक्षिताछात्रदृष्ट्या शिक्षकदृष्ट्या च।

**छात्रदृष्ट्या कक्षायाः पूर्वक्रियाः–**

- शिक्षकद्वारा प्रदत्तकार्यस्य सम्पादनम्।
- आगामिपाठाय पूर्वसज्जता।
- उत्सुकतापूर्वकं शिक्षकस्य प्रतीक्षा।
- शिक्षकस्य व्यवहारानुसारं छात्रस्य व्यवहारेऽपि परिवर्तनानयनम्।
- शिक्षकं प्रति गाम्भीर्यम्।

**शिक्षकदृष्ट्या कक्षायाः पूर्वक्रियाः–**

शिक्षकेणापि चिन्तनं द्विधा करणीयं यथा– छात्रदृष्ट्या विषयदृष्ट्या च।

**छात्रदृष्ट्या–**

- शिक्षकः तस्य स्मृतिस्तरानुसारं, गृहपरिस्थित्यनुगुणं, स्थानानुगुणं च चिन्तनं करोति। छात्राणां ध्यानाकर्षणाय चिन्तनं करोति।
- छात्राणाम् उद्देश्यनिर्माणाय च चिन्तयति।
- छात्राणां सामर्थ्यदृष्ट्या, अवगमनदृष्ट्या च शिक्षकः स्वस्य पूर्वक्रियां कर्तुं शक्नोति।
- उद्दीपनपरिवर्तनं पाठं रुचिपूर्णं करोति।
- अतः शिक्षकः चिन्तयति तेन कुत्र कथञ्च उद्दीपनपरिवर्तनं करणीयम्।

**कक्षान्तःक्रिया–**

- प्रस्तावनामाध्यमेन पाठस्य उपस्थापनम्।
- दृश्यश्रव्योपकरणानां प्रयोगः।
- उद्दीपनपरिवर्तनद्वारा छात्रस्य ध्यानाकर्षणम्।
- उत्तमाय सम्प्रेषणाय प्रयासः करणीयः।
- शिक्षकच्छात्रयोर्मध्ये उत्तमा अन्तःक्रिया भवेत्।

**कक्षोत्तरक्रियाः–**

- प्रश्नस्य निर्माणम्।
- युक्तेः विकासः।
- प्रश्नस्य उत्तरक्रियाः।
- कार्यस्य कृते सङ्कल्पः।
- सुस्पष्टं, सुविचारात्मकञ्च प्रश्नकरणम्।

**भाषायामाः कौशलानि आयामाः च–**

आयामाः अर्थात् साधनानि। श्रवणम्, उच्चारणम्, महत्त्वं च विभिन्नेन्द्रियाणां सामर्थ्यम्। स्थानप्रयत्नयोः ज्ञानम्। कौशलानि श्रवणं भाषणं–

पठनं लेखनं श्रवणमुच्चारणञ्च मनसः समञ्जनम् अर्थात् मनः कर्मेन्द्रियैः सम्पृक्तं भवति। श्रवणात् परम् उच्चारणम्। उच्चारणं पदस्तरे करणीयम्। रूपस्तरे पदानाम् उच्चारणम्। शब्दस्तरे पदानाम् उच्चारणम्। गद्यस्तरे पदानाम् उच्चारणम्। कथास्तरे पदानाम् उच्चारणम्। पुस्तकस्तरे पदानाम् उच्चारणम्। महत्त्वश्रवणेन विषयस्य स्पष्टज्ञानं भविष्यति। भाषायाः व्यवहारः श्रवणं विना भवितुं नार्हति। साधनानि गुरुमुखं परिवारसदस्याः आकाशवाणी दूरवाणी दूरदर्शनं ध्वनिमुद्रणयन्त्रं सङ्गणकयन्त्रं ध्वनिविस्तारकयन्त्रम्। **महत्त्वम्**- श्रवणेन शब्दानां कल्पनम्। मुखचालनादिविधीनां श्रवणेन परिज्ञानम्। भाषामाध्यमरूपेण चिन्तने विकासः। पृथक्-पृथक्-शब्दानां बोधनसामर्थ्यस्य भाषाबोधनसामर्थ्यस्य च विकासः। श्रवणेन अर्थावगमनसामर्थ्यस्य उत्पादनम्। विविधेन्द्रियाणां सामर्थ्यं शब्दश्रवणेन यावदधिकप्रमाणेन कर्णेन्द्रियस्य पठनेन चक्षुरीन्द्रियशब्दपरिज्ञानसंस्कारो भवति तद्बलेनैव पौनःपुण्येन शब्दश्रवणेन छात्राणामिन्द्रियसामर्थ्यं वधते। स्थानप्रयत्नयोः ज्ञानम्-छात्राः उच्चारण-स्थानानि बाह्यप्रयत्नान् आभ्यन्तरप्रयत्नान् यथाक्रमं जानन्ति चेद् विषयबोधनम् उच्चारणादिज्ञाने सहजतया छात्राणां जायते तेषां स्वस्थपरिज्ञानं नूतनविषयाणां वाचनसामर्थ्यं वर्धते। अतः स्थानप्रयत्नज्ञानं महत्त्वपूर्णभूमिकां निवर्हति। छात्रशिक्षकयोः मध्ये अन्तःक्रियायाः महती आवश्यकता विद्यते अनयोः द्वयोः उचितानुक्रियया विषयज्ञानमपि उत्पद्यते पठनशक्तिरपि विकसिता भवति। सर्वेषु स्तरेषु उद्देश्यानि विचिन्त्य उच्चस्तरीयं विज्ञानं ज्ञानं छात्राणाम् उत्पादयितुं कश्चन अवसरः संचाल्यते।

उपसंहाररूपेण चिन्त्यते यत् न केवलं संस्कृतं सामाजिकं पारितोषिकं प्रददाति अपितु अलौकिकम् अपवर्गमपि प्रदातुं शक्नोति।

तृतीयोऽध्यायः

# भाषायाः आयामाः कौशलानि च

भाषायाः सुतरां परिज्ञानाय अनेकसोपानानाम् आवश्यकता अनुभूयते तत्र उच्चारणं, वाचनं, उच्चारणप्रशिक्षणं च, एतदतिच्य भाषा-कौशलानि अपि भाषाज्ञानाय महत्त्वपूर्णभूमिकां निवर्हन्ति तदनु एव साधनाधिगमः जायते। आयामाः अर्थात् साधनानि। श्रवणम्, उच्चारणम्, महत्त्वं च विभिन्नेन्द्रियाणां सामर्थ्यम्। स्थानप्रयत्नयोः ज्ञानम्। **कौशलानि**-श्रवणम्, भाषणम्, पठनम्, लेखनं च।

**श्रवणमुच्चारणञ्च**- मनसः समञ्जनम् अर्थात् मनः कर्मेन्द्रियैः सम्पृक्तं भवति। श्रवणात् परम् उच्चारणम्। उच्चारणं पदस्तरे करणीयम्। रूपस्तरे पदानाम् उच्चारणम्। शब्दस्तरे पदानाम् उच्चारणम्। गद्यस्तरे पदानाम् उच्चारणम्। कथास्तरे पदानाम् उच्चारणम्। पुस्तकस्तरे पदानाम् उच्चारणञ्च।

**महत्त्वम्**- श्रवणेन विषयस्य स्पष्टज्ञानं भविष्यति। भाषायाः व्यवहारः श्रवणं विना भवितुं नार्हति।

**साधनानि**- गुरुमुखं परिवारसदस्याः आकाशवाणी दूरवाणी दूरदर्शनम्, ध्वनिमुद्रणयन्त्रम्, सङ्गणकयन्त्रम्, ध्वनिविस्तारकयन्त्रं च।

**महत्त्वम्**- श्रवणेन शब्दानां कल्पनम्। मुखचालनादिविधीनां श्रवणेन परिज्ञानम्। भाषामाध्यमरूपेण चिन्तने विकासः। पृथक् पृथक्-शब्दानां बोधनसामर्थ्यस्य भाषाबोधनसामर्थ्यस्य च विकासः। श्रवणेन अर्थावगमन-सामर्थ्यस्य उत्पादनम्।

**विविधेन्द्रियाणां सामर्थ्यम्–**

शब्दश्रवणेन यावदधिकप्रमाणेन कर्णेन्द्रियस्य पठनेन चक्षुरीन्द्रियशब्द-परिज्ञानसंस्कारो भवति तद्बलेनैव पौनःपुण्येन शब्दश्रवणेन छात्राणामिन्द्रिय-सामर्थ्यं वर्धते।

**स्थानप्रयत्नयोः ज्ञानम्**– छात्राः उच्चारणस्थानावि बाह्यप्रयत्नान् आभ्यन्तरप्रयत्नान् च यथाक्रमं जानन्ति चेद् विषयबोधनम् उच्चारणादि-ज्ञानेसहजतया छात्राणां जायते तेषां स्वस्तपरिज्ञानं नूतनवर्णानां वाचनसामर्थ्यं वर्धते। अतः स्थानप्रयत्नज्ञानं महत्त्वपूर्णभूमिकां निवर्हति।

**वाचनं लेखनं च**– वाचनं द्विधा अर्थग्रहणपुरस्सरं वाचनं, यथायोग्यं वाचनं च। दोषपरिहारदृष्ट्या वाचनम्। अर्थग्रहणदृष्ट्या वाचनम्। वाचनेन सम्बन्धज्ञानं भवति। विषयवस्तुनः ज्ञानं वाचनेन भवति। गद्यस्य अर्थावगमनं वाचनेन भवति। वाचनस्य अपरनाम पठनं यद्यपि एतत्पृथक् रूपेण स्वीक्रियते तथापि क्वचित् अपरत्वमपि भजते। वर्णज्ञानं वाचननिमित्तम्। शब्दज्ञानम्। पदज्ञानम्। वाक्यानां ज्ञानम्। वचनस्य महत्त्वं वाचनेन विषयाणां ज्ञानं भवति। वाचनेन अविच्छिन्नानां शब्दानां पठनं भवति। धैर्येण विषयाणाम् उपस्थापनञ्च भवति।

**वाचनप्रकाराणि** लयात्मकवाचनम्। सस्वरवाचनम्। मौनवाचनम्। द्रुतवाचनम्। मन्दवाचनं च। यावत् छात्रः लयगतियतिविरामचिह्नानुसारं पठनं न करिष्यति तावत् तस्य अर्थावगमः न भविष्यति। वाचनाय अर्थज्ञानं वाक्यनिमित्तम् अपेक्षते।

**विषयदृष्ट्या वाचनस्य प्रकाराः**– गद्यम्, पद्यम्, कथा, गीतं च।

**लेखनम्**– लेखनं सम्पादयितुं पूर्वोक्तविषयः अपेक्ष्यते। कश्चन कालः लेखनाय अपेक्ष्यते। वर्णज्ञानम्। – मात्राज्ञानम्। वाक्यज्ञानम्। पदज्ञानम्। एतान् सिद्धान्तान् अनुसृत्य लेखनकौशलस्य विकासः जायते। लेखनाय चिन्तनम् उच्चारणञ्च आवश्यकम्।

**लेखनम्**– दृष्ट्वा श्रुत्वा च भवति। लेखने बहुविधाः दोषाः जायन्ते। तत्रहि– उच्चारणगतदोषकारणात् दोषाः भवन्ति। प्रयत्नस्थानादीनाम् अज्ञानेनापि दोषाः जायन्ते। नूतनभाषायाः लेखनेऽपि दोषाः जायन्ते।

**लेखनसिद्धान्ताः -**

मात्रा, अनुस्वारः, मकारः, ह्रस्वः, दीर्घः, विसर्गः, उष्णः, अल्पप्राणः, महाप्राणः, चकारः, वकारः च इत्यादयः। तत्र हि लेखन- सिद्धान्ताः क्रमेण संक्षेपेण च उपस्थाप्यन्ते यथा- मात्रा - यदि मात्रा एका भवति तर्हि ह्रस्वः। यदि मात्राद्वयं भवति तर्हि दीर्घः। यदि मात्रात्रयं भवति तर्हि प्लुतः। यदा मात्रार्धं जायते तदा व्यञ्जनम्। अनुस्वारः पाठान्ते मकारः भवेत्। परे अचि अस्ति तर्हि मकारः। यदि परे हलि अस्ति तर्हि अनुस्वारः। ह्रस्वः यदा एका मात्रा भवति तदा ह्रस्वः। समासे ह्रस्वः। कालानुगुणं ह्रस्वः। दीर्घः यदा मात्राद्वयं भवति, तदा दीर्घः कालानुगुणं दीर्घः **विसर्गः** कखयोरग्रेऽर्धविसर्गः भवति तच्च नाम जिह्वामूलीयम्।

पफयोरग्रे परेऽर्धविसर्गो भवति तच्च नाम उपध्मानीयं भवति। खरि परे विसर्गस्य सकारः भवति। शरिपरे विकल्पेन सकारो भवति। हशिपरे उकारः। अप्लुतादकारात्परस्याकारे परे उकारः भवति। एवमन्ये केचन नियमाः लघुसिद्धान्ते परिशीलनीयाः।

**श्रवणस्य ग्रहणशीलता-**

ग्रहणशीलतायै अच्-हल्-वर्णानां मध्ये भेदज्ञानम् आवश्यकम्। आभ्यान्तरबाह्यप्रयत्नयोः ज्ञानम्। अल्पप्राणमहाप्राणयोः भेदस्पष्टीकरणम्। ऋलृवर्णयोः विलक्षणोच्चारणयोः ज्ञानम्। पञ्चसु वर्गेषु विद्यमानानाम् अनुनासिकाननुनासिकवर्णानाम् उच्चारणभेदप्रदर्शनम्। श, ष, स, ज्ञ इत्येतेषां वर्णानाम् उच्चारणभेदज्ञापनम्। क्ष, ष्ट, श्च,च्च, च्छ इत्येतेषां संयुक्ताक्षराणाम् उच्चारणे ध्वनिभेदस्मारणम्। गद्यपद्ययोः पठने भेदज्ञानम्। विविधभाषाप्रभावेण व्यवह्रियमाणानां वर्णानां श्रावणम्। उदात्तानुदात्तस्वरितभेदश्रावणम्। ह्रस्वस्वरित-भेदश्रावणं च।

**श्रवणकौशलस्य सम्बन्धोपायः –**

ध्वनिमुद्रणं कृत्वा श्रवणम्। मध्ये आरक्षितशब्दानां श्रवणम्। परस्पर-भाषणेन श्रवणम्। चलचित्र-दूरदर्शन-आकाशवाणी इत्यादिमाध्यमेन श्रवणम्। उच्चारणप्रशिक्षणाय भाषाप्रयोगशालायाः महत्त्वपूर्णं स्थानं वर्त्तते।

प्रयोगशालायां वर्ण-अक्षर-शब्द-वाक्यादीनां श्रवणम्। प्रयोगशालायाम् आदौ श्रवणं तदनन्तरम् अभ्यासः।

**ध्वनिमुद्रणम्**- ध्वनिमुद्रणेन श्रवणानन्तरं दोषाणां परिष्कारं कर्तुं शक्नुमः। वैयक्तिकरूपेण सामूहिकरूपेण अभ्यासं कर्तुं शक्नुमः।

**उच्चारणदोषाः-** अनवधानकारणेन अनभ्यासकारणेन, अज्ञानेन, दोषाः कथं जायन्ते इति विचारणीयं तत्र इमानि कारणानि अन्तर्भूतानि दृश्यन्ते यथा- मातृभाषाप्रभावकारणेन शीघ्रताकारणेन श्रवणाभावे ध्वनिलोपः च। दोषाः के जायन्ते? प्रयत्नलाघवम् उच्चारणगतदोषाः मात्रात्मकदोषाः शकारोच्चारणात्मक- दोषाः हलन्तपदानामभावगतदोषाः, संयुक्ताक्षरगतदोषाः च।

**दोषनिवारणोपायाः** - अभ्यासेन उच्चारणादीनां ज्ञानेन, मातृभाषायाः पृथक्कृत्वा उच्चारणम्, भाषणात् चिन्तनम्, प्रयत्नादिप्रयोगेण, भाषाप्रयोगशालायां प्रयोगेण च उच्चारणगतदोषाः न्यूनतां निर्वहन्ति।

**उच्चारणगतदोषाणां निवारणोपायाः-** पौनःपुन्येन शब्दानां श्रवणम्। श्रुतस्य शब्दस्य अनुकरणम्। लेखनानन्तरम् उच्चारणम्। भाषाप्रयोगशालायाः प्रयोगः/ भयत्यागः च।

**वाचनकौशलम्-** प्रशिक्षणोपायाः-वर्णपदपदसमुच्चयवाक्कथाकथन-विधीनां सन्दर्भे, सस्वरवाचनं मौनवाचनं च।

**वाचनकौशलम्- वाचनकौशलस्य शिक्षणविधयः**- वर्णमाला-विधिः, शब्दशिक्षणविधिः, वाक्यशिक्षणविधिः च।

**मौनवाचनम्**- अर्थावबोधनपूर्वकं समग्रस्य विषयस्य ध्यानेन पठनम्।

**लेखनकौशलम्**-

**नियमाः** - प्रकाराः- श्रुतलेखनं - दृष्टलेखनं - लेखने दोषनिवारणो-पायश्च।

**लेखनकौशलम्**- वाण्या यद् उच्यते तस्य स्थायिरूपेण लेखनम्। लेखनं वर्णरूपेण भवति। ध्वनिरूपस्य लिपिरूपेण परिवर्तनपुरस्सरं लेखनम्। भावनानां स्वरूपप्रदानपुरस्सरं लेखनम्। भावस्य लिपिरूपेण प्रतिपादनम्।

**लेखनस्य विकासः–** स्पष्टं लेखनं भवेत्। सुन्दररूपेण लेखनं स्यात्। सुपाठ्यं भवेत्। स्थायि अवगमनयोग्यञ्च स्यात्। सर्वकालिकं स्यात् यथा महाभारतरामायणादि।

**नियमाः** - शब्देषु रेखास्थापनम्। लेखननियमानां परिपालनम्। शब्दानां समाना कृतिः। लेखन्याः उचितरूपेण ग्रहणम्। चिन्तनानन्तरमेव लेखनम्। एकस्यैव कठिनशब्दस्य बारम्बारं लेखनम् अनुलेखनं वा। विरामादिचिह्नानां समुचितस्थाने स्थापनम्। मात्रादीनां ज्ञानम्। यः एतान् लेखननियमान् परिपालयति सः कविः, रचयिता, उत्तमलेखकश्च भवितुमर्हति। अस्मिन् **त्रयः विषयाः अन्तर्भवन्ति** -

1. विषयज्ञानम्
2. भाषाज्ञानम्
3. साहित्यज्ञानं च।

**लेखनदोषाणां निवारणोपायाः**

**प्रतिवर्णं** - प्रतिपदं प्रतिवाक्यम् अवधानम्। मात्रादीनां ज्ञानम्। ह्रस्व-दीर्घ-प्लुतादीनां ज्ञानम्। विषयगाम्भीर्यं विचिन्त्य क्रमेण लेखनम्। कृतदोषस्य निवारणम्। अनुलेखनं - प्रतिलेखनं च मुहुर्मुहुः करणीयम्। नूतनशब्दानां बारम्बारं पठनम्। प्रसिद्धकवीनां ग्रन्थपठने रुचिसम्वर्धनम्।

**लेखनस्य प्रकाराः** लेखनं द्विविधम्- 1. श्रुतलेखनं 2. दृष्टलेखनश्च। श्रुतलेखम्- श्रुत्वा लेखनं श्रुतलेखनम्, उच्चस्तरे भवति। दृष्टलेखनं द्विविधम्- प्रतिलेखनं अनुलेखनञ्च।

**उपसंहारः**- वर्णाक्षरशब्दवाक्यादीनां सुस्थिरश्रवणादारभ्य भाषणपठन-कौशलयोः विकासपूर्वकं, लेखननियमानां परिपालनपुरस्सरं लेखनविकासः महत्त्वपूर्णभूमिकां निर्वहति, यतः भाषायाः चतुर्षु कौशलेषु अन्तिमकौशलरूपेण

इदम् अङ्गीक्रियते अतः श्रमोऽपि महान् अपेक्षितः, भाषायाः साहित्यिक-विकासाय अस्य महती आवश्यकता वर्तते तदनुगुणमेव भाषाविकासप्रक्रिया प्रसृता भवति, लेखनं न केवलं छात्रविकासं करोति अपितु सर्वस्याः प्रक्रियायाः अपि विकासाय यतते तत्र शिक्षकः समाजः साहित्यं च सर्वं क्रमशः अन्तर्भवन्ति। तत्र उच्चारणार्थं पदस्तरे, रूपस्तरे, शब्दस्तरे, गद्यस्तरे, कथास्तरे पुस्तकस्तरे च पदानाम् उच्चारणाभ्यासः नितराम् अपेक्षितः भवति।

# चतुर्थोऽध्यायः

# संस्कृतशिक्षणोपागमाः

**संस्कृतशिक्षणोपागमाः**

संस्कृतमेव मानवाय सञ्जीवनीं जीवनसामर्थ्यं च ददाति, अतः संस्कृतशिक्षणस्य विविधायामैः युक्तिभिः, विधिभिः च पाठनस्य आवश्यकता अनुभूयते। संस्कृतस्य सांस्कृतिकं महत्त्वं सर्वे विदन्ति एव, अस्याः भाषायाः वैज्ञानिकं, व्यवसायिकं च महत्त्वं वर्तते, किन्तु एतस्य व्यवस्थितविकासप्रक्रमाय निरन्तरं नूतनचिन्तनप्रयोगः कार्यः! तदर्थमुपायः ज्ञेयोऽस्ति। युक्तिः, विधिः, प्रणाली, उपागमः चेत्यादीनि नामानि अपि सामान्यरूपेण उपागमत्वेन स्वीकर्तुं शक्यन्ते तदर्थमत्र उपागमः इति शब्दः प्रतिपाद्यते–उपागमः साधनम्। अस्यार्थः– येन शिक्षणेन अस्माकं ज्ञानस्य सिद्धिर्भवति स एव उपागमः। अभियान्त्रिकसाधनैः अध्यापनमेव उपागमः। प्रतिमानम् उपागमस्य अंशविशेषः वर्तते। विधिसाधनानां प्रयोगपुरस्सरं पाठनम् उपागमः।

स्मृति–बोध–चिन्तनानुगुणम् अवबोधनम् उपागमः। **शिक्षणप्रतिमानम्**– शिक्षणक्रियाणां केन्द्रबिन्दुम् उद्देश्यं च आधारीकृत्य यत् सापेक्षं परिवर्तनं शक्यं तदेव शिक्षणप्रतिमानम्। स्मृति–उपागमः बोध– उपागमः चिन्तन–उपागमः, शिक्षणोपागमः–उपागमः, मृदूपागमः। शिक्षणप्रतिमाननिर्माण–प्रक्रियायां विषयस्य बोधनेन स्पष्टीकरणम् उपागमः भवति। नियमितरूपेण विषयाणां बोधनार्थं मानसिकशय्यानिमित्तं प्रयत्नसाधनम् उपागमः। विभिन्नप्रसङ्गानुसारे विषय–बोधनाय उपागमः साधनमस्ति। संस्कृतशिक्षणोपागमः अत्र त्रयः विषयाः मुख्यरूपेण वर्तन्ते ते यथाउपागमः – 1. स्वरः 2. विषयः 3. आवश्यकता (छात्राणाम्)। साहित्यं व्याकरणं ज्योतिषं न्यायशास्त्रं छात्रस्य समाजस्य स्वज्ञानानुगुणः अर्थः ज्ञानस्य सञ्चयः ज्ञानस्य प्रसारः प्रचारः वा भवति। ज्ञानस्य विस्तारः समस्यानां समाधानाय निर्णयप्राप्तेः च विधिः – उपागमः।

अत्र 'विधिः' इत्युक्ते प्रक्रमः। त्रयाणामपि आधारेण उपागमस्य उपादेयता अर्थात् उद्देश्यम्। पाठ्यवस्तु। पाठ्योद्देश्यानां समाधानार्थम्। पाठ्यवस्तुनः लक्ष्यप्राप्तिः।

**उपागमस्य प्रकाराः–**

कठोरोपागमः मृदुलोपागमः प्रणालीविश्लेषणोपागमश्च। कठारोपागमः तादृशः उपागमः वर्तते यः संस्कृतिरितिरूपेण दृष्टिकोणस्य निर्माणं करोति। येन विषयाध्यापनाय काचित् दृष्टिः समुत्पद्यते यया प्रेरिताः सन्तः जनाः विषयं परिपालयन्ति। अध्यापनदृष्ट्या उपागमाः महत्त्वपूर्णां भूमिकां यत्र निर्वहन्ति। तत्रैव सिद्धान्तानां परिपालनपूर्वकम् अध्यापनस्य आवश्यकता अवलोकिता भवति। सिद्धान्तान् आधारीकृत्य अध्यापनेन अवश्यं छात्रः विषयदृढतां समालभन्ते। तदर्थमेव प्राप्तेऽस्मिन् अवसरे सिद्धान्ताः संक्षेपेण उपस्थाप्यन्ते।

**सिद्धान्ताः**

**प्राकृतिकसिद्धान्तः–**

अस्य अपरं नाम स्वाभाविकसिद्धान्तः अस्ति। प्राकृतिकशिक्षणम् इत्युक्ते भाषाशिक्षणम्। बालकः स्वभावात् एव भाषां वदति। भाषाध्ययनस्य प्रकृतिः एव बालकानां स्वभावः। बाल्ये एव विषयबोधः स्वाभाविकतया भवति। श्लोकगीतभाषादीनां माध्यमेन भाषायाः अभ्यासः करणीयः।

**अभ्यासस्य सिद्धान्तः–**

भाषादृष्ट्या अभ्यासः। कठिनशब्दानाम् अभ्यासः। वर्णानाम् उच्चारणम्। पदानाम् अभ्यासः करणीयः। व्याकरणगतदोषाणां निवृत्तिः। शुद्धोच्चारणस्य वाचनाभ्यासः।

**रुचेः सिद्धान्तः–**

मनोवैज्ञानिकसिद्धान्तानां प्रयोगं कृत्वा अभ्यासः। रुचिपूर्वकं पठनम्। प्रस्तावनापुरस्सरं पाठनम्। पाठ्यसामग्रीभिः सहायक– सामग्रीभिश्च विषयस्य पाठनम्।

**मौखिकक्रियासिद्धान्तः–**

श्रवणेन्द्रियस्य अधिकाधिकप्रयोगः। जिह्वायाः प्रयोगः अभ्यासश्च। व्यवहारिकशब्दानाम् अभ्यासः। भाषया भाषणस्य अभ्यासः।

**समन्वयसिद्धान्तः–**

अस्मिन् सिद्धान्ते क्रियमाणानां प्रचाराणां निम्नरूपेण लेखनं भवितुमर्हति। समवेतस्वरेण प्रार्थना करणीया। श्लोकानाम् उच्चारणे समन्वयः। अभ्यासशिविराणाम् आयोजनम्। क्रीडासिद्धान्तस्य उपयोगः। अन्त्याक्षरी – वादविवादेत्यादीनाम् आयोजनम्। सर्वेक्षणद्वारा समन्वयम्। उपर्यक्तसिद्धान्तानाम् आधारेण छात्रेषु संस्कृताध्ययनप्रवृत्तिः सहजतया उत्पादयितुं शक्यते। सिद्धान्तानां समञ्जनपूर्वकं छात्राणां शिक्षणं कर्तुं प्रवृत्तिः जायते। सिद्धान्तान् सम्यक् उपस्थापयितुं विधीनां व्यवस्थितज्ञानम् अपेक्षितम्। एतदर्थम् अग्रे विधीनां विवरणं संक्षिप्तरूपेण प्रस्तूयते।

**संस्कृतशिक्षणस्य विधयः**– मार्गः विधेः ज्ञानं किमर्थम्? विधिः कः? इत्यनयोः प्रश्नयोः उत्तरमपेक्षितम्। विधिः अस्याभिप्रायः मार्गः। मार्गः अर्थात् अध्यापनस्य मार्गः। विधिः विषयं रुचिकरं कर्तुम् आवश्यकः। सहजतया विषयबोधनाय आवश्यकः। विषयवस्तुनः सम्यक्तया उपस्थापनार्थं विधेः प्रयोगः महत्त्वपूर्णो भवति। विधिप्रयोगेण शिक्षणप्रक्रिया सुचारुरूपेण प्रवर्तते।

**विधेः ज्ञानं किमर्थम्**– इति प्रश्ने कृते सति उत्तरं प्राप्यते? छात्राणां बोधनाय। उत्तमतया प्रस्तुतीकरणाय च।

**विधयः**– पारम्परिकविधिः, भण्डारकरविधिः, पाठ्यपुस्तकविधिः, प्रत्यक्षविधिः, समन्वयविधिः च।

**पारम्परिकविधिः**– पारम्परिकविधिः द्विधा विभज्यते

**पाठशालाविधिः**– साहित्यम्

**व्याकरणविधिः**– व्याकरणम्।

**पाठशालाविधिः**- पाठशालाविधौ साहित्यमायाति। अस्य अपरं नाम पण्डितप्रणाली। प्राचीनकालादेव एष विधिः अस्ति। अस्य लक्ष्यं भवति चतुर्वर्गफलप्राप्तिः। जीवनपद्धतिविषये अत्र अवधानं क्रियते।

**उद्देश्यानि**-

सम्प्रदायसभ्यतासंस्कृतिदेशभक्ति-आस्तिकभावानाश्चेत्यादीनां प्रधानतया सम्पादनम्। वेदोपनिषत्पुराणेतिहासादीनां ज्ञानं सम्पाद्य ईश्वरभक्तेः धार्मिक-भावनायाश्च सम्वर्धनम्। चतुर्णां पुरुषार्थानां सम्पादनम्। सच्चरित्रस्य सम्पादनम्। समीचीनव्यक्तित्वस्य सम्पादनम्। आत्मचिन्तनं तर्कशक्त्यादीनां सम्पादनम्। प्राचीनधार्मिकशिक्षायां रुचिसम्पादनम्। परम्परागतविधेः लक्ष्यं ज्ञानस्य संरक्षणप्रसारः च भवति।

**पाठ्यक्रमः –**

प्रारम्भे शब्दरूपावलीधातुपाठसन्धिसमास-अमरकोशादीनां स्मरणम्। साहित्यस्य परिचयः, लघुसिद्धान्तकौमुद्याः सूत्राणां कण्ठस्थीकरणं, व्याख्या-प्रस्तुतीकरणञ्च। सरलगद्यपद्यरूपकादीनां पाठनम्। मध्यसिद्धान्तकौमुदी-सिद्धान्तकौमुदी-अष्टाध्यायीमहाभाष्यादिग्रन्थानां पाठनम्। काव्यानां प्रकरण-ग्रन्थानाञ्च दृढतराध्ययनम्। साहित्यसमालोचनं पठनं च।

**गुणाः**-अधोलिखितरूपेण अनेकान्गुणान् द्रष्टुं शक्नुमः। मानसिकगुणाय स्मरणशक्तेः च अधिकं प्राधान्यं दीयते। गुरुशिष्ययोः सम्बन्धः उत्तमः भवति। उच्चारणगतदोषाणां पूर्णतया निवारणं भवति। रटनक्रियायाः, कण्ठस्थीकरणस्य च प्राधान्यम्। शब्दाः, धातवः, समासाश्च आदौ एव दृढतया पाठ्यन्ते। सांस्कृतिकं तथा चआध्यात्मिकं मूल्याङ्कनाम् अधिकं महत्त्वपूर्णमस्ति। शोधपरकज्ञानम् अनेन विधिना प्राप्तुं शक्नुमः। अनया पद्धतया अधीतवन्तः छात्राः उच्चपदं लभन्ते।

**दोषाः**–पाठ्यक्रमे एकः पक्षः अधिकतया अस्ति। एषा पद्धतिः निरसा वर्तते, छात्राः अत्र रुचिं नैव प्रदर्शयन्ति। लौकिकैतिहासिक-तुलनात्मकानाम् आलोचनात्मकानांच विषयाणां प्रामुख्यं नास्ति। स्मरणशक्त्या अधिकावकाशप्रकल्पनेन जीवनप्रगतेः विकासः भवितुं नार्हति। पाठ्यसहगा-

मिक्रियाणां कृते स्थानमेव नास्ति। स्वस्य कृते अवकाशः नास्ति। शिक्षणे छात्रक्रियाणाम् अवकाशः नास्ति। शिक्षा अध्यापककेन्द्रितास्ति। कल्पनाशक्तेः ह्रासः भवति। शारीरिक-मानसिक-सामाजिकविकासः कुण्ठितः भवति। जीविकोपार्जने कुण्ठितो भवति।

**भण्डारकरविधिः** -

व्याकरणानुवादपद्धतिः अस्य नामान्तरम्। रामकृष्णगोपालभण्डारकरः अस्य विधेः प्रतिपादकः। अस्य प्रारम्भः गुजराततः अभवत्। यूरोपदेशे भाषानुवादपद्धतिः आसीत्, तं विधिम् अनुसृत्य एषः विधिः भण्डारकमहोदयेन निर्मितः। तत्र मुख्यतया द्वे पुस्तके च लिखिते। 1. मार्गोपदेशिका- 31 अध्यायाः 2. संस्कृतमन्दिरान्तः प्रवेशिका- 26 अध्यायाः।

**उद्देश्यानि** –

संस्कृतभाषायाः वर्गीकरणं कृत्वा सरलतया संस्कृतविषयोपस्थापनम्। संस्कृतेः प्राथमिकज्ञानप्रदानम्। प्रौढानां बालानां कृते सरलतया ज्ञानप्रदानम्। संस्कृतानभिज्ञानां प्राच्यपाश्चात्त्यप्रौढानां सुलभतया संस्कृताध्यापनम्। विषयकण्ठस्थीकरणस्य दूरीकरणम्। स्वशक्तेः जागरणम्। अनुभवज्ञानस्य सम्पादनम्। व्याकरणेन अनुवादेन च सस्कृताध्ययनम्। सरलव्याकरणज्ञान-सम्पादनम्। संस्कृताध्ययने विद्यमानायाः भीतेः दूरीकरणम्। संस्कृताध्ययनं कठिनं नास्ति इति ज्ञापनम्। संस्कृतभाषातः आङ्ग्ले आङ्ग्लतः संस्कृते अनुवादाभ्याससम्पादनम्।

**गुणाः**- विचारशक्तेः जागरणं मुख्यं भवति। मनोवैज्ञानिकी पद्धतिः इयम्। बालानां प्रौढानां च लाभाय भवति। स्वल्पे समये संस्कृतस्य सरलतया अध्ययनं भवति। आङ्ग्लभाषाज्ञानयुक्ताः बालकाः अल्पसमये स्वाध्यायेन च संस्कृतस्य सामान्यज्ञानं प्राप्नुवन्ति। अध्ययनसमये पाणिनीय-सूत्राणि विनापि स्पष्टतया सिद्धरूपाणि ज्ञातुं शक्नुमः। व्याकरणस्य अनुवादस्य च अभ्यासेन भाषा स्वाधीना भवति। गुरोः सहायतां विनापि पठितुं शक्नुमः।

**दोषाः**- व्याकरणस्य अनुवादस्य च महत्त्वमस्ति न तु भाषायाः। इयं पद्धतिः निरसास्ति। श्रवणभाषणकौशलयोः अवकाशः नास्ति। गद्य-पद्यरूपकनिबन्धादीनाम् अभावे भाषायाः वास्तविकं स्वरूपं न ज्ञायते। शब्दसौन्दर्यस्य अर्थचमत्कारस्य रसानुभूतेः च स्थानं नास्ति।

**पाठ्यपुस्तकविधिः–**

पाठ्यपुस्तकं पठनस्य मुख्यं साधनं जातम्। अत्र शिक्षकच्छात्रयोरपि सौविध्यं भवति। पाठ्यपुस्तकं सरलं सुलभं मनोरञ्जकं च भवेत्। पुस्तकाध्ययनेन नियमितता जायते। अनुवाचनाय आदर्शवाचनाय च पुस्तकम् आवश्यकं भवति।

**उद्देश्यानि–**

अध्यापकस्य अनुपस्थितौ अपि विषयग्रहणं शक्यते। क्रमशः विषयाणाम् अध्ययनेन क्षमतोत्पादनं भवति। उच्चकक्षासु संस्कृतसाहित्यस्य परिचयप्रदानम्। छात्रेषु जिज्ञासायाः सक्रियतायाः च उत्पादनम्।

**गुणाः** - पाठ्यपुस्तकम् अनुभविनः जनाः लिखन्ति,अतः अध्यापकानां सौविध्यं भवति। पुस्तकेषु अभ्यासकार्यमपि भवति तेन छात्राणां विकासः जायते। कक्षायाम् अनुपस्थिताः छात्राः अपि पुस्तकस्य सहयोगेन अभ्यासं कर्तुं शक्नुवन्ति। अनया पद्धत्या छात्राणाम् उच्चारणसौष्ठवं वाचनकौशलं च उत्पद्यते। शीघ्रवाचनस्य अर्थग्रहणस्य च अभ्यासः भवति। सर्वेऽपि महत्त्वपूर्णांशाः पुस्तके एव लभन्ते। पुस्तकेषु विषयाः छात्राणां भौतिक-जीवनसम्बन्धिनः भवन्ति। ये छात्राः स्वाध्यायं कुर्वन्ति तेषां कृते एषा पद्धतिः उपयुक्तास्ति। शब्दावलीनां ग्रहणं पुनः स्मरणं च सुकरं भवति।

**दोषाः**- अध्यापकस्य आलोचनाशक्तिः लुप्ता भवति। पाठस्य सन्दर्भं ज्ञातुम् अवकाशः नास्ति। पाठतः पाठ्यपुस्तकमस्ति इति कारणेन छात्राः सहजतया कक्षां त्यजन्ति।

**प्रत्यक्षविधिः–**

अयं वैदेशिकः अस्ति। भाषा भाषामाध्यमेन एव पाठनीया। श्रवणकौशलविकासाय आवश्यकः। शीघ्रतया बोधनम् अनेन जायते।

**उद्देश्यानि**– शिक्षणे प्रभावोत्पादकतायाः सम्पादनम्। छात्रेषु अभिरुचेः उत्पादनम्। भाषाकौशले नैपुण्योत्पादनम्। भाषायाः सहजसौन्दर्योत्पादने दक्षतोत्पादनम्। यथार्थज्ञानस्य सम्पादनम्। कक्षायां संस्कृतपरिवेशस्य निर्माणम्। संस्कृतभाषाशिक्षणाय चतुर्णां कौशलानां विकासः।

**गुणाः** सिद्धान्तानुकूलास्ति इयं पद्धतिः। अनया पद्धत्या यथार्थज्ञानं सम्पादयितुं शक्यते। अनुवादपद्धत्याः अपेक्षया अनया भाषाधिगमः शीघ्रं जायते। अनया संस्कृतस्य पूर्वतनवैभवम् आनेतुं शक्नुमः। अनया छात्राः व्यवहारकुशलाः भवन्ति। पठने, लेखने, भाषणे च पर्याप्तावसरान् लभन्ते। छात्राः सस्कृतभाषायाः व्यवहारस्वरूपं व्याकरणं च जानन्ति। छात्राणां संस्कृतस्य शुद्धोच्चारणस्य सामर्थ्यं समुत्पद्यते।

**दोषाः**– प्राथमिकस्तरे एषा नोपयुक्ता। बुद्धिमतां छात्राणां कृते एव उपयुक्ता। अध्यापकानां छात्राणां च कृते कठिना इयं पद्धतिः। दृश्यश्रव्योप-करणानां भावे अध्यापनं निरसं निष्क्रियञ्च भवति। विस्तृतव्याकरणस्य अनेके नियमाः स्पष्टीकर्तुं न शक्यन्ते।

## समन्वयपद्धतिः–

अस्याः अपरं नाम भवति समाहारपद्धतिः। सर्वासां पद्धतीनां समन्वयरूपमेव समाहारपद्धतिः। विषयाणाम् उपस्थितिकरणं पाठनं च भवितुमर्हति। योजनानुगुणमेव अधिगमः भवितुमर्हति।

## उद्देश्यानि–

भाषाशिक्षणं सिद्धान्तानुसारेण मनोवैज्ञानिकप्रक्रियया च। शब्दभण्डार-रचना-अनुवाद-व्याकरण-गद्य-पद्य-रूपकादीनां शुद्धोच्चारण-पुरस्सरं ज्ञानार्जनमेव संस्कृतशिक्षणम्। ज्ञातांशस्य दृढीकरणाय पुनरावृत्तिहेतुना च गृहकार्यप्रदानम् आवश्यकम्। तुलनात्मकज्ञानसम्पादनम्।

## गुणाः–

- पाठशालाविधितः– नैतिकशिक्षा, चारित्रिकशिक्षा, आध्यात्मिक-शिक्षा च।

- व्याकरणानुवादविधितः– गुरुशिष्यसम्बन्धः, व्याकरणतत्त्वं, अनुवादः, अभिनयः, पर्यायः, तुलना च।
- पाठ्यपुस्तकविधितः– अभ्यासकार्याणि, व्याकरणतत्त्वानि च।
- प्रत्यक्षविधितः– यथार्थज्ञानसम्पादनं वातावरणनिर्माणं व्यवहार-कौशलं च।

उपसंहाररूपेण चिन्तनेन ज्ञायते यत् शिक्षणे तद्विधीनां, शिक्षणोपागमानां सिद्धान्तानां च ज्ञानेन सुस्थिरतया विधीनां प्रयोगसामर्थ्यं समुत्पद्यते इत्येव मनसि निधाय छात्राणां ज्ञानवृद्धिदृशा संक्षेपेण सर्वविधीनां प्रतिपादनयत्नः निहितः अस्ति।

## पञ्चमोऽध्यायः

# संस्कृतशिक्षणे नवाचारः

अयं यः विषयः वर्तते सः बहु आवश्यकः वरीवर्ति यतः शिक्षकस्य पाठावतरणं सम्यक् जायेत तदर्थम् अध्यापनप्रक्रमोऽपि सम्यक् भवेत्। अध्यापनप्रक्रिया अपि उत्तमा जायेत। बौद्धिकक्षेत्रे उत्तमसहायकोपकल्पनं महत्त्वभूतं भवति। तच्च साहाय्यं दृश्यश्रव्योकरणैरेव समुत्पादयितुं शक्यते। दृश्योपकरणे कथाकथनं व्याख्यानं विशदीकरणं नाटकीकरणम् एतत् सर्वमपि उपकरणम् अस्माभिः उपयोक्तुं शक्यते। दृश्योपकरणानां प्रयोगदृष्ट्या यदि पश्यामः तर्हि वयं चिन्तयितुं शक्नुमः इन्द्रियाणाम् आकर्षणम् आधारभूतं तत्त्वं भवति। यदि अस्माकम् इन्द्रियाणि आकृष्टानि भवन्ति तर्हि अधिगमस्तरः अपि विवर्धमानः भवति। तत्र इन्द्रियाणि सर्वाणि विषयं प्रति आकृष्टानि चेत् विषयकेन्द्रितम् अवधानम् अस्माकं जायते। तदाधारेण अस्माकं विचारश्रेणी वर्धते। मानवः वैविध्यपूर्णदृष्टिसमवलम्बितः भवति। तत्र तस्य मनोनुकूल-वातावरणं वैविध्यपूर्णवातावरणे निर्मिते चेत् सः व्यवहारिकतया विषयम् अवगन्तुं शक्नोति। प्रयोगपूर्वकं यदि विषयस्य उपस्थापनं छात्राणां पुरस्तात् क्रियते तर्हि तेषां छात्राणां ज्ञानं सहजतया सरलतया च जायते। छात्राः दृश्योपकरणैः वैविध्यपूर्णवातावरणेन जटिलविषयान् अपि सरलरूपेण अवगन्तुं शक्नुवन्ति। तेषां रुचिरपि उत्पद्यते। तेषाम् अध्यापनक्षेत्रे उत्साहस्यापि वर्धनं भवति। यतः वैविध्यपूर्णता आयाति, रुचिः उत्पद्यते उत्साहश्च छात्राणां दृढः जायते। एकविंशतितमशताब्द्यां कर्गदरहितसमाजे (Paperless society मध्ये) यदि नूतनायामानां प्रयोगपूर्वकं नवाचारेण अध्यापनं विधीयते तर्हि छात्राणां शिक्षणं रुचिकरम् आकर्षकं सुग्राह्यं च करणीयमिति महत्त्वभूतः विषयः भवति। यावन्ति अपि अस्माकं ज्ञानेन्द्रियाणि वर्तन्ते तावन्ति सर्वाणि ज्ञानेन्द्रियाणि यदा सक्रियाणि जायन्ते तदा अधिगमः अधिकः स्थायीभवति। UNCEF इत्यस्याधारेण वयं कथं जानीमः यदि वयं

विचारयामः तर्हि एकप्रतिशतं विषयः आस्वाद्य ज्ञायते, प्रतिशतद्वयं विषयः स्पृष्ट्वा ज्ञायते प्रतिशतत्रयं विषयः ध्यात्वा एकादशप्रतिशतं विषयः श्रुत्वा ज्ञायते त्रयस्त्रिंशत्प्रतिशतं विषयं वयं दृष्ट्वा अवगन्तुं शक्नुमः। एवमेव वयं कथं विषयं स्मरामः इति यदि चिन्तयामः तर्हि दशप्रतिशतं विषयः अस्माभिः पठित्वा अवगम्यते। विंशतिप्रतिशतं विषयः अस्माभिः श्रुत्वा स्मर्यते। त्रिंशत्प्रतिशतं विषयः अस्माभिः दृष्ट्वा स्मर्यते। पञ्चाशत्प्रतिशतं विषयः अस्माभिः दृष्ट्वा श्रुत्वा च अवगम्यते। त्रिंशत्प्रतिशतं विषयः अस्माभिः कथयित्वा अवगम्यते। एवं नवतिप्रतिशतं विषयं जनाः कथयित्वा श्रुत्वा च अवगच्छन्ति। अतः वयम् अवगच्छामः दृश्यश्रव्योपकरणानां प्रयोगः महीयान् अध्यापने अपेक्षितः वर्तते। यदि दृश्यश्रव्योपकरणानां प्रयोगपूर्वकं वयं विषयान् अधिगमयामः तर्हि छात्राणां सहजतया विषयबोधः भवति। छात्राः सरलतया विषयम् अवगन्तुं शक्नुवन्ति। **थामस्.एस. रिस्क**-महोदयः कथयति ज्ञानेन्द्रियानुभवेनैव कस्यापि वस्तुनः कस्याः अपि क्रियायाः मानसिकचिन्तनस्य च निर्माणं भवति। अस्य चिन्तनस्याधारेण एव तत्सम्बन्धिनः प्रत्ययाः निर्मिताः भवन्ति। अतः शिक्षणे ज्ञानस्य प्रत्यक्षीकरणाय मूर्ततासंपादनाय च एतादृशानां शिक्षणोपकरणानां महत्ता स्वयमेव सिद्धा भवति। एतन्माध्यमेन वस्तुनः क्रियायाः भावस्य विचारस्य विम्बग्रहणं संभवेत्। एतेन वयं ज्ञातुं शक्नुमः यत् यदा दृश्यश्रव्योपकरणानां माध्यमेन विषयान् बोधयामः तदा भावस्य विचारस्य च विम्बग्रहणं छात्राणां मनस्सु जायते येन छात्राः शीघ्रतया विषयम् अधिगन्तुं सामर्थ्यं सन्धारयन्ति। तेषां विषयाधिगमः अपि शीघ्रतया भवति। ते सर्वमपि विषयं पूर्णरूपेण आत्मसात्कुर्वन्ति।

दृश्यश्रव्यसाधनानि स्थौल्यात् सूक्ष्मतां प्रति गच्छतां छात्राणां ज्ञानं परिपोषयन्ति। एतैः सूक्ष्मातिसूक्ष्मज्ञानमपि सुदृढं भवति। अनेन संस्कृतशिक्षणं रुचिकरं जायते। वैदिकशिक्षापद्धतौ तालपत्रादिषु वेदीनिर्माणादीनि कार्याणि आदिकाले आचर्यन्ते स्म। तैः कार्यैः दृश्यश्रव्योपकरणानां प्रयोगदृष्टिः एव आरम्भे आसीत् इति भावः समुत्पद्यते। द्विपञ्चाशदुत्तरनवदशशततमे वर्षे दृश्यश्रव्यशिक्षायाः राष्ट्रियपरिषदः स्थापना अभूत्। अनया परिषदा समुद्घोषितं

यत् दृश्यश्रव्योपकरणैः अध्यापनं करणीयम् इति। एवञ्च एकोनषष्ट्युत्तर-नवदश- शततमवर्षतः त्रिषष्ट्युत्तरनवदशशततमपर्यन्तं दृश्यश्रव्यशिक्षायाः राष्ट्रियपरिषदः चतस्रः कार्यगोष्ठ्यः विद्यालये आधिक्येन दृश्यश्रव्योपकरणानाम् उपयोगः जायेत तदर्थं समाचरितः। दृश्यश्रव्योपकरणानि वयं चतुर्धा विभक्तुं शक्नुमः। प्रथममस्ति पारम्परिकदृश्यश्रव्योपकरणानि द्वितीयमस्ति शैक्षिक-प्राविधिक्याः उपागमाधारेण दृश्यश्रव्योपकरणानि तृतीयमस्ति इन्द्रियाणाम् अपेक्षाधारेण दृश्यश्रव्योपकरणानि चतुर्थमस्ति क्रियात्मकानि दृश्यश्रव्योप-करणानि इति। एतद्वयमेकवारं चिन्तयामः। सर्वादौ वर्गीकरणे अस्ति परम्परागतदृश्य-श्रव्योपकरणानि। तत्र वयं त्रिधा विभागं कर्तुं शक्नुमः। श्यामपट्टः,पाठ्यपुस्तकानि, सजीवपदार्थश्च इति एतानि दृश्यश्रव्योपकरणानि परम्परागतदृश्यश्रव्योपकरणानि उच्यन्ते येषां दृश्यश्रव्योपकरणानां प्रयोगः आरम्भकालादेव अस्माकं पाठनपरम्परायां क्रियमाणः वर्तते। द्वितीयमस्ति शैक्षिकप्राविधिक्याः उपागमाधारेण दृश्यश्रव्योपकरणानाम् उपयोगः। तत्र भागद्वयं वयं कर्तुं शक्नुमः। एकमस्ति सूक्ष्ममृदूपागमः द्वितीयमस्ति स्थूलोपागमः। सूक्ष्मोपागमे समाचारः पत्रिका शैक्षिकक्रीडाः आकर्षकपत्राणि फ्लैसपत्राणि च इत्यादीनि पत्राणि अस्माभिः स्वीकर्तुं शक्यन्ते। द्वितीयमस्ति स्थूलोपागमः। तत्रास्ति दूरदर्शनं ध्वनिग्राहकयन्त्रं शिक्षणयन्त्राणि। एतानि शिक्षणयन्त्राणि वयं द्विधा विभक्तुं शक्नुमः। प्रथममस्ति प्रक्षेपितोकरणानि द्वितीयमस्ति अप्रक्षेपितोकरणानि। प्रक्षेपितोकरणानि एतस्य अन्तर्गते चलचित्राणि खण्डचलच्चित्रं (film) चित्रपत्राणि विसर्पणिकाः इत्यादयः। अप्रक्षेपितो-करणानि इत्यत्र वयं त्रिधा विभागं कर्तुं शक्नुमः। प्रथममस्ति वाचिकसाधनानि। द्वितीयमस्ति प्रतीकात्मकसाधनानि। तृतीयमस्ति प्रदर्शनपट्टः। वाचिकसाधनानि इत्यत्र उदाहरणानि कथाः च वयं चिन्तयितुं शक्नुमः। प्रतिकात्मकसाधनेषु पत्रं रेखाचित्रं रेखाकृतिः चित्राणि मानचित्राणि छायाचित्राणि व्यङ्गचित्राणि आकर्षकपत्राणि फ्लैसपत्रादीनि प्रतीकात्मकसाधनेषु अन्तर्भूतानि भवितुमर्हन्ति। तृतीयमस्ति प्रदर्शनपट्टः इत्यत्र श्यामपट्टः विज्ञप्तिपट्टः चित्रलेखनफलकं मैग्नेटिकपट्टः कीलकपट्टः इत्यादयः अत्र अन्तर्भूताः भवन्ति। अत्र अप्रक्षेपितोपकरणेषु अन्येऽपि भागाः भवितुं शक्नुवन्ति। ते भवन्ति

त्रियामिसाधनानि दृश्यश्रव्यसाधनानि क्रियात्मकसाधनानि। त्रियामिसाधनानि वास्तविकपदार्था: प्रतिकृति: काष्ठपुत्तलिका: भवितुम् अर्हन्ति। द्वितीयमस्ति श्रव्यसाधनानि आकाशवाणी ध्वन्यभिलेख: ध्वनिग्राहकयन्त्रं सीतावाद्यं भाषापञ्जिका च। दृश्यश्रव्यसाधनेषु दूरदर्शनम् अभिनयश्च। क्रियात्मकसाधनेषु अभिनय: प्रयोग: शैक्षिकभ्रमणं संगणकाधारितं शिक्षणं च अस्माभि: अनुमातुं शक्यते। अत्र अस्माभि: पूर्वपठितेषु दृश्यश्रव्योकरणानां वर्गीकरणे तृतीयमस्ति प्रयोगस्याधारेण दृश्यश्रव्योकरणम्। वयम् एतद् भागद्वये विभक्तुं शक्नुम:। दृश्यश्रव्योपसाधनानि द्वितीयमस्ति क्रियात्मकसाधनानि तृतीयमस्ति दृश्यश्रव्यसाधनानि च। दृश्यसाधनेषु वयं भागद्वयं कर्तुं शक्नुम:। सामान्य-साधनानि यान्त्रिकसाधनानि च। सामान्यसाधनेषु श्यामपट्ट: चित्राणि मानचित्राणि रेखाचित्राणि फलकं प्रतिकृति: भित्तिपत्रं पत्र-पत्रिका: पाठ्यपुस्तकं संग्रहालयश्च इत्येतत् सर्वम्। अन्यानि अपि भवितुमर्हन्ति तानि अपि स्वीकर्तुं शक्नुम: सामान्यसाधनेषु। अत्रैव दृश्यसाधनेषु यान्त्रिकसाधनेषु वयं चित्रविस्तारकयन्त्रं प्रक्षेपकयन्त्रम्। अत्र पुन: प्रक्षेपितयन्त्रेषु उन्नतशीर्ष-प्रक्षेपिका (overhead projector) एवञ्च film striped Projector आकृतिविस्तारकयन्त्रं च। Stereoscope इत्यादीनि वयमत्र यान्त्रिकसाधनेषु इन्द्रियप्रयोगाधारेण दृश्यश्रव्येषु स्वीकर्तुं शक्नुम:। श्रव्यसाधनेषु आकाशवाणी वर्तुलकारध्वनिग्राहक: ग्रामोफोन् ध्वन्यभिलेख: सीतावाद्यं भाषापञ्जिका भाषाप्रयोगशाला दूरस्थशिक्षणं दूरस्थसम्मेलनं च स्वीकर्तुं शक्यते। तृतीयं दृश्यश्रव्यसाधनेषु दूरदर्शनं श्रव्यदृश्याभिलेख: अभिनय: चलचित्रं संगणक: भाषाप्रयोगशाला च स्वीकर्तुं शक्यते। एतेषां प्रयोगमाध्यमेन इन्द्रियाणां प्रयोगपुरस्सरं दृश्यश्रव्योपकरणै: वयं सहजतया संस्कृतपाठने रुचिम् उत्पादयितुं शक्नुम:। एवं च सहजतया संस्कृतबोधने एकां प्रवृत्तिं छात्रेषु जनयितुं शक्नुम:। सम्पूर्णवातावरणे एकं सहजभावमपि समुत्पादयितुं शक्नुम:।

दृश्यश्रव्योकरणानां वर्गीकरणसन्दर्भे अस्माभि: चतुर्धा विभाग: कृत: आसीत्। क्रियात्मकम् अन्यानि च सहायकोपकरणानि। अत्र वयं बाहुल्येन शैक्षिकभ्रमणं विद्यालयप्रदर्शनीम् अभिनयं पत्र-पत्रिका: च स्वीकर्तुं शक्नुम:। एतेषां माध्यमेन वयं छात्राणां सहजबोधं कारयितुं शक्नुम:। सहजतया

छात्राणां ज्ञानमपि प्रवर्धयितुं शक्नुमः। एतदाधारेण वयं छात्राणां बहु ज्ञानं सम्वर्धयितुं प्रभवेम। छात्राः एतैः दृश्यश्रव्योपकरणैः रुचिपूर्णरूपेण सहजतया बोधगम्यरूपेण आकर्षकतया सक्रियतया च विषयम् अवगन्तुं शक्ष्यन्ति।

## ई–अधिगमः संगणकश्च

अनन्तरं च वर्तते ई–अधिगमः संगणकश्च। अत्र वयं विचारयामः ई. अधिगमः इति किम्? अत्र संगणकाधारितं निर्देशनं संगणकप्रबन्धित–निर्देशनम् इति एतत् उच्यते ई.अधिगमः संगणकश्च। शैक्षिकप्रविध्याः केन्द्रम् एतद् वर्तते मन्दबुद्धिबालानां कृते बहुमाध्यमसंगणककार्यक्रमं प्राकटयत्। एतत् माध्यमेन अन्तर्जालप्रणाली a window to global international super highway विश्वस्य सूचनानां वृहत्कोषः कश्चन वर्तते। अत्र मुख्याः ये बिन्दवः अपेक्षिताः वर्तन्ते ते सन्ति तीव्रगत्या प्रेषणं (data) इलेक्ट्रॉनिकसमाचारपत्रपठनं केनापि सह विश्वे वार्त्तालापं विवधपुस्तकालयैः सह संपर्कसाधनं मित्रैः सह संपर्कम् एतत् अन्तर्जाल–प्रणालीद्वारा ई–अधिगममाध्यमेन वयम् एतत् सर्वं कर्तुं शक्नुमः। पुनश्च वर्तते इलैक्ट्रोनिकसम्पेषणम्। (म्–mail) एतदस्ति चतुर्नवत्युत्तरनवशततमे वर्षे विकशितं सबहुभाषितं शब्दसाधनं (word processor leap) इति एतद् वर्तते। ई–सम्प्रेषणमाध्यमेनापि वयम् अध्ययनस्य आदानं प्रदानं कर्तुं शक्नुमः। अनन्तरमस्ति अर्नेट्–सेवा। एतद् वर्तते education and research network। एतद् द्वारा वयं शिक्षणे एकं नूतनं साहाय्यं समुत्पादयितुं शक्नुमः। एकशतं corporate companies अस्मिन् सन्दर्भे कार्यं विदधानाः वर्तन्ते। द्वयधिकशतं शैक्षिकसंस्थाः इदानीं स्वीयं योगदानं ददत्यः सन्ति। अनन्तरं वर्तते huge net सेवा। इयं सामूहिकचर्चायाः कृते वर्तते। एतदाधारेण संगणकयन्त्रस्यअन्ययन्त्रस्य एकदूरवाणीयन्त्रस्य च आवश्यकता भवति। तदाधारेण वयं huge net सेवामाध्यमेन अपि अधिगमं प्रसारयितुं वर्धयितुं च शक्नुमः। अनन्तरमस्ति world wide WebA VVC संस्थासंगणके कतिपयानां कार्यक्रमाणां निर्माणम् अभवत्। तत्र छात्रसम्बद्धप्रतिमानं भाषाविषये नियमाः अभ्यासाश्च। एवं शिक्षणसम्बद्धं प्रतिमानं तत्र विधयः के उपयोक्तुं शक्यन्ते इत्यादीनाम् आधारेणापि वयं प्रविधिं वर्धयितुं शक्नुमः। एतेन

ई–अधिगममाध्यमेन छात्राणां सहजतया बोध: कारयितुं शक्यते। इदानीम् अस्मिन् करोनाविकटकाले एका अध्ययनप्रणाली नूतनं नाम आनलाइन–पाठनस्य केचन अन्येऽपि आयामा: समुत्पादिता: वर्तन्ते। यद्यपि तेषां पूर्वमपि प्रयोग: आसीत्। किन्तु साम्प्रतिककाले तेषाम् आयामानां प्रयोग: दरीदृश्यते। ते वर्तन्ते इदानीं नवाचाररूपेण गुगलमिट्माध्यमेन शतस्य छात्राणां व्यवस्थिततया अध्ययनम् अध्यापनं सम्पाठनं सम्बोधनं च कर्तुं शक्यते। तत्र presentation अपि वयम् उपस्थापयितुं शक्नुम:। Recording कृत्वा अपि वयं छात्रेभ्य: दातुं शक्नुम:। वैयक्तिकं विषयं प्रापयितुं शक्नुम:। तेन छात्रस्य स्वीयम् आत्मबलं विकासयितुं शक्नुम:। अपरमपि अस्ति zoom app इति। वयं zoom app द्वारा छात्रान् बोधयितुं शक्नुम:। गृहे स्थित्वा सम्पूर्णप्रकरणं छात्राणां कृते उपस्थापयितुं शक्नुम:। इदानीम् एकं बहु महत्त्वपूर्णं संसाधनं प्रवर्तते। तच्च वर्तते YouTube इति। YouTube माध्यमेनापि संस्कृतक्षेत्रे संस्कृतच्छात्रै: बहु: अधिगम: करणीय:। अनेन माध्यमेनापि संस्कृतविषया: जने जने गेहे गेहे च प्रसारणीया: येन एतेषां विषयाणां समाजोपयोगिता स्यात्। सामाजिकजना: सरलतया बोधगम्यरीत्या सर्वम् अवगन्तुं शक्नुयु:। एतेन वयम् अवगन्तुं शक्नुम: यत् दृश्यश्रव्योप–करणानां महती संस्कृतप्रचारदृष्ट्या आवश्यकता वर्तते। रुचिकरणसम्पादनाय अपि जटिलविषयं सरलीकर्तुं तत्त्वानि सहजतया बोधयितुं च महती आवश्यकता अस्मिन् काले दरीदृश्यते। अत: उपसंहाररूपेण मनोरञ्जक–वातावरणे छात्राणां बोधनं गृहे स्थित्वा करणीयम्। तर्हि meet zoom YouTube इत्यादिभि: विविधै: संसाधनै: छात्राणां बोधनपूर्वकम् एवं तत्र संस्कृतविषया: उपस्थापनीया: येन लक्षश: कोटिश: जना: सहजतया संस्कृतविषयान् अवगन्तुं प्रभवेयु:।

## षष्ठोऽध्यायः

# भाषागतसामान्यदोषाः निवारणोपायाश्च

भाषा अभिव्यक्तेः साधनं वर्तते इति तु सर्वैः अङ्गीक्रियते यतोहि भाषां विना व्यवहारः अशक्यः। व्यवहाराय भाषाज्ञानं परम् अपेक्षितम्। यावत् पर्यन्तं दृढा, शुद्धा, सरला, प्रवाहपूर्णा, बोधगम्या व्यवधानरहिता च भाषा नास्ति तावत् पर्यन्तं विषयज्ञाने सत्यपि व्यवहारः असम्भवःअर्थावबोधनार्थं शुद्धा भाषा भवेत् नो चेत् कदाचित् अर्थस्य अनर्थः अपि सम्भाव्यते। संस्कृतभाषा तु देवभाषा, अन. भाषया भाषणेन देवलोकस्य वासफलं प्राप्नुवन्ति मानवाः, उक्तमपि– **'एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः, स्वर्गे लोके च कामधुक् भवति।'** संस्कृतभाषया भाषणसमये केचन सामान्याः दोषाः भवन्ति तेषां परिष्कारः किञ्चित् अवधानेन सम्भाव्यते।

**भाषागतसामान्यदोषाः**

- अन्वयगतदोषाः।
- विशेष्यविशेषणभावगतदोषाः।
- कर्मपदगतदोषाः।
- विभक्तिगतदोषाः।
- सङ्ख्यागतदोषाः।
- तमङ्ङ्ट्प्रत्ययगतदोषाः।
- क्त्वाप्रत्ययगतदोषाः।
- लकारगतदोषाः।

**अन्वयगतदोषः**– प्रयोक्ता यदा अन्वयविषये अवधानं न करोति तदा अयं दोषः सम्भाव्यते। वाक्यस्य उच्चारणादौ प्रयोक्ता कर्तृपदं प्रयुक्तवान्

तथा च अन्ते क्रियापदं, परं तस्य कर्तृपदस्य क्रियापदेन सह अन्वयः नास्ति यतो हि कर्तृपदं प्रथमपुरुषस्य अस्ति क्रियापदंतु मध्यमपुरुषस्य। यथा अस्माकं नियमः अस्ति। सः इति कर्तृपदस्य क्रियापदं प्रथमपुरुषस्य एकवचनं वर्तते। तर्हि स अन्वयं स्मरन् सर्वदा एकवचनम् एव प्रयोक्ष्यति। अतः अन्वयस्य ज्ञानं पौनः पुन्येन प्रयोगेण एव स्पष्टं भवति।

**उदाहरणम्**– 'सः विद्यालयं गच्छसि' इत्यस्मिन् उदाहरणे गच्छसि इति क्रियापदं मध्यमपुरुषैकवचनस्य अस्ति अतः अन्वयाभावः विद्यते येन ज्ञायते एतादृशाः दोषाः सामान्येन भवन्ति एव।

निवारणोपायः– एतादृशस्य दोषस्य निवारणाय पौनःपुन्येव अन्वयविषये अवधानं कर्तव्यम् इति तु अभ्यासेन एव सम्भवति।

यथा–

1. छात्रः पुस्तकं पठति।
2. विद्यार्थी विद्यालयं गच्छति।
3. बालिका भोजनं करोति।
4. शिक्षकः विषयं बोधयति।

उपरिलिखितेषु वाक्येषु प्रथमपुरुषस्य क्रियापदस्य च अभ्यासः विद्यते एवम् अभ्यासः यदा पूर्णरूपेण दृढः भवेत् तदनन्तरम् अन्येषु वचनेषु अन्येषु पुरुषेषु च प्रयोगः कर्तव्यः। यस्माद् अन्वयगतदोषस्य निवारणं भवेदिति।

**कर्मपदगतदोषाः**– प्रायशः जनाः संस्कृतप्रयोगसमये क्रियापदं, कर्तृपदं, कर्मपदं च प्रयुञ्जते परन्तु कर्मपदे उक्तां द्वितीयां विभक्तिं नैव प्रयुञ्जते येन कर्मपदगतदोषः अनावश्यकतया जायमानः अवलोक्यते यथा–

अहं विद्यालयः गच्छामि इति वाक्यं वस्तुतः एकदोषं विहाय शुद्धम् एव सः अपि दोषः सामान्यः। द्वितीयाविभक्तेः अभावगतदोषः तन्नाम विद्यालयपदे द्वितीयाविभक्तिः भवेत् कर्मपदत्वात्, द्वितीयायाः अभावः अतः तद्दोषः। कर्मगतदोषस्य निवारणाय अभ्यासः एव साधनीभूतः, अभ्यासेन एव परिमार्ष्टुं योग्यः दोषः। तद् यथा–

1. छात्राः विद्यालयं गच्छन्ति। (विद्यालयः)
2. विद्वान् बालं पश्यति। (बालः)
3. महिला बालं लालयति। (बालः)
4. अभियन्ता मां पश्यति। (अस्मद्)
5. शिक्षिका छात्रं पाठयति। (छात्रः)

उपरिलिखितेषु अभ्यासवाक्येषु सर्वत्रापि द्वितीया विभक्तिः प्रयुक्ता अस्ति, कोष्ठके लिखितेषु शब्देषु प्रथमा वर्तते। कोष्ठके विद्यमानाः शब्दाः एव यदा वाक्ये कर्मत्वेन प्रयोज्यन्ते तदा ते एव शब्दाः द्वितीयाविभक्तियुक्ताः भवन्ति इति अभ्यस्य प्रयोगे परिवर्तनम् आनेतव्यम्। परन्तु कर्मणि प्रयोगसमये कर्मपदे प्रथमा एव भवति इति विशेषनियमः अवगन्तव्यः।

**विभक्तिगतदोषाः**– अयं दोषः प्रायशः बहुभिः कारणैः भवति यथा एकं कारणं वर्तते कण्ठस्थीकरणस्य अभावः। यदा ज्ञानस्य अभावः भवति यथा नमः इति पदयोगे का विभक्तिः भवति इत्यस्य ज्ञानाभावे तदा विभक्तिगतदोषः सम्भवति। तथा च रूपाणां तन्नामशब्दानां ज्ञानाभावेऽपि एतस्यदोषस्य सम्भावना वरीवर्ति। एतस्य दोषस्य निवारणाय कारकज्ञानम् अपेक्षितम्। तत्तु अल्पपरिश्रमेण कर्तुम् अशक्यम्। द्वितीयरूपाणां ज्ञानम् अपि अपेक्षितम्। यावत् पर्यन्तं रूपाणां ज्ञानं सम्यक्तया न भवति तावत्भिन्नभिन्नविभक्तीनां प्रयोगकरणे कष्टम् एव भवति। अतः रूपाणां पौनःपुन्येन पारायणं, रटनम्, अभ्यासः, प्रयोगश्च विधातव्यः।

**सङ्ख्यागतदोषाः**– सङ्ख्यागतदोषाः द्विधा भवन्ति। सङ्ख्यागत-दोषाः विशेषणगतदोषाः सङ्ख्यारूपगतदोषाः। विशेषणगतदोषः, सङ्ख्यारूप-गतदोषः इति प्रकारद्वयस्य दोषस्य कारणं केवलम् अभ्यासस्य अभावः एव अवलोक्यते।

ज्ञानाभावात् अपि प्रायशः एवं प्रकारकाः दोषाः जायन्ते। तेषां निवारणोपायाः। सङ्ख्यागतदोषाणां निवारणस्य मार्गद्वयं वर्तते एकः मार्गः अस्ति विषयज्ञानं तन्नाम चत्वारिपर्यन्तं लिङ्गभेदः भवति परन्तु ततः परं

सर्वत्रापि नाम नवदशपर्यन्तं समानता भवति, परन्तु विंशत्याः परं सर्वत्रापि एकवचनं भवति, बहुवचनस्य विशेषणतायां सत्याम् अपि।

एतेन अवगमनपुरस्सरेण सङ्ख्यागतदोषाणां निवारणं सम्भवति। द्वितीयः उपायः विद्यते अभ्यासः पौनःपुन्येन उक्त्वा अपि एतस्य दोषस्य निराकरणं सम्भवति।

**उदाहरणानि–**

लिङ्गभेदः अपरिवर्तनं च–अवधानेन अवलोक्यताम्।

- एकः बालकः, एका बालिका, एकं पत्रम्।
- द्वौ बालकौ, द्वे बालिके, द्वे पत्रे।
- त्रयः बालकाः, तिस्रः बालिकाः, त्रीणि फलानि।
- चत्वारः बालकाः, चतस्रः बालिकाः, चत्वारि फलानि अधोलिखितेषु वाक्येषु लिङ्गभेदः नास्ति। परन्तु बहुवचनम् अस्ति।
- पञ्च बालकाः, पञ्च बालिकाः, पञ्च फलानि।
- नवदश बालकाः, नवदश बालिकाः, नवदश फलानि।

अधोलिखितेषु वाक्येषु सर्वदा स्त्रीलिङ्गम् एकवचनं च भवति।

- विंशतिः बालकाः, विंशतिः बालिकाः, विंशतिः फलानि।

**तमड्–डट्–प्रत्ययगतदोषाः**– अनयोः प्रत्यययोः सम्बद्धाः दोषा सामान्येन अवधानकारणेन च जायमानाः भवन्ति। यथा प्रायशः जनैः उच्चार्यते **'विंशतौ गमिष्यामि'** इत्यत्र विंशतिपदं सङ्ख्यावाचकं न विद्यते तत्पदं तु अत्रसङ्ख्येयवाचकं विद्यते सङ्ख्येयवाचकत्वात् तत्र तमड्प्रत्ययः उत् डट्प्रत्ययः भविष्यति। अनयोः प्रत्यययोः अभावे वाक्ये दोषः स्थास्यति एव। तत्र प्रयोगः भविष्यति विंशतितमे दिनाङ्के आगमिष्यामि। (तमड्प्रत्ययः विंशे दिनाङ्के आगमिष्यामि। (डट्प्रत्ययः)

उपरिलिखितयोः वाक्ययोः एकस्मिन् वाक्ये तमट्प्रत्ययस्य प्रयोगः विद्यते तथा च द्वितीये वाक्ये डट्प्रत्ययः वर्तते।

ज्ञानपुरस्सरं प्रयोगेण अवधानेन च सङ्ख्यागतदोषाणां सर्वप्रकारेण समाधानं कर्तुं शक्यते।

**क्त्वाप्रत्ययगतदोषाः**:– क्त्वाप्रत्ययः यत्र भवति तत्र समानविभक्ति–कत्वं भवति इति ज्ञानाभावत्वात् क्त्वाप्रत्ययप्रयोग– गतदोषाः जायमानाः दृश्यन्ते यथा वाक्यम् अस्ति **'त्वम् अहं मिलित्वा शरीरं भवति'** इत्यत्र भवति क्रियायाः कर्तृपदं विद्यते **'शरीरम्'**। मिलित्वा इति पदस्य कर्तृपदं **'त्वम् अहं'** च विद्यते। अतः समानकर्तृकत्वं भवेत् इति नियमः विद्यते। एतत् वाक्यं शुद्धं **'तव मम मेलनेन शरीरं भवति'** एवं भविष्यति उत् त्वम् अहं च मिलित्वा शरीरं भवावः इत्यनेन प्रकारेण अवधानेन पौनः पुन्येन अभ्यासेन दोषाः समाप्यन्ते।

**लकारगतदोषाः**:– लकारगतदोषाः तदा भवन्ति यदा विषयम् अनवगत्य जनाः प्रयोगं करोति यत् सः कस्मिन् लकारे वाक्यं प्रयुञ्जानः वर्तते। अतः कालभेदम् अवगत्य एव प्रयोगः करणीयः तथा च भिन्न–भिन्नलकारेषु प्रयोगसामर्थ्यं वर्धनीयं येन दोषाः न भवेयुः इति।

बिन्दुरूपेण केचन निवारणोपायाः

- पौनःपुन्येन अभ्यासः।
- विषयस्य सम्यक्तया अध्ययनम्।
- संस्कृतेन एव व्यवहारः।
- संस्कृतभाषां प्रति श्रद्धा।
- व्याकरणदृष्ट्या प्रयोगकरणे श्रद्धा।
- संस्कृत– पत्रपत्रिकाणाम् अध्ययनम्।
- अनुवादादिकार्याणां करणम्।

**निष्कर्षः**:–

निष्कर्षरूपेण वक्तुं शक्यते अभ्यासःअध्ययनम् इत्युभे एव दोषान् परिहर्तुं शक्नुतः अतः पौनःपुन्येन अभ्यासः अध्ययनं च करणीयम् इति।

## सप्तमोऽध्यायः

# व्याकरणशिक्षणप्रणाल्यः

वस्तुतः प्रमुखं व्यवहारसाधनत्वेन भाषा राराजते। यतोहि भाषा व्यवहारस्य साधनीभूता वर्तते। भाषां शुद्धां परिष्कृतां च कर्तुं व्याकरणस्य आवश्यकता भवति यतोहि विना व्याकरणज्ञानं भाषा शुद्धा न भवति। अतः व्याकरणशिक्षणाधिगमप्रणालीनाम् अपेक्षा अपि दृश्यते। व्याकरणस्य अनेकाः प्रणाल्यः सन्ति परन्तु अत्र काश्चन अर्वाचीनप्रणाल्यः विवेच्यन्ते, सर्वाश्च प्राचीनाः।

**विवेचनीयाः अर्वाचीनप्रणाल्यः-**

1. प्रयोजनप्रणाली
2. अनुवादप्रणाली
3. अनौपचारिकप्रणाली
4. शिबिरप्रणाली
5. सहसम्बन्धप्रणाली

**विवेचनीयाः प्राचीनप्रणाल्यः-**

1. सूत्रप्रणाली
2. टीकाप्रणाली
3. भाष्यप्रणाली
4. अष्टाध्यायीप्रणाली

**प्रणालीनां विस्तरेण विवेचनम् –**

1. **प्रयोजनप्रणाली-** अस्याः प्रणाल्याः प्रवर्तकौ जॉनड्यूवी, तस्य शिष्यः वी.एच. किलपैट्रिकश्च स्तः। प्रयोजनप्रणाली

योजनाप्रणाली इति नाम्ना अपि व्यवह्रियते। इयं प्रणाली बहुकालात् व्यवहारे दृश्यते। व्यावहारिकजीवने समूहगतप्रयत्नैः मूल्यादीनां प्रयासैः च समाधानानां प्राप्तिः एव प्रयोजनप्रणाल्याः लक्ष्यम् अस्ति।

अस्यां प्रणाल्यां छात्रेषु जिज्ञासायाः वृद्धिः क्रियते, भाषायाः अध्ययनाय प्रयासेषु अभ्यासेषु च सम्यक् बलं दीयते। स्वातन्त्र्येण चिन्तनस्य विकासाय अभ्यासेन विविधकौशलानां वृद्धये प्रेरणम्। यथा एकलव्यः धनुर्विद्यायां नैपुण्यप्राप्तये अभ्यासेन एकाग्रतया स्वतन्त्रतया च धनुर्विद्यायाः सम्यक् ज्ञानं प्राप्तवान्, तथैव अस्यां प्रणाल्यां क्रियते। अनेन प्रकारेण अर्जुनः अपि पाशुपतास्त्रप्राप्तये भगवतःश्रीकृष्णस्य मार्गदर्शन प्राप्य कस्मिन् स्थाने किं कुर्याम् इत्यादिविचारान् कृत्वा सफलता प्राप्नोत्।

**प्रयोजनप्रणाल्याः सोपानानि–**

- परिस्थित्युत्पादनम्।
- चयनमुद्देश्य-निर्धारणम्।
- कार्यक्रमनिर्धारणम्।
- कार्यान्वयः।
- मूल्याङ्कनम्।

2. **अनुवादप्रणाली**– यूरोपीयानां कारणेन भारते शिक्षायां महत्परिवर्तनम् आयातम्। व्याकरणं सरलतया पठनीयम् इति विषयं मनसि निधाय श्रीमान् डॉ. सर रामकृष्णगोपाल-भाण्डारकर महोदयः पाश्चात्त्यक्रमम् अनुसृत्य अनुवादप्रणालीम् आरब्धवान्। डॉ. गोपालभाण्डारकरम् आधारीकृत्य बहुभिर्वि-द्विद्भिः अनुवादविधिः स्वीकृतः। अस्यां प्रणाल्याम् आदौ नियमम् आधारीकृत्य व्याकरणांशाः उच्यन्ते। पुनश्च उदाहरणानि मातृभाषया पाठ्यन्ते तदनन्तरम् अभ्यासः कार्यते, अन्ते छात्राः विषयं सम्यक्तया अवगच्छेयुः इत्येतदर्थं प्रयत्नः विधीयते।

**प्रणाल्याः सोपानानि**

- व्याकरणांशः।
- उदाहरणम्।
- अभ्यासः।
- अभीष्टसङ्केतः

**3. अनौपचारिकप्रणाली** – व्यवहारे भाषायाः प्रयोगे च जनः दक्षः भवेत्, परन्तु शुद्धरूपेण प्रयोगं कुर्यात् इत्येतदर्थम् अपेक्षितं व्याकरण। भाषाशिक्षणं व्यवहाराधीनम्। यः सङ्कोचं विहाय सम्यक् भाषते तस्य शीघ्रं गतिः भाषायां भवति। अल्पीयसि वयसि बालाः शुद्धतया मातृभाषया व्यवह्रियन्ते तत्र मुख्यः व्यवहारः यतो हि सः बालः वक्तुं प्रयत्नं करोति। बालाः प्राकृतिकवातावरणे व्यवहारं कृत्वा निर्मुक्तरूपेण भाषां पठन्ति।

**4. शिबिरप्रणाली**– अस्यां प्रणाल्यां छात्राः शिबिरमाध्यमेन बोध्यन्ते अत्र टिप्पणीपुस्तिकायाः पुस्तकानां च आवश्यकता न भवति। छात्राः प्रत्यक्षविधिना पाठ्यन्ते, ते विषयम् अवगन्तुं प्रयत्नं कुर्वन्ति। अस्यां प्रणाल्यां मुख्यत्वेन उपास्थापनस्य विशिष्टं महत्त्वं भवति। उच्यते शिबिरे यदि उपास्थापनं सम्यक् अभवत् तर्हि भाषायाः व्याकरणस्य च ज्ञानं शीघ्रं भविष्यति इति एतस्याः प्रणाल्याः प्रयोगः प्राथम्येन श्रीकृष्णशास्त्रिणा कृतः अनन्तरम् अन्येऽपि गुलामदगरिः रामचन्द्रशर्मा, जनार्दनहेगडे, विश्वासः, सदानन्ददीक्षितादयोऽपि विशेषतः प्रशंसार्हाः एते स्वस्वसंस्थाभिः संस्कृतशिक्षणं शिबिरविधिम् अवलम्ब्यशक्तिमनतिक्रम्य प्रचारं कारयन्ति कुर्वन्ति च। यूनः प्रशिक्षितान् कुर्वन्ति पुनश्च तान् विश्वस्य विविधेषु क्षेत्रेषु प्रेरयन्ति। येन व्याकरणस्य सामान्यांशानाम् अवबोधः अपि छात्राणां भवति।

**शिविरप्रणाल्याः सोपानानि**

- प्रचारः।
- उपस्थापनम्।
- छात्रैः वादनम्।
- अभ्यासः।

- मूल्याङ्कनम्।

**5. सहसम्बन्धप्रणाली** – सहसम्बन्धप्रणाल्यां कश्चन विषयः केन्द्रियः भवति। तदनु तेन सह अन्ये विषयाः अवबोध्यन्ते। एकेन विषयेण सह अन्यस्य विषयस्य योजनं कृत्वा व्याकरणम् अध्याप्यते। सहसम्बन्धप्रणाली मनोवैज्ञानिकी प्रणाली अस्ति। सरला, प्रतिदिनं कक्ष्याध्यापने उपयोक्तुम् अर्हा, विविधविषयाणां ज्ञानप्रदाने सहायिका रुचेः उत्पादिका, विस्तृता, सिद्धान्तानुसारिणी च अस्ति।

**सहसम्बन्धप्रणाल्याः प्रकाराः**

- ऊर्ध्वक्रमसहसम्बन्धः
- तिर्यक्क्रमसहसम्बन्धः
- अधिगमसहसम्बन्धः

व्याकरणाधिगमे इयं प्रणाली नितराम् उपयोगिनी अस्ति, अनया व्याकरणाध्ययनम् अचिरं सम्भवति।

**व्याकरणाध्ययनस्य प्राचीनप्रणाल्यः**

**सूत्रप्रणाली**–व्याकरणाध्ययनस्य इयं प्राचीना प्रणाली विद्यते।अस्यां प्रणाल्यां सूत्रम् उक्त्वा सूत्रस्य बोधः कार्यते तथा च व्याख्या विधीयते। पूर्वम् उदाहरणम् उच्यते ततः परं प्रत्युदाहरणम्, अनुवृत्तिः, अध्याहारः इत्येतद् व्याख्यानं सर्वं सूत्रे एव अन्तर्भवति इति। सूत्रस्य षड्विधानि लक्षणानि प्रतिपादितानि विद्यन्ते

**संज्ञा च परिभाषा च विधिर्नियम एव च।**
**अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते।।**

सूत्रैः एव शब्दाः प्रतिपाद्यन्ते विवेच्यन्ते सूत्राणाम् अभावे शब्दानां प्रतिपादनम् असम्भवम् एव। सूत्रप्रणाल्यां कण्ठस्थीकरणस्य उपरि विशिष्टं बलं प्रदीयते। छात्राः सम्यक्तया कण्ठस्थं कुर्वन्ति। परम्परागतविद्यालयेषु अस्याः एव प्रणाल्याः प्रयोगः प्राचुर्येण क्रियते। अनया प्रणाल्या शास्त्रे पूर्णाधिकारः भवति। अस्यां प्रणाल्यां छात्राणां स्मरणशक्तेः सम्यक् विकासः भवति।

**टीकाप्रणाली** – टीकाप्रणाल्याः एव अपरं नाम स्पष्टीकरणप्रणाली अस्ति। व्याकरणसूत्राणां स्पष्टीकरणार्थं टीकाग्रन्थानां साहाय्यं स्वीक्रियते: टीकाग्रन्थानां माध्यमेन कठिनविषयाः अपि सरलाः स्पष्टाः च भवन्ति। अत:लिखितम् अपि अस्ति टीका गुरूणां गुरुः इति। यथा पाणिनीयपरम्परायाः विकासः पतञ्जलि–कैयट–भर्तृहरि–जयादित्य–वामनादिभिः कृतः। सिद्धान्त–कौमुद्याः लक्ष्म्यादि अनेकाः टीकाः विद्यन्ते। कैयटेन महाभाष्यस्य टीका लिखिता। तस्याः टीकायाः नाम महाभाष्यप्रदीपम् इति वर्तते। भर्तृहरिः अपि महाभाष्यदीपिकायाः वाक्यपदीयस्य च रचनां कृतवान्। टीकाप्रणाल्या मुख्यत्वेन पदानामवबोधः शीघ्रं जायते। समस्यानां समाधानं शीघ्रं भवति। नूतनपदानां मौखिकविषयाणां च प्रतिपादनं भवति। अनया प्रणाल्या भाषिकसंरचनायाः ज्ञानं समुत्पद्यते।

**भाष्यप्रणाली**– टीकाप्रणाली इव इयं प्रणाली वर्तते। अनया प्रणाल्या व्याकरणसूत्राणां विविधप्रकरणेषु निहितानां प्रमुखांशानां व्याख्या प्रस्तूयते। अनया व्याख्ययाऽध्ययनयोग्यानां विषयाणां सन्दर्भे सारल्यं सम्भवति। भाष्यलक्षणम् –

**सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः।**
**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥**
**कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।**
**सर्वेषां न्यायबीजानां महाभाष्ये निबन्धनम्॥**

**अष्टाध्यायीप्रणाली**– व्याकरणाध्ययनस्य इयं प्रणाली नितरां प्राचीना, अस्यां प्रणाल्यां सूत्रक्रमाधारेण छात्राः पाठ्यन्ते स्म। अष्टाध्याय्याः पारायणं, रटनं, व्याख्या, अनुवृत्तिक्रमःच अस्यां प्रणाल्यां सम्यक् ज्ञातव्याः भवन्ति। सूत्राणाम् अर्थक्रमः कथम् अनुसरणीयः इति अस्यां प्रणाल्यां बोध्यते। अस्यां प्रणाल्यां ज्ञानस्य दृढीकरणार्थम् आधिक्येन अवधानं क्रियते। धारणाशक्तिः वर्धेत इत्येतदर्थम् इयं प्रणाली नितरामुपयोगिनी अस्ति।

अनेकाः प्रणाल्यः अर्वाचीनप्राचीनाश्च व्याकरणाध्ययनाय साहाय्यं कुर्वन्ति। एतासां माध्यमेन जनानां ज्ञानं वर्धमानं दृश्यते। केचन प्राचीनविधयः योग्याः इति वदन्ति, केचन अर्वाचीनविधयः योग्याः इति वदन्ति। अधोलिखितप्रकारेण द्वयोः प्रणाल्योः तुलना कर्तुं शक्या।

व्याकरणस्य अर्वाचीनप्राचीनप्रणाल्योः तुलना।

**प्राचीनप्रणाल्याम्–**

1. छात्राः गृहत्यागिनः भवन्ति।
2. गुरुकुलेषु अध्ययनं भवति।
3. व्याख्या अधिका भवति।
4. शिक्षकस्य स्थानं प्रमुखम्।
5. दृश्यश्रव्योपकरणानां प्रयोगः न।
6. स्मरणशक्तेः अधिकं महत्त्वम् अस्ति।
7. सामूहिकशिक्षणं प्रायः भवति।
8. प्रायः मुखामुखी शिक्षणं भवति।
9. रटनस्य नितरां महत्त्वं भवति।

**अर्वाचीनप्रणाल्याम्**

1. छात्राः गृहे एव पठन्ति।
2. महाविद्यालयेषु विश्वविद्यालयेषु अध्ययनं भवति।
3. अभ्यासः अधिकः कार्यते।
4. छात्रस्य स्थानं प्रमुखम्।
5. दृश्यश्रव्योपकरणानां प्रयोगः भवति।
6. वैयक्तिकशिक्षणस्य महत्त्वं भवति।
7. छात्राणां रुचेः महत्त्वं भवति।
8. भौतिकवातावरणस्य महत्त्वम्
9. अवगमनस्य महत्त्वम् अधिकं भवति।

**निष्कर्षः–**

निष्कर्षरूपेण वक्तुं शक्यते प्रणालीनां प्रयोगेण व्याकरणस्य शिक्षणं सरलतया कर्तुं शक्यते। साम्प्रतिके युगे प्रणालीनां प्रयोगः नितराम् अपेक्षितः वर्तते। इदानीं विश्वविद्यालेषु व्याकरणप्रणालीनां विषये चिन्तनं जायमानं विद्यते। यतोहि संस्कृतज्ञानाय व्याकरणबोधः अपेक्षितः अस्ति।

## अष्टमोऽध्यायः

# भाषाधिगमप्रक्रमः

भाषा हि साधनं भावाभिव्यक्तेः। भाषां विना कोऽपि जनः भावाभिव्यक्तिं सहजनतया कर्तुं न शक्नोति। भाषा परिष्कृता शुद्धा, ललिता सर्वग्राह्या च स्यादिति विषयः वर्तते महत्त्वपूर्णः। अत्र चिन्तनीयः विषयः वर्तते यत् भाषायाः प्रयोगः कथं स्यात्, येन सहजतया भाषाप्रयोगकौशलं समुत्पद्येत। यतः भाषाम् आश्रित्य जनाः स्वकीयं व्यवहारं समाजे प्रकटयन्ति। एवन्तु सङ्केतेनापि व्यवहारः जायते किन्तु सः व्यवहार; सहजतया सर्वैनैवागम्यते। भाषायाः सरलतया सहजतया अवगमनाय भाषाकौशलानां क्रमशः परिपालनम् अत्यन्तम् अपेक्षितं विद्यते।

यदि भाषायाः प्रयोगः क्रियेत तर्हि अवश्यं शनैः शनैः सः मार्गः प्रशस्तः भवति। यतः यावत् भाषाश्रवणं नास्ति तावत् भाषणं भवितुं नार्हति। श्रवणभाषणयोः अभावे कदापि पठनं लेखनं च भवितुं नार्हति। सर्वप्रसिद्धं भाषायाः कौशलचतुष्टयं विद्यते। एतेषु चतुर्षु भाषाकौशलेषु प्रयोगसामर्थ्यम् अपेक्षितं विद्यते। तन्निमित्तं दृढतया लक्ष्यपुरस्सरं श्रमः अपेक्षितो भवति। यदि सर्वेषां कौशलानां क्रमशः पालनं विधीयते तर्हि अवश्यं भाषाप्रयोगः कर्तुं शक्यः।

भाषाप्रयोगविज्ञानं नाम भाषायाः प्रयोगः श्रवण-भाषण-पठन-लेखन-कौशलानां प्रयोगसम्बद्धः वर्तते यदि सर्वेऽपि जनाः कौशलक्रमेण भाषायाः अध्ययनं कुर्वन्ति तर्हि भाषायाः चतुर्षु कौशलेषु पूर्णः विकासः जायेत एव।

भाषायाः अनेकाः परिभाषाः विद्यन्ते यासां माध्यमेन भाषाशब्दः स्पष्टतां प्राप्नोति। भारतीयः आचार्यः पतञ्जलिः अकथयत् – येन ध्वनिना पदानाम् अर्थः प्रतीयते, सः ध्वनिः भाषा इति उच्यते। अर्थात्

ध्वनिः एव भाषारूपेण आत्मनः प्रकटीकरणाय महत्त्वपूर्णभूमिकां निवर्हतिइति। भाषामेव स्पष्टीकुर्वन् मङ्गलदेवशास्त्रिवर्यः अभणत्–**भाषा मनुष्याणां सा चेष्टा यया मानवः स्वोच्चारणोपयोगिभिः शरीरावयवैः उच्चारितानां पदानां माध्यमेन स्वविचारान् प्रकटयति** इति।

भाषायाः मुख्यरूपेण आधारद्वयं विद्यते- भौतिकाधारः, मानसिकाधारश्च। यदि भौतिकाधारः मानसिकाधारश्च सुचिन्तितौ न स्तः तर्हि कदापि भाषायाः सुस्थिरं ज्ञानं न भवति। भौतिकाधारो नाम ताल्वादिउच्चारणस्थानानां परिज्ञानेन विद्यते। मानसिकाधारो नाम चिन्तनं विद्यते। उच्चारणस्थाननां चिन्तनस्य च अभावे कदापि प्रयोगविज्ञानं भाषायाः सुस्थिरं भवितुं नार्हति। अतः भाषायाः उत्तमप्रयोगाय विषयद्वयम् आधाररूपेण उच्यते। तयोः ज्ञानं सुतराम् ईहितं विद्यते।

भाषायाः प्रयोगाधारितानि अपि अनेकानि रूपाणि विद्यन्ते। येषां माध्यमेन विशिष्टं परिज्ञानं छात्राणां कृते जायते तानि रूपाणि विद्यन्ते यथा- साहित्यिकी, लौकिकी, वैज्ञानिकी व्यावसायिकी, अपभाषा, साधु, असाधुः च। अनेन क्रमेण भाषायाः अनेकानि रूपाणि विद्यन्ते। साहित्ये यस्याः भाषायाः प्रयोगः दृश्यमानः भवति, सा भाषा साहित्यिकी भाषा भवति। एवमेव सर्वत्रापि भिन्न-भिन्न भाषायाः प्रयोगः जायेत इति स्पष्टमेव।

भाषायाः प्रयोगविज्ञानम् अस्माभिः द्विधा चिन्त्यते यतः व्याकरणदृष्ट्या भाषायाः प्रयोगचतुष्टयं दृश्यते। तदेव उत्तरे वाच्यरूपेण अङ्गीक्रियते तच्च वाच्यचतुष्टयं-कर्तृवाच्यम्, कर्मवाच्यम्, भाववाच्यम्, कर्तृकर्मवाच्यं च। अत्र हि वाच्यस्थाने प्रयोगशब्दः उच्यते। अतः अत्रापि किञ्चन विज्ञानं विद्यते एव। येन विज्ञानेन निर्णयो जायते द्विकर्मकधातूनां प्रयोगकाले कुत्र प्रथमाविभक्तिः कुत्र च तृतीयाविभक्तिः जायेत इति। किन्तु अस्मिन् लेखे व्यवहारगतप्रयोगविज्ञानं विचिन्त्य चर्चा विधीयते भावव्यवहारगतप्रयोग-विज्ञानस्यापि सोपानचतुष्टयं चिन्तयितुं शक्यते। तत्र हि धाराप्रवाहिता, शुद्धता, शब्दसम्पत्तिः, शैलीसम्पादनं च वर्तन्ते। एतेषां सोपानानां क्रमशः विकासः अपेक्षितो भवति। धाराप्रवाहिता शुद्धता च सोपानद्वयम् आरम्भिकं विद्यते। शब्दसम्पत्तिः शैलीसम्पादनं च सोपानद्वयम् उच्चस्तरीयं विद्यते,

यस्य विकासः आजीवनं करणीयं भवति। अनयोः विकासः प्रयत्नबलेनैव भवितुमर्हति।

धाराप्रवाहितायै पूर्वकार्याणि अनन्तरकार्याणि च द्विधा भवन्ति। पूर्वकार्येषु दैनन्दिनशब्दानां, क्रियापदानां च लघुकथानां पठनं, सम्भाषण-शिविरेऽध्ययनं च अपेक्षितं विद्यते। यतः ज्ञायते एव साम्प्रतं संस्कृतभाषा व्यवहारिकरूपेण अल्पमात्रायां दृश्यतेऽतः आरम्भे एतानि कार्याणि श्रवण-कौशलस्य विकासाय करणीयानि एव। तथैव धाराप्रवाहितायै अनन्तरकार्य-चतुष्टयम् आन्तरिकरूपेण प्रत्येकं भाषाज्ञानस्य इच्छुकेन करणीयम्। तच्च धैर्यं सङ्कोचत्यागः, भाषाश्रद्धा, भाषायां रुचिः। यतः साम्प्रतिके काले जनानां संस्कृतं श्रोतुं धैर्यमेव न भवति। यदा नूतनजनं प्रति संस्कृतेन व्यवहारः क्रियते तदा तस्य महत्कष्टं जायते। सः सहसा कथयति-**नाहं जाने संस्कृतेन, हिन्द्या आङ्ग्लभाषया वा व्यवहारं कुर्याम्** इति। यावत् धैर्येण श्रोतुं सामर्थ्यं नोत्पद्यते तावत् संस्कृतस्य ज्ञानं न वर्धते। तथैव सङ्कोचत्यागः वर्तते महत्त्वपूर्णः यतः केऽपि चिन्तयेयुः यदा अहं शुद्धतया वक्तुं शक्ष्यामि तदा एव संस्कृतेन व्यवहारं करिष्यामि एवं शुभदिनं कदापि भवितुं नार्हति। यतः भाषा भाषणेनैव आयाति। अतः आरम्भिकस्तरे केवलं व्यवहारः करणीयः, भवतु नाम दोषः भाषणे। एवमेव रुचिः श्रद्धा च महत्त्वपूर्णे स्तः। यया भाषया अध्ययनं क्रियते तां प्रति रुचिः श्रद्धा च नास्ति तर्हि कदापि जीवने सा भाषा हस्तगता न भवति इति। यावत् धाराप्रवाहिता पूर्णरूपेण नायाति तावत् शुद्धतायाः विषये चिन्तनं नैव विधातव्यम्। यदा धाराप्रवाहिता आगता तदा शुद्धतायाः सन्दर्भे चिन्तनं करणीयम्।

द्वितीयं सोपानं विद्यते शुद्धता इति। शुद्धतायै विषयद्वयं ज्ञातव्यं भवति। वाक्यज्ञानं, व्याकरणज्ञानं च। वाक्यज्ञानरूपेण बहवः तादृशाः दोषाः भवन्ति। ये मातृभाषाकारणेन, अज्ञानकारणेन, अनवधानकारणेन च जायन्ते। तेषां निवारणं शनैः शनैः शुद्धिकौमुदी-भाषापाठादीनां पुस्तकानाम् अध्ययनेन करणीयम्। तत्रैव शुद्धतायै व्याकरणज्ञानम् अपेक्षितं विद्यते। तत्र हि क्रमशः कारक-सन्धि-समास-तद्धित-कृत-स्त्रीप्रत्यय-सुबन्त-तिङन्तादीनां

सुस्थिरं ज्ञानं परमापेक्षितं विद्यते। अतः व्याकरणज्ञानं विना शुद्धता कदापि भवितुं नार्हति। अतः शुद्धता प्रारम्भिकस्तरे आवश्यकी विद्यते इति।

उच्चस्तरीयं सोपानम् उत तृतीयं सोपानं विद्यते शब्दसम्पत्तिः। शब्दसम्पत्तिं विना नूतनप्रयोगाः भवितुं नार्हन्ति। शब्दसम्पत्तिवर्धनाय निरन्तरप्रयत्नस्य आवश्यकता भवति। तन्निमित्तं कोषग्रन्थानां पठनं महत्त्वपूर्णं वर्तते। तत्र हि अमरकोषः, आप्टेकोषः, संस्कृतभारतीकोषः, हिन्दी-अङ्ग्रेजी-शब्दकोषः, शब्दकल्पद्रुमः, मेदिनीकोषः इतिविभिन्नग्रन्थानां व्याख्या चेत्यादयः विषयाः कोषाः वा शब्दसम्पत्तये पठनीयाः। शब्दसम्पत्तिः तु शनैः शनैः वर्धते। यथाप्रयोगबाहुल्यं जायमानं भवति तदनुगुणमेव शब्दसम्पत्तिः वर्धते इति।

प्रयोगविज्ञानवर्धनाय अन्तिमं सोपानं वर्तते शैलीसम्पादनम्। शैलीसम्पादनं नाम शब्दसौष्ठवपुरस्सरम् आकर्षकतया लेखनं विद्यते। तन्निमित्तं श्रमः अपेक्षितो भवति। तत्र हि आधुनिकोपन्यासानां पठनम्। प्राचीनोपन्यासानां पठनम्। यदि आधुनिकप्राचीनोपन्यासानां निरन्तरं पठनं विधीयते तर्हि शनैः शनैः शैल्याः समुत्पादनं भवति। तथा हि विभिन्नग्रन्थानां पठनात्परं शास्त्रीयोत्तम-प्रयोगाणां स्वव्यवहारे प्रयोगेणापि शैलीसम्पादनं जायते। सर्वाधिकशैलीसम्पादनं तु स्वभाषया अन्यग्रन्थानां रटितवाक्यानां प्रयोगेण जायते। अतः शैलीसम्पादनं यः इच्छति सः प्रयोगाणाम् अन्वेषणशक्तिं वर्धयेत्।

**शैलीसम्पादनाय कश्चन संग्रहः-**

अत्र कानिचन वाक्यानि शैलीसम्पादनाय उपस्थाप्यन्ते अवलोकयामः-

- ➢ काले खलु समागतोऽहम् पणस्तावत् प्रकाश्यताम् (अपनी सर्त वताईए)।
- ➢ कथमियमवचनेनैव तिष्ठति।
- ➢ अलं विलम्बेन प्रकृतं चिन्तनीयम्।
- ➢ सम्भाषणीयः खल्वेषः।
- ➢ साधयामस्तावत्।

- एष कलहाङ्कुरमुन्मूलयानि (इस कौलाहल को समाप्त करता हूँ)।
- अनन्तरकरणीयाय प्रयतिष्ये।
- सर्वे गुडः गोमयीकृतः।
- ममापि महता कार्यव्यग्रता।
- कुतो भवादृशेष्वपरराधसम्भावना।
- आगतोऽहं यदृच्छया चिरं वासं न इच्छामि।
- एवं वयं न मृष्यामः (एवं न सहामहे)।
- देशधर्मस्तु पूज्यताम् छात्रधर्मस्तु पूज्यताम्।
- कस्मान्मे कुप्यते मृष्यतां मृष्यताम्, (सहन करो, सहन करो)।
- भवन्तः प्रमाणम् लिङ्गवैचित्र्यवक्रता मूहूर्तं तिष्ठ एतस्मिन् आश्रमे वासं चिरं तु समर्थये।
- शैलीसम्पादनाय जनैः छात्रैः वा = एवंप्रयतिष्यते तर्हि अवश्यं शीघ्रतया समीचीनभाषया व्यवहारमयं समुत्पत्स्यते। प्रयोगाः चतुर्विधाः यथा – कर्तरिप्रयोगः–भावेप्रयोगः– कर्मणिप्रयोगः– कर्तरिकर्मप्रयोगः (व्यतिक्रमः)

**कर्तरिप्रयोगः**–कर्तरि प्रथमा, कर्मणि द्वितीया क्रिया कर्मणः पुरुष–लिङ्गवचनानुसारेण भवति यथा रामः विद्यालयं गच्छति। अहं विद्यालयं गच्छामि।

**कर्मणिप्रयोगः**– कर्तरि तृतीया, कर्मणि प्रथमा क्रिया कर्मणः पुरुषलिङ्गवचनानुसारेण भवति। यथा– रामेण विद्यालयः गम्यते। मया विद्यालयः गम्यते।

**भावेप्रयोगः**– भावे अकर्मकधातुभ्यः प्रयोगः भवति। अत्र कर्तरि तृतीया, क्रिया सर्वदा प्रथमपुरुषैकवचनस्य भवति। बालिकया क्रन्य् ते।

रामेण हस्यते। अनेन क्रमेण निरन्तरं शैली सम्पाद्यते चेत् सर्वविधभाषासामर्थ्यम् उत्पत्स्यते।

आरम्भिकसोपानद्वयस्य विकासार्थं भाषाकौशलस्य सोपानद्वयं श्रवणं भाषणं च अपेक्षितं भवति। अनन्तरसोपानद्वयस्य विकासाय पठनं लेखनं च भाषाकौशलद्वयं नितराम् अपेक्षितं भवति। प्रत्येकं भाषा व्यवहाराधीना भवति। यदि कापि भाषा निरन्तरं व्यवहारे वर्तते तर्हि तस्याः कथमपि समाप्तिः न सम्भवा, भाषा व्यवहारे नास्ति चेत् कथमपि तस्याः उत्कर्षः अग्रे नयनं च नितरां परिश्रमाधीनं विद्यते इति।

अन्ये च विषयाः प्राप्तेऽस्मिन् अवसरे चिन्तनीयाः। पाठनकाले केवलं संस्कृतभाषायाः विकासः एव संस्कृतस्तरम् अग्रे नेतुं शक्नोति तदर्थं शिक्षकः शुद्धतया सरलतया सहजतया च संस्कृतेन पाठनं कुर्यात्। यतः शिक्षके शुद्धता प्रथमतया स्यादेव। यावत् शिक्षकः शुद्धतया न भाषते तावत् सः छात्रान् योग्यरीत्या बोधयितुं न शक्नोति। तथैव छात्राणां दृष्ट्या यदि चिन्तनं क्रियेत तर्हि छात्राः सहजतया, सरलतया, शुद्धतया च भाषणं कुर्युः। यतः छात्राः यत्र सौख्यं सहजतां च अनुभवन्ति तत्कार्यं सर्वादौ कर्तुमीहन्ते तदनु अन्यानि कार्याणि कुर्वन्ति। अतः त प्रथमतया भाषणस्य समारम्भं कुर्युः अनन्तरं शुद्धतायाः विषये चिन्तयेयुः।

निष्कर्षरूपेण उच्यते यत् भाषाप्रयोगविज्ञानम् आत्मनाम् अवधेयं विद्यते। यतः भाषाकौशलानां प्रयोगविज्ञानस्य चिन्तितसोपानानां बलेनैव स्वकीयानि कार्याणि सर्वोऽपि जनः कर्तुं शक्नोति। श्रवणं सर्वादौ भवेत् एव तदनु भाषणं, भाषणेऽपि नूतनशब्दानां प्रयोगः। तदनु निरन्तरं पठनस्य क्रमः प्रचलेत्। यः निरन्तरं स्वविकासदृष्ट्या न लिखति। तस्य विकासः भवितुं नार्हति। तथैव लेखनं सर्वदा सर्वैः करणीयमेव। पत्र-गीतकविता-श्लोक-लेख-शोधलेख-वार्तादीनां लेखनेन संस्कृते प्रौढत्वं समुत्पद्यते अतः प्रत्येकं जनः स्वकीयकौशलानां वर्धनपुरस्सरं ज्ञानं वर्धयेत इति शम्।

## नवमोऽध्यायः

# भाषाविज्ञानस्योद्भवः विकासश्च

संसारस्य सर्वोत्कृष्टं ज्योतिः भाषैव विद्यते। यया मानवहृदयान्धकारः नाश्यते, विश्वस्य प्रत्येकं मानवस्य कार्याणि अपि सम्पाद्यन्ते। अतः आचार्य-दण्डिना भाषायाः दिव्यस्वरूपं प्रतिज्ञाय लिखितम्-

**इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।**

अर्थात् यदि शब्दरूपं ज्योतिः संसारमिदं न प्रकाशयेत् तर्हि संसारे चतुर्दिक्षु अन्धकारः एव परिव्याप्तः स्यात्। भाषायाः स्वरूपम् अतीव-विशालमगाधञ्च विद्यते। यथा मानवसृष्टेरविच्छिन्नक्रमः प्रचलति तथैव भाषाप्रवाहोऽप्यविच्छिन्नरूपेण प्रचलति।

मानवाः स्वभावान् प्रकटीकर्तुं, चिन्तयितुं विचारयितुं च यानि साधनानि प्रयुञ्जते तत्र सर्वत्रापि **'भाषा'** भवति केनापि रूपेण। **'भाषा'** संस्कारमूला। यां वयं पारिवारिकसामाजिकपरिवेशे सामान्यरूपेण अर्जयामः। एतस्मिन् जगति दृश्यमानानां समस्यानां समाधानं भाषाशास्त्रे उत भाषाविज्ञाने एव विद्यते।

**'भाषाविज्ञानम्'** कश्चन यौगिकः शब्दः। यः भाषाविज्ञानयोः समायोजनेन सम्भवति। भाषा नाम, या भाषणे लेखने च कार्यं समादध्यात्। परन्तु विज्ञानं तद्विशिष्टं ज्ञानं कथ्यते यत्र नियमेषु विकल्पविप्रतिपत्तिभ्यां न्यूनोऽपि अवकाशः न भवति। भाषाविज्ञानं तात्त्विकज्ञानं विद्यते यत्र भाषायाः तत्त्वानां वैज्ञानिकाधारेण, तुलनात्मकाधारेण, ऐतिहासिकाधारेण च अध्ययनं विधीयते।

भाषाविज्ञानस्य आरम्भः यद्यपि वेदाङ्गभूतशिक्षानिरुक्तव्याकरण-प्रातिशाख्यादिग्रन्थानां प्रादुर्भावेन मन्यते। तथापि आधुनिकभाषाविज्ञानस्य

प्रारम्भः 1786 खिष्ट्राब्दौ सर–विलियमजोन्सस्य संस्कृतलैटिनग्रीकाणाम् अध्ययनेन मन्यते।

- ➢ कम्पेरेटिव ग्रामर – Comparative Grammar तदनन्तरम्।
- ➢ कम्पेरेटिवफिलोलॉजी – Comparative Philology तदनन्तरम्।
- ➢ फिलोलॉजी – Philology सम्प्रति।

भाषाशास्त्रम् स्पदहनपेजपबे भाषाविज्ञानम् चेपसवसवहल निरन्तरं विकासप्रभावे सम्प्रति अस्य द्वे नामनी 'भाषाशास्त्रम्' 'भाषाविज्ञानम्' च प्रसिद्धे वर्तेते। अत्रैव भाषासम्बद्धानां सर्वेषां प्रकाराणां विवेचनं वर्तते।

अन्येषां विज्ञानानामपेक्षया भाषाविज्ञानस्य क्षेत्रं सुतरां व्यापकं वर्तते, यतः अस्य सम्बद्धः केवलम् एकया कयाचित् भाषया नास्ति अपि तु सर्वाभिः मानवभाषाभिः सह वर्तते। भाषाविज्ञाने च सर्वभाषाणां चत्वारि अपि घटकानि अन्तर्भूतानि भवन्ति।

**भाषायाः घटकानि**

- ➢ ध्वनिः (Sound)
- ➢ पदम् (Form)
- ➢ वाक्यम् (Sentence)
- ➢ अर्थः (Meaning) इत्येषाम् सम्यक् अध्ययनं विधीयते।

डॉ. मङ्गलदेवशास्त्रिवर्यः 'भाषाविज्ञानं' परिभाषमाणः अकथयत् **'भाषाविज्ञानं'** तद्विज्ञानं कथ्यते यस्मिन् सामान्यरूपेण मानवीयभाषायाः, कस्याश्चित् विशेषभाषायाः रचनेतिहासयोः अन्ततः भाषाणां, प्रादेशिकभाषाणां (बोलीनां) (वाणीनां) च वर्गाणां पारस्परिकाणां समानतानां विशेषतानां तुलनात्मकमध्ययनं विधीयते।

**'भाषाविज्ञानं'** तादृशं विज्ञानं वर्तते, यत्र भाषायाः भाषिकतत्त्वानाम् ऐतिहासिकाधारेण तुलनात्मकाधारेण च वैज्ञानिकमध्ययनं क्रियते।

भाषायाः उद्भवविषये विदुषाम् अभिप्रायाः अपूर्णाः अनिर्णयात्मकाः च विद्यन्ते। अत्र उद्भवसम्बद्धाः केचन सिद्धान्ताः साररूपेण प्रस्तूयन्ते–

1. दिव्योत्पत्तिसिद्धान्तः। (Divine Theory)
2. सङ्केतसिद्धान्तः। (Agreement Theory)
3. रणनसिद्धान्तः। (Ding-dong Theory)
4. ध्वन्यनुकरणसिद्धान्तः। (Onomatopoic Theory)
5. आवेगसिद्धान्तः। (Interjectional Theory Pooh Pooh Theory)
6. श्रमध्वनिसिद्धान्तः। (Yo-he-ho-Theory)
7. संगीतसिद्धान्तः। (Sing-song-theory)
8. समन्वयसिद्धान्तः। (Coordinating Theory)
9. प्रतिभा-सिद्धान्तः। (Talent Theory)

**विस्तरेण सिद्धान्तानां परिशीलनम्-**

1. **दिव्योत्पत्तिसिद्धान्तः (Divine Theory)** - अस्य सिद्धान्तस्यानु- सारेण ईश्वरः मानवेन सहैव तन्निमित्तमेकस्याः परिष्कृतभाषायाः अपि सृष्टिम् अकरोत्। या वैदिकसंस्कृतस्य नाम्ना व्यवह्रियते।
2. **सङ्केतसिद्धान्तः (Agreement Theory)** - एतस्य सिद्धान्त- स्यापरं नाम निर्णयवादः स्वीकारवादश्चास्ति। अस्य मतस्य प्रवर्तकः फ्रेन्चविचारकः रूसो वर्तते। एतस्य मतानुसारेण प्राचीनकाले पारस्परिक समञ्जनेन ध्वन्यात्मकसङ्केताना- मुत्पत्तिः वर्तते। यया भाषायाः प्रादुर्भावः अभूत्।
3. **रणनसिद्धान्तः (Ding-dong Theory)** - एतस्य सिद्धान्त- स्यापरं नाम धातु सिद्धान्तः अथवा अनुकरणसिद्धान्तः अनुकरण- मूलकतावादः : डिंग-डांगवादः वा वर्तते। एतस्य मतस्य प्रवर्तकः प्लेटो (Plato) आसीत्। एतस्य सिद्धान्तस्य हेसः (Heyes) मैक्समूलरः (Maxmueler) व्यवस्थित- स्वरूपेण प्रत्यपादयताम्। एतन्मतं दृष्ट्वा प्रत्येकं व्यक्तेः

मनसि रञ्जनं (झङ्कारः) अभवत्। एतद्रञ्जनम् आधारीकृत्यैव प्रत्येकं वस्तुनः भिन्नं भिन्नं नामकरणं जातम्।

4. **ध्वन्यनुकरणसिद्धान्तः ( Onomatopoic Theory )** – एतस्य सिद्धान्तस्य त्रीणि नामानि अन्यानि अपि सन्ति। 1. अनुकरण सिद्धान्तः, 2. ध्वन्यात्मकानुकरणसिद्धान्तः। 3. भों भों सिद्धान्तः। एतत् सिद्धान्तानुसारेण प्राकृतवस्तूनां पशुपक्षिणां ध्वनेः अनुसारेण विभिन्नानां वस्तूनां नामाङ्कनं भवति।

5. **आवेगसिद्धान्तः ( Interjectional Theory Pooh Pooh Theory )** – एतं सिद्धान्तं मनोभावाभिव्यक्तिवादनाम्ना अथवा पू.पू. वाद.नाम्ना मानवाः जानन्ति। एतस्मिन् मते अहो, आहा, आह, ओह, हाय इत्यादि आवेगसूचकध्वनिभिः एव भाषायाः निर्माणं जातम्।

6. **श्रमध्वनिसिद्धान्तः ( Yo-he-ho-Theory )** – एतस्य सिद्धान्तस्य त्रीणि नामानि सन्ति– श्रमापहारः मूलकतावादः अथवा हे–होवादः इति नाम्ना कथ्यन्ते। अस्य सिद्धान्त–स्यानुसारेण श्रमजन्य–हो हो, हू हू, हैया–हैया इत्यादिश्रमध्वनीनां बलेन भाषायाः समुत्पत्तिः अभवत्।

7. **संगीतसिद्धान्तः ( Sing-song-theory )** – एतस्य सिद्धान्तस्य प्रेमसिद्धान्तः, सिंगसांगवादः (WooWoo Theory) नामनी अपि भवितुमर्हतः। अस्य सिद्धान्तस्यानुसारेण मानवस्य संगीतात् भाषायाः उत्पत्तिः अभवत्।

8. **समन्वयसिद्धान्तः ( Coordinating Theory )** – अस्य सिद्धान्तस्य प्रवर्तकः भाषाशास्त्रिहेनरीस्वीट्महोदयः वर्तते। भाषायाः प्रारम्भः अनुरणनात्मकः भाषाभिव्यञ्जकप्रतीकादि–शब्दानां समन्वयात् विद्यते।

9. **प्रतिभा–सिद्धान्तः ( Talent Theory )**– एतस्य सिद्धान्तस्य संस्थापकः वाक्यपदीयकारः भर्तृहरिः वदति–

**शब्देष्वेवाता शक्तिर्विश्वस्यास्य निबन्धनी।**
**यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते।।**

अर्थात् भाषाशब्देषु एवं विश्वं बद्धं शक्तिरस्ति। शब्दः (भाषा) नेत्रमस्ति, प्रतिभा आत्मा अस्ति। असौ शब्दः विभिन्नरूपेषु प्रकटितो भवति।

10. **प्रतीकसिद्धान्तः ( Symbolic Theory )** – अस्यानुसारेण संयोगेन सामान्यसम्बन्धेन च कस्यचित् शब्दस्य केनापि अर्थेन सह सम्बन्धः भवति। सः शब्दः तस्य अर्थस्य प्रतीको भवति। प्रो. टवीरः प्रारम्भिकभाषायाम् एवम्भूतानां शब्दानां सङ्ख्याम् अत्यधिकाम् अमन्यत। भाषाविज्ञाने एवं भूताः शब्दाः नर्सरीशब्दाः (Nursery Word) कथ्यन्ते।

भाषाविज्ञानदृष्ट्या भाषा ईश्वरीया नास्ति अपितु प्रतिभा ईश्वरीयास्ति, प्रतिभयैव भाषायाः सृष्टिः भवति। एतस्मिन्नर्थे भाषाम् ईश्वरीयां भणन्ति मानवाः। यतः एषा प्रतिभैव सर्वशक्तिसम्पन्ना नवनवोन्मेषशालिनी विद्यते। एषा प्रतिभा एकरूपा नास्ति। अतः भाषापि एकरूपा न भवितुं शक्नोति। भाषायाः कारणं प्रतिभायाः एकरूपतैव विद्यते।

भाषायाः विकाससम्बन्धे ध्यातव्यं यत् सृष्टेः नियमानुसारेण मानव-जीवनेन सहैव भाषायामपि परिवर्तनं, परिवर्धनं, क्षरत्वं नित्यनूतनरमणी-यत्वञ्चास्ति। निरुक्तकारयास्कस्य मते प्रत्येकं भौतिकतत्त्वे षड् विकाराः ते च यथा समुपलभ्यन्ते।

- उत्पत्तिः
- वृद्धिः
- स्थितिः
- क्षयः
- विकासः
- विनाशः

एते षड् विकाराः सन्ति।

परिवर्तनबलेनैव एतस्याः सृष्टेः जगत् संसारः च द्वे नामनी स्तः। **'गच्छतीति जगत्'** यः निरन्तरं गतिशीलो भवति सः संसारः। सरतीति संसारः, संसृतिर्वा, एतत् संसरणं करोति। परिवर्तनशीलोऽस्ति। अतः अमुं संसारं संसृतिं वा कथयन्ति विद्वांसः।

भाषायाः उपमा नद्याः प्रवाहेण भवति। यथा नदी स्वोद्गमस्थलेन प्रकटीभूय निरन्तरं प्रवहति। तस्याम् अनेकाः नद्यः नदनालादयः विलीयन्ते तस्याः स्वरूपे परिवर्तनं परिवर्धनं च कुर्वन्ति, तथैव भाषापि। सर्वाः भारतीयाः भाषाः एकमूलभाषायाः निस्सरिताः सन्ति। अद्यत्वे भाषा स्थानभेदेन हिन्दी-वङ्गाली-गुजराती-मराठीपञ्जाबी इत्यादिभिः विभिन्ननामभिः अभिज्ञायन्ते। अनेन प्रकारेण मूलवैदिकभाषया संस्कृतपालिप्राकृतविस्तापभ्रंश-हिन्दी इत्यादयः विभिन्नाः विकसिताः सन्ति। भाषागतविकासस्य आधारः स्वाभाविकं परिवर्तनमस्ति यत् पञ्चसु रूपेषु दृश्यते-

**स्वाभाविकं परिवर्तनम्**

- ध्वनिपरिवर्तनम्।
- शब्दपरिवर्तनम्।
- पदपरिवर्तनम्।
- वाक्यपरिवर्तनम्।
- अर्थपरिवर्तनम्।

भाषागतविकासस्य परिवर्तनकारणानां विषये विचारयन्तः भाषाशास्त्रिणः एतानि कारणानि प्रामुख्येन वर्गद्वये विभक्तवन्तः। यानि

1. आभ्यान्तरकारणानि।
2. बाह्यकारणानि। च इति रूपेण जानन्ति मानवाः।

तत्रादौ आभ्यन्तरकारणानि

1. अपूर्णम् श्रवणम्।
2. अपूर्णम् अनुकरणम्।

3. प्रयत्नलाघवम्।
4. प्रयोगाधिक्यम्।
5. भावातिरेकत्वम्।
6. लयात्मकता।
7. प्रमादः।
8. नवीनीकरणप्रवृत्तिः।
9. बौद्धिकस्तरः।
10. प्रजातीयमनोवृत्तिः।
11. मिथ्यासादृश्याः।

इत्येतानि आभ्यन्तरकारणानि सन्ति येषां कारणेन भाषायां परिवर्तनानि जायन्ते। तथैव बाह्यकारणेषु तानि कारणानि अन्तर्भूतानि क्रियन्ते। यानि बहिभार्गात भाषां प्रभावयन्ति। तत्र बाह्यकारणानि यथा–

1. भौगोलिकप्रभावः।
2. ऐतिहासिकप्रभावः।
3. सांस्कृतिकप्रभावः।
4. वैयक्तिकप्रभावः।
5. सामाजिकप्रभावः।
6. साहित्यिकप्रभावः।
7. वैज्ञानिकप्रभावः

उपर्युक्तानि उभयविधकारणानि भाषापरिवर्तनं विकासं च कुर्वन्ति।

**निष्कर्षः**–

निष्कर्षरूपेण कथयितुं शक्यते। भाषायाः विक्रासक्रमः नितरां प्राचीनः वर्तते। बहूनां कारणानां फलरूपेण भाषायां परिवर्तनं जायते। विविधभाषाणां प्रमुखवैशिष्ट्यस्य परिज्ञानेनैव मानवाः भाषाविदः भवितुमर्हन्ति

### दशमोऽध्यायः

## संस्कृतस्य लोकप्रियतासम्पादनम्

संस्कृतस्य व्यवसायात्मिकतासम्पादनं व्यवसायशीलता च उभयमपि जीवने सुतराम् अपेक्षते। यत्र मानवः व्यवसायेन सामाजिकसुखसौविध्यं प्राप्नोति,जनः तत्रैव शीलेन समाजे प्रतिष्ठां समधिगच्छति। समाजेव्यवसायः शीलं चेति प्रकल्पद्वयमेव सर्वैः समाद्रियते। मानवः उत्तमः सः एव भवति, यःविश्वसनीयः स्यात्। विश्वसनीयतायाः मुख्यं प्रमाणं वयं वृत्तं शीलं वा स्वीकुर्मः। सम्पन्नतायाः च प्रमाणं व्यवसायः चिन्त्यते। एतदर्थं प्राचीनकालादेव भारतीयं संस्कृतंसंस्कृतिः च भारतीयज्ञानपरम्परायाः सन्धार-कत्वेन श्रवणमननकीर्तनादिभिः स्वीयां प्रतिष्ठां सन्द्योतयति। ऋषयः मुनयः कवयः च आत्मबोधनेन ब्रह्मणः बोधनेन सूक्ष्मातिसूक्ष्मजगतः प्रबोधनेन च अस्माकं पुरस्तात् संस्कृतस्वरूपं प्रतिष्ठापितवन्तः। धर्मार्थरक्षणाय धर्मशास्त्रादि-ग्रन्थाः सर्वेषामपि सुतरां हितकारकाः। लोकक्षेमार्थं वेदाः आयुर्वेदाः च समेषाम् उपकारकाः वर्तन्ते। आयुर्वर्धनार्थं वनस्पतिशास्त्रं, व्यवसायिकक्षेत्रे वृद्ध्यर्थं वास्तुशास्त्रम्, आधुनिकजगतः संसाधनायसंगणकज्ञानं चेत्यादीनाम् अवगमः सुतराम् अपेक्षते। एते सर्वेऽपि ग्रन्थाः जनमङ्गलकारकाः इति अस्माभिः अवलोक्यन्ते। भगवान् शङ्कराचार्यः विवेकचूडामणौ गुरु-शिष्य-चिन्तनरूपेण मनोविज्ञानस्थ-उद्दीपनप्रक्रियया आकाङ्क्षापद्धत्या च पारम्परिक-धारया साकं लौकिकधारामपि प्रतिपाद्य सर्वेषां हितं संद्योतयति। वेदव्यासः यत्र वेदोपनिषत्पुराणादीनां विभाजनपूर्वकं समाजहितस्य दृष्टिं प्रबोधयति। तत् समेषां कृते समादरणीयं विद्यते। संस्कृतं न केवलं व्यावसायिकाधानं करोति शीलस्य मुख्यस्तम्भरूपेण संस्काराणामपि संरक्षणं संवर्धनं च जीवने करोति। आधुनिकसमये संस्कृतस्य सुतरां महत्त्वम् उभयदृष्ट्या दरीदृश्यते। अतः वैज्ञानिकरूपेण यन्त्राधारेण च संस्कृतस्य प्रचारः सुतराम्

अपेक्षते। अस्माकम् ऋषयः मुनयः आचार्याः च प्रवचनेन आचरणेन प्रबोधनेन कथाश्रावणेन नाट्यमञ्चनेन संगीतश्रावणेन काव्यादिगायनेन च जनानां संस्कारवर्धनाय प्रयत्नं कृतवन्तः। प्रत्येकं मानवस्यजीवनेआनन्दः महत्त्वभूतः भवति। तस्य आनन्दस्य समुपपादनाय महत्त्वभूतः भवति व्यवसायः, शीलं सन्तोषश्च। स च व्यवसायः यद्यपि संस्कृते अस्ति किन्तु केषाञ्चन जनानां प्रवादः दरीदृश्यते। संस्कृते व्यवसायत्वं नास्ति। संस्कृते व्यवसायिकता नास्ति। व्यवसायाः तु अनेकप्रकारकाः सन्ति किन्तु सामर्थ्यं वर्धनीयं, तथा च व्यवसायानां ज्ञानं प्राप्तव्यम्। यतः के अवसराः जीवने संस्कृतं पठित्वा मया समालब्धुं शक्यन्ते इति ज्ञानं नास्ति चेत् तन्मार्गावलम्बनं तस्मिन् क्रमे श्रमः कर्तुम् अशक्यः भवति। एतदर्थम् एव बहवः जनाः संस्कृतात् पराङ्मुखाः भवन्ति तदर्थं व्यवसायिकतां समुत्पादयितुं केचन उपायाः चिन्तनाय सुतराम् अपेक्षिताःवर्तन्ते। तत्र चिन्त्यते यत् के के विषयाः प्रतिपादनीयाः इति।

कीदृशः व्यवसायः च उत्पादनीयः? तर्हि प्रथमः अस्ति–

1. **संस्कृतस्थविषयाणां संग्रहणात्मको व्यवसायः** – अर्थात् ये विषयाः वर्तन्ते तेषां संग्रहणं करणीयम्। संग्रहणपूर्वकं तत्र कीदृशः कीदृशः व्यवसायः उत्पादयितुं शक्यते तदर्थं प्रयत्नः समुपस्थापनीयः।

2. **यन्त्रारोपणतात्मको व्यवसायः**– इदानीं संस्कृतविषयाः यन्त्रे आरोपिताः नैव दृश्यन्ते। तदर्थं सर्वेऽपि विषयाः यन्त्रे आरोपिताः स्युः तदर्थं प्रयत्नः करणीयः।

3. **विषयपरिचर्चात्मको व्यवसायः**– विषयस्य चर्चा महती आवश्यकी वर्तते। तदर्थं कथं वयं प्रत्येकं विषयं चर्चया समुपस्थापयामः समाजस्य पुरस्तात्, तदर्थं महती आवश्यकता वर्तते संस्कृतविषयस्य परिचर्चात्मकोपस्थापनस्य।

4. **प्रसारणात्मको व्यवसायः**– संस्कृतस्य प्रसारः कथं कर्तव्यः। संस्कृतप्रचारमाध्यमेन कथं जनेषु संस्कृतशीलता समुत्पादयितुं शक्यते इति चिन्तनं विधातव्यम्।

5. **प्रबन्धात्मको व्यवसायः** – वयं जानीमः अस्माकं गीताग्रन्थः प्रबन्धात्मको वर्तते। यदि गीतायाः सर्वोऽपि विषयः सम्यक् छात्रान् प्रति उपस्थाप्यते पाठ्यते च, तर्हि अवश्यं तेषां प्रबन्धात्मकं ज्ञानं कथं प्रबन्धनं करणीयम् इति समुत्पादयितुं शक्यते। प्रबन्धनक्षेत्रे संस्कृतमाध्यमेन व्यवसायः समुत्पादयितंय शक्यते। सम्यक् प्रबन्धनतन्त्रज्ञता उत्पादयितुं शक्या।

6. **यन्त्रारोपितशिक्षणात्मको व्यवसायः** – यन्त्रादिभिः कथं शिक्षणं कारणीयम् इत्यस्यापि व्यवसायः संस्कृतक्षेत्रे समुत्पादयितुं शक्यते।

7. **योगाभ्यासात्मको व्यवसायः** – योगाभ्यासः कारणीयः। यतः जनसामान्यम् इदानीं रोगैः आक्रान्तमस्ति। अस्मिन् काले तद्योगबलेन सुखसौविध्यं साधयितुं शक्नुमः। स च योगः संस्कृते निहितः।

8. **आध्यात्मिकविषयज्ञापनात्मकव्यवसायः** – अद्यत्वे सर्वेऽपि जनाः मानसिकपीडिताः सन्तीति कारणतः आध्यात्मिकजगति प्रवृत्तिमन्ताः दरीदृश्यन्ते। तेषां तां प्रवृत्तिं सम्पोषयितुम् आध्यात्मिकज्ञानपूर्वकं केचन तादृशः बुद्धिमन्तः ज्ञानवन्तः स्युः जनानाम् आध्यात्मिकतोषं परिपूरयितुं शक्नुयुः।

9. **सद्यस्करूपेण विषयपाठनात्मकव्यवसायः** – इदानीं वयम् आनलाइन–माध्यमेन अध्ययनं पश्यन्तः स्मः। एतादृशः बहवः समुत्पादनीयाः ये आनलाइन–माध्यमेन सुष्ठुतया संस्कृतं पाठयितुं शक्नुयुः। तस्य प्रसारणं कर्तुं शक्नुयुः। तत्र दृश्यश्रव्यसामग्री पूर्णतया दर्शनयोग्या श्रवणयोग्या च स्यात्। तादृशः व्यवसायः अपि संस्कृतक्षेत्रे समुत्पादयितुं शक्यः।

10. **अध्ययनात्मकव्यवसायः** – इदानीं सर्वत्र शिक्षकाः ईह्यन्ते। परन्तु शिक्षकाणां कौशलकारणेनैव छात्राः वर्धन्ते इति कृत्वा शिक्षककौशलवृद्धिः सम्पादनीया। यदि शिक्षकाणां कौशलदृष्टिः

भवति शिक्षका: अधिगन्तुं प्रयतन्ते तर्हि अवश्यं शीघ्रं तेषां ज्ञानं समुत्पादयितुं शक्यम्।

11. **न्यायात्मकव्यवसाय:** – न्यायात्मकव्यवसाय इत्युक्ते न्यायक्षेत्रे अधिवक्तार: भवन्ति चेत्संस्कृतज्ञा: भवन्तु। तादृश: न्यायाधीश: भवति संस्कृतज्ञ: भवतु। तादृशं व्यवसायात्मकं सामर्थ्यमपि समुत्पादनीयमस्ति आधुनिकपरिप्रेक्ष्ये।

12. **प्रशासनात्मको व्यवसाय:** – प्रशासनक्षेत्रेऽपि संस्कृतात्मक-व्यवसायानाम् आवश्यकता वर्तते इति कृत्वा प्रशासनक्षेत्रेऽपि व्यवसायस्य उत्पादनापेक्षा दरीदृश्यते।

13. **राजनीतिक्षेत्रम्** – राजनीतिक्षेत्रेऽपि अधुना संस्कृतज्ञा: स्वीयम् उपस्थापनं कुर्यु: इति महत्त्वपूर्णविषय: कश्चन वर्तते।

14. **संस्कृतप्रवाचक:** – संस्कृतम् अधीत्य कश्चनापि वार्ता-प्रवाचक: भवितुम् अर्हति समाजे च प्रतिष्ठां प्राप्तुं शक्नोति।

इत्थं प्रकारेण अनेकप्रकारका: व्यवसाया: भवितुम् अर्हन्ति किन्तु तेषां कथम् उत्पादनं कार्यमिति दृष्टव्यम्। संस्कृतज्ञ: अन्येषु विद्यमानेषु सर्वेषु व्यवसायेषु किञ्चित् अतिरिक्तपरिश्रमं कृत्वा प्रतिष्ठां प्राप्तुं शक्नोति। यथा आङ्ग्लादिभाषाछात्रा: अन्यक्षेत्रीयव्यवसायेषु साफल्यं लभन्ते।

**उपाया:–**

अधुना संस्कृतं व्यवसायात्मकरूपेण सम्पादयितुं केचन उपाया:–

1. **संगणकयन्त्रपाठनम्** – यत: संस्कृतं ये अधियान: भवन्ति ते संगणकज्ञानेन अनभिज्ञा: भवन्ति इति कारणेनापि ते तद्रीत्या प्रचारे प्रसारे च संलग्ना: नैव दृश्यन्ते। तदर्थम् अनिवार्यतया संगणकपाठन- व्यवस्था कार्या। यद्यपि अधुना संस्कृतच्छात्राणां संगणके प्रावीण्यम् अवलोक्यते।

2. **संगणके ग्रन्थटङ्कणाभ्यास:** – कथं ग्रन्थानां टङ्कणं करणीयम् एतस्याभ्यासे सामर्थ्यं समुत्पादनीयम्।

3. **नूतनविषयलेखनाभ्यासः** - कथम् आधुनिकसन्दर्भिताः विषयाः लेखितुं शक्याः संस्कृतगिरा इति सामर्थ्यम् उत्पादनीयम्।

4. **अभिक्रमिताधिगममाध्यमेन विषयाध्यापनम्** - अभि-क्रमिताधिगमस्य उपयोगपूर्वकं विषयाणां पाठनसामर्थ्यं छात्रेषु उत्पादनीयम्। पुनः च-

5. **ई-प्रबोधनम्** - ई-प्रबोधनमाध्यमेन विषयाणाम् उपस्थापनं कथं कर्तव्यम् इति विषयः पाठनीयः।

6. **विषयाणां चित्रणम्** - कश्चन विषयः संवृत्तः तस्य चित्रणं लेखनपूर्वकं विधातव्यं येन जनाः आकृष्टाः सन्तः पठेयुः। तादृशं सामर्थ्यमपि इदानीम् उत्पादनीयम्। तेनैव व्यवसायक्षेत्रमपि वर्धयितुं शक्नुमः।

7. **प्रदत्तविश्लेषणम् ( data analysis )** - प्रदत्तस्य विषयस्य विश्लेषणं कथं कर्तव्यम् इत्यपि सामर्थ्यं छात्रेषु उत्पादनीयम् अस्ति।

8. **अणुसंकेतसज्जीकरणम्** - अर्थात् web निर्माणम्-व्यवसायनिर्माणसामर्थ्यमपि छात्रेषु जायेत तदर्थमपि प्रयत्नः विधातव्यः भवति।

9. **योजनालेखनम्- ( program writing )।** योजनायाः लेखनं कथं कर्तव्यमस्ति तदाधारेणापि व्यवसायः उत्पादयितुं शक्यः।

10. **शुद्धज्ञानोत्पादनम्** - शुद्धतया कथं ज्ञानस्य उत्पादनं विधातुं शक्यते कारयितुं शक्यते। एतदपि पाठनीयमस्ति। उपायः संसाधनीयः अस्ति।

11. **ज्योतिषज्ञानप्राप्तिः** - ज्योतिषज्ञानप्राप्तिद्वारा अपि अग्रे वर्धनं भवितुम् अर्हति।

12. **कवित्वसंपादनम्** - कवित्वसंपादनेनापि व्यावसायिकक्षेत्रे सामर्थ्यस्य समुपस्थापनं भवितुम् अर्हति।

13. **तार्किकतशक्तिवर्धनम्** – तार्किकतशक्तिवर्धनद्वारा अपि समेषां हितकामना भवितुम् अर्हति। तदपि एकः बहुमहत्त्वपूर्णविषयः वर्तते।

14. **कर्मकाण्डप्रबोधनम्**– कर्मकाण्डप्रबोधनद्वारा अपि व्यवसायिकं क्षेत्रं दृढं कर्तुं शक्यते।

15. **आयुर्वेदादीनाम् अध्ययनम्** – आयुर्वेदादीनाम् अध्ययनद्वारा अपि चिकित्साक्षेत्रे व्यवसायः समुत्पादयितुं शक्यः। एवं च

16. **वार्तापत्रादिलेखनसामर्थ्यप्राप्तिः** – वार्तापत्रादिलेखनसामर्थ्य प्राप्तिद्वारा अपि व्यवसायः वर्धयितुं शक्यते। जनाः आधुनिक-विषयान् वार्तपत्रादिषु पठितुम् अभिलसन्ति। तदर्थं तादृश-सामर्थ्योत्पादनेनापि व्यवसायिकसामर्थ्यं समुत्पादयितुं शक्यते।

17. **स्वीयसर्वविधकौशलसंपादनम्-चातुरीसंपादनम्** – चातुर्येण कार्यं सर्वदा उत्तमभावपूर्वकं करणीयं भवति तेन सर्वाणि कार्याणि सफलानि साधितानि भवन्ति।

**एका चातुरीयुक्ता सकलाविकला कला।**
**एका चातुरीरहिता सकलाविकला कला।**

कौशलसंपादनं सर्वक्षेत्रेषु। यानि कार्याणि कुर्मः तत्र कुशलता भवेत्।

18. **शोधप्रवृत्तेः समुत्पादनम्** – अयमपि उपायः सुमहान् भवितुम् अर्हति। यतः शोधप्रवृत्तेः अभावकारणेन छात्राः शोधं समाजोपयोगिनं न कुर्वन्ति। तदाधारेण शोधसन्दर्भे छात्रेषु उपायः करणीयः। तेन ते व्यवसायिकक्षेत्रं समवर्धयितुं शक्नुवन्ति।

19. **जालोपकरणनिर्माणम्** – कथम् अन्तर्जालेन web tools निर्माणं करणीयम् इत्यादिरपि छात्रेषु ज्ञानम् उत्पादनीयम्। येन ते सहजतया विषयान् संलेखयितुं प्रभवेयुः।

20. **App निर्माणम्**-। चच निर्माणम् अपि आधुनिककाले बहुमहत्त्वपूर्णविषयः। लघु-लघुवीडियो इत्यादीनाम्। चच माध्यमेनापि संस्कृते व्यवसायः समुत्पादयितुं शक्यः। एवं रीत्या अनेकविषयाः सन्ति यत्र एतेषाम् उपायानां माध्यमेन यदि वयं संस्कृतच्छात्रेषु सामर्थ्यम् उत्पादयामः तर्हि अवश्यम् एतेन संस्कृतस्य व्यवसायात्मिकता शक्या। यतः सर्वेऽपि स्थाय्युद्योगं प्राप्तुं शक्नुयुः इति नास्ति निश्चितता। तथापि सामर्थ्यवन्तः तु स्वयम् अभिलसन्ति जीवनलक्ष्यं प्राप्तुम् इति कृत्वा सामर्थ्यवर्धनम् अस्माकं संस्कृतक्षेत्रे स्थितानां लक्ष्यमस्ति।

उपसंहाररूपेण वयं कथयितुं शक्नुमः केचन जनाः अभावकारणात् संकुचितसमयकारणात् जनबाहुल्यकारणात् च संस्कृतं प्रति नैव प्रवृत्ताः भवन्ति। किन्तु इच्छानुकूलज्ञानप्राप्तेः एकमेव साधनमस्ति संस्कृतम्। विविधाध्ययनानां माध्यमेन ज्ञातमस्ति संस्कृतज्ञेषु व्यवसायः शीलं च उभयमपि समानरूपेण दरीदृश्यते। प्राचीनमहाभारतादिग्रन्थेषु एवं महाभाष्यदि-ग्रन्थेषु वयं प्रचारदृष्टिं तत्र द्रष्टुं शक्नुमः। अतः अस्मिन् अवसरे अस्माभिः वक्तुं शक्यते यत् समस्यानां सर्वथाभावेन अभावः करणीयः तर्हि अवश्यं संस्कृताध्ययनक्षेत्रे अध्यापनक्षेत्रेच सर्वैरपि प्रवर्तनीयम्। एवं च स्वीय-स्मरणशक्तेः वर्धनात्मकः उपायः समाचरणीयः। येन न केवलं वयमस्माकं विकासं कर्तुं प्रभवेम अपितु समाजस्य समेषामपि जनानां हितकामादिकं साधयितुं शक्नुयाम।

## एकादशोऽध्यायः

# संस्कृतस्य प्रचार-प्रसाराभिकरणानां सामान्यपरिचयः

विश्वेऽस्मिन् विश्वे अस्माभिः सर्वैरपि अङ्गीक्रियते भारतस्य आत्मा संस्कृतमिति। संस्कृतं सर्वेऽपि आदरभावेन आमनन्ति अपि। भारतस्य अधिगमः कर्तव्यः वर्तते उत भारतंज्ञेयमस्ति तर्हि संस्कृतस्य ज्ञानमत्यन्तम-निवार्यमस्ति। वैदिकवाङ्मयादारभ्य इदानीं यावदुत प्राचीनकालात् इदानीं यावत् स्वीयां स्थिरभूमिकां या कापि भाषा निर्वहन्ती अस्ति सासंस्कृतभाषा एवास्ति। संस्कृते एव जनाः आत्मसंरक्षणपद्धतिमपि आमनन्ति। लौकिका-लौकिकसाहित्यम् अनया भाषया एव निबद्धं वर्तते। तदर्थमेव सर्वकारेण शासनेन वाअनेके विश्वविद्यालयाः केन्द्रियविश्वविद्यालयाः संस्कृत-अकादम्याः संस्कृतविश्वविद्यालयाःसंस्कृतनिर्देशालयाः च समुपस्थापिताः वर्तन्ते। शासकीयाभिकरणानि शासनमारम्भतः एवसंस्कृतं संरक्षितुमीहन्ते। तत्कारणेनैव शासनेन विविधाः विश्वविद्यालयाः समुद्घाटिताः। तेषुविश्व-विद्यालयेषु छात्राः संस्कृतम् अधिगच्छन्तु। तदर्थं बहुविधाकर्षणानि अपि समुत्तोलितानिवर्तन्ते। छात्रवृत्तिः छात्रेभ्यः दीयते, विभिन्नपुरस्काराः अपि तत्र छात्रेभ्यः प्रदीयमानाः भवन्ति। शासकीयाभिकरणानां केवलमेव एकं लक्ष्यमस्ति भारतीया प्राचीना इयं संस्कृतभाषाजनभाषा भवेत्। अधिकाधिकजनाः अनया भाषया भाषितुं प्रभवेयुः। एवमेव शासकीयेतरपिबहव्यः संस्थाः संस्कृतप्रचारे संलग्नाः वर्तन्ते। तत्र न केवलं संस्थाः एव संलग्नाः वर्तन्ते तत्रविभिन्नाः पत्र-पत्रिकाः वर्तन्ते, याभिः पत्र-पत्रिकाभिः संस्कृतस्य सततं प्रकाशः प्रवाहः चक्रियमाणः वर्तते। बाहुल्येन तत्र संस्कृतभारती, श्रीनिवास-गुरुकुलं, अन्नपूर्णागुरुकुलं एवम्भूताः अनेकाः संस्थाः सन्ति। याः संस्थाः वैयक्तिकरूपेण शासकीयेतराभिकरणरूपेणसमाजे संस्कृतस्य प्रचारंप्रसारं

वर्धनं संवर्धनं च कुर्वत्यः वर्तन्ते। विभिन्नानां संस्कृतविश्वविद्यालयानाम् अकादमीनाञ्च सूचनामात्रम् अत्र उस्थाप्यते तत्स्थले व्यापकरूपेण प्राप्तुं शक्यते।

भारते/विश्वे संस्कृतविश्वविद्यालयाः शासकीयेतराभिकरणरूपेणविश्व-विद्यालयाः देशे अनेके विश्वविद्यालयाः कार्यं विदधानाः वर्तन्ते ते यथा-

1. सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी उत्तरप्रदेशः 1958।
2. त्रिभुवनसंस्कृतविश्वविद्यालयः, काठमाण्डू नेपालम् 1959।
3. कामेश्वरसिंहदरभङ्गा-संस्कृतविश्वविद्यालयः, दरभङ्गा, बिहारम् 1961।
4. श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी, उडीसा 1981।
5. श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः, कालडी, केरलम् 1994।
6. महर्षिमहेशयोगिवैदिकविश्वविद्यालयः, जाबालिपुरम्, मध्यप्रदेशः 1995।
7. कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः, रामटेकम्, महाराष्ट्रम् 1997।
8. जगद्गुरुश्रीरामानन्दाचार्यसंस्कृतविश्वविद्यालयः, जयपुरम्, राजस्थानम् 2001।
9. देवसंस्कृतविश्वविद्यालयः, हरिद्वारम्, उत्तराखण्डम् 2002।
10. उत्तराखण्डसंस्कृतविश्वविद्यालयः, हरिद्वारम्, उत्तराखण्डम् 2005।
11. सोमनाथसंस्कृतविश्वविद्यालयः, जूनागढम्, गुजरातम् 2005।
12. श्रीवेङ्कटेश्वरवैदिकविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः 2006।
13. महर्षिपाणिनिसंस्कृतविश्वविद्यालयः, उज्जैनम्, मध्यप्रदेशः 2008।

14. कर्णाटकसंस्कृतविश्वविद्यालयः, बैङ्गलुरु, कर्णाटकम् 2010।
15. श्री चन्द्रशेखरसरस्वतिविश्वविद्यालयः कञ्चिपुरम्, तमिलनाडु।
16. श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः (संस्कृत-विद्यापीठम्) कटवारिया सराय, नवदेहली 1989।
17. राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, आन्ध्रप्रदेशः 1989।
18. राष्ट्रियसंस्कृतसंस्थानम् (केन्द्रीयसंस्कृतविश्वविद्यालयः) जनकपुरी, नवदेहली 2002।
19. बाल्मीकिसंस्कृतविश्वविद्यालयः, कैथलम्, हरियाणा।

इमे सर्वेऽपि विश्वविद्यालयाः स्वस्वस्तरे कार्यं विदधानाः सन्ति येषां विशेषावधानं समाजकल्याणदृष्ट्या संस्कृताधारेण च वर्तते।

**राष्ट्रियसंस्कृतसंस्थानस्य परिसराः अधुनातनं नाम केन्द्रीय-संस्कृतविश्वविद्यालयः।**

असौ विश्वविद्यालयः अनेकपरिसराणां माध्यमेन संस्कृतं सेवमानः वर्तते अस्य परिसरः यथा-

1. गंगानाथझापरिसरः, इलाहाबादः, उत्तरप्रदेशः।
2. श्री रणवीरपरिसरः, जम्मू काश्मीरञ्च।
3. श्रीसदाशिवपरिसरः, पुरी, उडीसा।
4. गुरूवायूरपरिसरः, पुरानाटुकरा, त्रिचूर, केरला।
5. जयपुरपरिसरः, जयपुरम्, राजस्थानम्।
6. लखनऊपरिसरः, लखनऊ, उत्तरप्रदेशः।
7. राजीव गांधीपरिसरः, श्रृंगेरी, कर्णाटक।
8. गरलीपरिसरः, गरली, हिमाचलप्रदेशः।
9. भोपालपरिसरः, भोपालम्, मध्यप्रदेशः।
10. के. जे. सौमैयासंस्कृतविद्यापीठम्, मुम्बईपरिसरः, मुम्बई महाराष्ट्रम्।

11. रघुनाथकीर्तिपरिसरः देवप्रयागः, उत्तराखण्डम्।
12. एकलव्यपरिसरः, अगरतला, असम

**अन्यानि आदर्शसंस्कृतविद्यापीठानि**

- ➢ कालीकटआदर्शसंस्कृतविद्यापीठम्, बालुशेरी पि.ओ., कालीकट, केरला- 673612।
- ➢ केरलस्य आदर्शसंस्कृतशोधसंस्थानम्।
- ➢ चिन्मय-इन्टरनेशनल फाउण्डेशन (शोध संस्थानम्), आदि-शंकरनिलयम्, वेलियनाडु पि.ओ.।
- ➢ एरणाकुलम्, केरला-682319।
- ➢ केरलस्य सर्वकारीयसंस्कृतमहाविद्यालयः।
- ➢ सर्वकारीयसंस्कृतमहाविद्यालयः, तिरुवनन्तपुरम्।
- ➢ श्रीरामवर्मा संस्कृतकलालयः, तृप्पूणित्तुरा।
- ➢ श्रीनीलकण्डसंस्कृतकलालयः, पट्टाम्बि।

एतानि अतिरिच्यापि अनेकानि आदर्शसंस्कृतविद्यापीठानि कार्यं कुर्वन्ति। भारते विद्यमानाः संस्कृत-अकादम्यः देशे अनेकाः संस्कृत-अकादम्यः कार्यं विदधानाः वर्तन्ते ते यथा-

**क्र.सं. अकादमी स्थानम् राज्यम्-**

1. उत्तराञ्चल-संस्कृत-अकादमी, हरिद्वारम्, उत्तराखण्डम्।
2. कालिदास-संस्कृत-अकादमी, उज्जैनम्, मध्यप्रदेशः।
3. दिल्ली-संस्कृत-अकादमी, झण्डेवालान्, नवदेहली।
4. उत्तरप्रदेश-संस्कृत-संस्थानम्, लखनऊ, उत्तरप्रदेशः।
5. हरियाणा-संस्कृत-अकादमी, पञ्चकुला, हरियाणा।
6. हिमाचल-संस्कृत-अकादमी, शिमला, हिमाचलप्रदेशः।
7. राजस्थान-संस्कृत-अकादमी, जयपुरम्, राजस्थानम्।

8. ओस्मानिया-संस्कृत-अकादमी, हैदराबादम्, आन्ध्रप्रदेशः।
9. जम्मू एवं कश्मीर-संस्कृत-अकादमी, जम्मूतवी जम्मू/ काश्मीरम्।

**शासकीयेतराभिकरणरूपेण संस्थाः-**

बाहुल्येन तत्र संस्कृतभारती, श्रीनिवासगुरुकुलं, अन्नपूर्णागुरुकुलं एवम्भूताः अनेकाः संस्थाः सन्ति। याभिः संस्कृतप्रचारदृष्ट्या कार्यं विधीयते-

**संस्कृतभारती**

चत्वारिंशतः वर्षेभ्यः संस्कृतभारती इति संघटनं तु समग्रं विश्वम् अभिव्याप्य वर्धनमानम् अस्ति अस्माभिः ज्ञायते। किमिदं **संस्कृतभारती** इति संघटनमिति प्रश्नः सहजं मनसि समुदेति। तथा एकं संघटनं विश्वस्तरे विराजते इत्युक्ते तस्य आधारभूता विचारशक्तिः अपि तथैव महत्त्वपूर्णा भवति। तत् ज्ञातव्यं चेत् **संस्कृतभारती** इति पुस्तकं पठनीयम्। केवलं पुस्तकं रचनीयम् इति इदं न रचितम्। चत्वारिंशदधिकवर्षाणि यावत् ग्रामे ग्रामे स्थाने स्थाने यत् जीवितं यद् आचरितं, यच्च प्राणितं तस्य सर्वस्य आधारेण यत्सारभूतं प्राप्तं तस्य लिपिरूपा कृतिरियम्। आकारेण लघ्वी प्रभावेण गौरीशङ्करशिखरसमा संस्कृतभारती। नूतनेभ्यः संघटनपरिचयं प्राचीनेभ्यः विवेकं विचारशक्तिं च कल्पयति संस्कृतभारती। कार्यं, सङ्घटनम्, कार्यक्रमाः, कार्यपद्धतिः, अधिष्ठानम् इति पञ्च विभागाः सन्ति। कार्यक्रमाः इत्यत्र स्थानीयस्तरे, जनपद-महानगर-राज्यस्तरे इति विभागद्वयं वर्तते। कार्याणि कानि? कार्यक्रमाः के? कः तयोः भेदः? के कार्यक्रमाः कस्मिन् स्तरे आयोजनीयाः? कार्यस्य पृष्ठभूमिका का कार्यक्रमस्य चिन्तनभूमिका का? इत्येवं बहवः विषयाः इतो ज्ञायन्ते। सङ्घटनं नाम किम् इति ज्ञेयं चेत् **संस्कृतभारती** शरणीकरणीया। संघटने कार्यपद्धतिः नाम किम्? कुतः सा प्रधानभूता? अपि अस्माकं कार्यं कार्यपद्धत्याः अनुसारेण अस्ति? इत्यादिकं तु **संस्कृतभारत्याः** पठनेन एव ज्ञायते। बहवो हि अंशाः ज्येष्ठकार्यकर्तृभिः आचरणेन शिक्षिताः स्युः यद्यपि तथापि अस्माकं वैचारिकस्पष्टतार्थं स्वयं पठनीयाः एतादृशाः ग्रन्थाः। अग्रिमलेखेऽपि बहूनां संस्थानां समुल्लेखः

कृतः अस्ति।

**भारतवर्षे प्रकाश्यमानानां संस्कृतपत्रिकाणां सूची-**

1. गाण्डीवम् (साप्ताहिकी) गाण्डी-वकार्यालयः, सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः वाराणसी, उत्तरप्रदेशः।
2. संस्कृतसाकेतम् (पाक्षिकी) साकेतकार्यालयः, अखिलभारतीय-विद्वत्समितिः, अयोध्या, उत्तरप्रदेशः।
3. सूर्योदयः (मासिकी) भारतधर्ममहामण्डलम्, जगद्गञ्जम्, लघुरावीरः, वाराणसी, उत्तरप्रदेशः।
4. भारती (मासिकी) भारतीभवनम्, बी-14, विजयखन्नानगरम्, जयपुरम्, राजस्थानम्।
5. पारिजातम् (मासिकी) 05/94, प्रेमनगरम्, कर्णपुरम्, उत्तरप्रदेशः।
6. दिव्यज्योतिः (मासिकी) आनन्दजालम्, जाखु, शिमला, हिमाचल-प्रदेशः।
7. भारतोदयः (मासिकी) गुरुकुलमहाविद्यालयः ज्वालापुरम्, हरिद्वारम्, उत्तराखण्डम्।
8. अजस्रा (त्रैमासिकी) अखिलभारतीयसंस्कृतपरिषद्, महात्मा-गान्धिमार्गः, हजरतगञ्जम्, लखनवुः, उत्तरप्रदेशः।
9. विश्वसंस्कृतम् (त्रैमासिकी) विश्वेश्वरानन्दवैदिकशोधसंस्थानम्, साधु-आश्रमः, होशियारपुरम्, पञ्जाबः 151021
10. संस्कृतसम्मेलनम् (त्रैमासिकी) श्रीरामनिरञ्जनमुरारका संस्कृतमहाविद्यालयः, चौकम्, पटनानगरम्, बिहारः।
11. विश्वभाषा (त्रैमासिकी) विश्वसंस्कृतप्रतिष्ठानम्, रामनगरदुर्गम्, वाराणसी, उत्तरप्रदेशः।
12. अर्वाचीनसंस्कृतम् (त्रैमासिकी) देववाणीपरिषद्, आर-6, वाणीविहारः, नवदेहली-110059।

13. स्वरमङ्गला (त्रैमासिकी) राजस्थानसंस्कत-अकादमी, वीरेश्वर-भवनम् गणगौरीबाजारम्, जयपुरम्, राजस्थानम्।
14. संस्कृतप्रतिभा (वार्षिकी) साहित्यभवनम्, रवीन्द्रमार्गः नवदेहली- 110001।
15. शोधप्रभा (त्रैमासिकी) श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत-विद्यापीठम्, कटवारियासरायम्, नवदेहली-110016।
16. संस्कृतसञ्जीवनम्, मनोरमाभवनम्, मार्गसं. 6सी, राजेन्द्रनगरम्, पटना, बिहार-600016।
17. परिशीलनम्, उत्तरप्रदेशसंस्कृतसंस्थानम्, 'संस्कृतभवनम्', नया हैदराबादम् लखनवुः, उत्तरप्रदेशः-226007
18. अमृतवाणीअग्रवालविद्यापीठम्, हल्दीपदा बालेश्वरम्, ओडिसा-756027
19. आरण्यकम्। संस्कृतप्रचारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा, बिहार-802301
20. विमर्शः, लखनवुविश्वविद्यालयः, लक्ष्मणपुरम्, लखनवुः, उत्तरप्रदेशः।
21. संस्कृतविमर्शः, राष्ट्रियसंस्कृतसंस्थानम्, 56-57, इन्स्टी-ट्यूशनलएरिया, जनकपुरी, नवदेहली-110058
22. सम्भाषणसन्देशः (मासिकी) 'अक्षरम्', 8 तमः क्रोसः, फेज-2, गिरिनगरम्, बङ्गलुरुः, कर्णाटकम्-560085।
23. सुधर्मा (दैनिकसमाचारपत्रम्) 561, रामचन्द्र-अग्रहारम्, श्रीकान्तपावरप्रेसः, मैसूरम्, कर्णाटकम्-570004।
24. चन्दामामा (मासिकी) जे.वी.एल. प्लाजा, षष्ठतलम् 626, अन्ना सलाई, तेयनापेठम्, चेन्नई तमिलनाडुः-600018।
25. गैर्वाणी (मासिकी) संस्कृतभवनम्, प्रचारिणीसभा चित्तूरम्, आन्ध्र प्रदेशः-510700

26. सत्यानन्दम् (मासिकी) एड्बहीमपुरम्, राजमार्गः यादवपुरम् चित्तूरम्, आन्ध्रप्रदेशः-510700
27. भारतमुद्रा (मासिकी) पूर्णाकरम्, त्रिचूरम्, केरलः-680550
28. लोकसंस्कृतम् (पाक्षिकी) संस्कृतकार्यालयः, श्री-अरविन्द-आश्रमः पाण्डिचेरी-605002
29. गुजारवः (पाक्षिकी) गीतायनम्, नरहरिनगरस्य निकटम्, गुलमोहरमार्गः, अहमदनगरम्, महाराष्ट्रम्-414003
30. संविद् (पाक्षिकी) भारतीयविद्याभवनम् के.एस. मुंशीमार्गः, मुम्बई, महाराष्ट्रम्।
31. दूर्वा (पाक्षिकी) संस्कृतभवनम्, बाणगङ्गा, भोपालम्, मध्यप्रदेशः- 461002
32. पावमानी, गुरुकुलप्रभात-आश्रमः, टीकरी भोलाझालम्, मेरठम्, उत्तरप्रदेशः।
33. संस्कृतसौरभम्. विद्याभारती, प्रेमकुञ्जम्, विन्ध्यवासिनीपथः, कदमकुआँ, पटना, बिहारः।
34. वाक् (पाक्षिकसमाचारपत्रम्)11, नालापानीमार्गः, चुघवसतिः, देहरादूनम्, उत्तराखण्डम्-240001
35. अमृतभाषा कालिदासपुरम्, शान्तिनगरम्, हरिपुरम्, मोतीगञ्जम्, बालेश्वरम्, ओडिसा।
36. लोकभाषा सुश्रीः लोकभाषा-प्रचारसमितिः 197, बापूजीनगरम्, भुवनेश्वरः ओडिसा-577001
37. संस्कृतमञ्जरी (त्रैमासिकी) दिल्लीसंस्कृत-अकादमी, प्लाट नं. 5 झण्डेवालान, करोलबागः, नवदेहली-110005
38. देवसायुज्यम्, एल-6, नवविक्रमबागः, प्राध्यापक-आवासः, एम.एस.यू., प्रतापगञ्जम्, बडोदरा, गुजरातम्।
39. संस्कृत-संजीवनी, संस्कृतभाषापरिषद्, जयपुरम्।

40. दृग्-भारती, (समकालिकसंस्कृत-साहित्यसमीक्षापत्रिका) 1/32, एम.आई.जी. आवास विकास कॉलोनी योजना-3, झूसी। इलाहाबाद- 211019

41. कविभास्करी-राष्ट्रियसंस्कृतसंस्थानं 56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058

42. अर्वाचीनसंस्कृतम्, (अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्) देववाणीपरिषद् दिल्ली-6, वाणी विहारः, नवदेहली-110059 भारतम्।

**संस्कृतस्य अध्ययनाय अनेकाः**

- Sanskrit Websites
- www.sanskrit.nic.in
- www.rsvidhyapeetha.ac.in
- www.sanskritpromotion.in
- www.prabhodhinigurukula.org
- www.sanskritatstjames.org.u.k
- www.samskrithabharathi.in
- www.sibsrv.ac.in
- www.sa.wikipedia.org
- www.rasalabooks.org
- www.sambhashanasandesa.in
- www.navavani.org
- attingalskt.blogspot

**संस्कृतवार्तापत्रिकाः**

**दैनिकी -**

1. सुधर्मा
2. नवप्रभातम्

3. दिग्वार्ता
4. संस्कृतवर्तमानपत्रम्

**साप्ताहिकी-**

1. गाण्डीवम्
2. युगगतिः
3. शारदा
4. संस्कृतामृतम्

**पाक्षिकी-**

1. गुञ्चारवः
2. गोरखपुर चर्चा
3. दिशाभारति
4. संस्कृतसाकेतम्
5. हितसाधिका

**मासिकी-**

1. सम्भाषणसन्देशम्
2. रसना
3. अमृतभाषा
4. आर्षज्योतिः
5. गीर्वाणसुधा
6. गैर्वाणी
7. चन्दामामा
8. दिव्यज्योतिः
9. पारिजातम्
10. भारतोदयः

**द्वैमासिकी**

1. प्रियवाक्
2. सन्देशः
3. ज्योतिर्वेद-प्रस्थानम्

**त्रैमासिकी**-

1. अजस्रा
2. अर्वाचीनसंस्कृतम्
3. जाह्नवि
4. दिग्दर्शिनी
5. दुर्वा
6. नाट्यम्
7. विश्वभाषा
8. विश्वसंस्कृतम्
9. संविद्
10. संस्कृतवार्ता

**तशोधसन्देशः**

**षाण्मासिकी** -

1. आरण्यकम्
2. कथासरित्
3. सुरभारति
4. नन्दनवनकल्पतरु
5. महस्विनि
6. संस्कृतमन्दाकिनी
7. प्राचीसुधा

8. शिक्षास्मृतिः
9. शिक्षाप्रियदर्शनी

**वार्षिकी**-

1. पूर्णत्रयी
2. महस्विनी
3. जयन्ती
4. शोधप्रभा
5. शिक्षासन्देशः
6. मङ्गली
7. वेदविपासा
8. शिक्षामृतम्
9. वैष्णवी

उपसंहाररूपेण चिन्तयामः तर्हि भारते संस्कृतं भारतस्य गौरवभूताभाषा संस्कृतं विना नास्ति भारतस्य किमपिगौरवम् इति सर्वेऽपि विश्वेऽस्मिन् विश्वे अङ्गीकारं कुर्वन्ति। सर्वेषामपि तत्र एकमतभावः वर्तते संस्कृतमेव विश्वं पुनरेकवारम् उज्जीवयितुं शक्नोति संस्कृतमेव समाजे किञ्चित् नूतनम् आधानं विधातुं शक्नोति। संस्कृते एव एतादृशं सामर्थ्यं येन सामर्थ्येन संलिप्ताः मानवाः सम्पूर्णेऽस्मिन् विश्वे स्वीयं विशेषमाधानं विधातुं शक्ष्यन्ति। एवं च देहल्यां का स्थितिः इति विचार्यते-

## संस्कृतवाङ्मयप्रसाराय देहल्याः योगदानम्

संस्कृतभाषा नितरां वन्दनीया देवभाषात्वाद् वेदभाषात्वाच्च। संस्कृत-भाषायाः वाङ्मयम् अतितरां बृहद् अस्ति। संस्कृतभाषा सूक्ष्मा गभीरा सारगर्भा च वर्तते। वेदेषु या भाषा प्रयुक्ता विद्यते सा अपि संस्कृतभाषा एव। अतः समग्रेऽपि विश्वे संस्कृतस्य प्रसाराय प्रचाराय देहल्याः महद् योगदानं विद्यते। संस्कृतवाङ्मयस्य प्रसाराय देहल्यां सर्वकारीयसङ्घटनानि सर्वकारेतरसंस्थाः वैयक्तिकसंस्थाः च कार्यं कुर्वत्यः सन्ति।

संस्कृतवाङ्मयस्य प्रसाराय निरताः सर्वकारीयाः संस्थाः

- राष्ट्रिय-संस्कृत-संस्थानम्
- लालबहादुरसंस्कृतविद्यापीठम्
- संस्कृत-अकादमी
- देहलीविश्वविद्यालयस्य संस्कृतविभागः
- जवाहरलालनेहरू विश्वविद्यालयस्य संस्कृतविभागः

संस्कृतभाषायाः प्रसारं कुर्वत्यः देहल्यां सर्वकारीयेतराः संस्थाः

- संस्कृतभारती
- संस्कृतसंवर्धनप्रतिष्ठानम्
- श्रीनिवाससंस्कृतविद्यापीठम्
- विश्वहिन्दूपरिषदः संस्कृतविभागः
- संवादशाला
- आर्यसमाजस्य गुरुकुलानि

देहल्यां प्रसारकार्ये रताः पत्रपत्रिकाः

- विजयते
- भारतवर्षजनतादैनिकसंस्कृतम्
- शारदा
- दिशाभारती
- संस्कृतसंवादः
- संस्कृतप्रचारकम्
- संस्कृताऽमृतम्
- इण्डियन् नेचर
- संस्कृतरत्नाकरः
- अर्वाचीनसंस्कृतम्

- अनादिवाक्
- संस्कृतमञ्जरी
- संस्कृतवार्ता
- संस्कृतविमर्शः
- शोधप्रभा

संस्कृतस्य प्रसाराय निरतासु सर्वकारीयसंस्थासु राष्ट्रियसंस्कृतसंस्थानस्य विशिष्टं महत्त्वं विद्यते, अस्य विश्वविद्यालयस्य विभिन्नानि कार्याणि सन्ति। विश्वविद्यालयः सर्वत्रापि संस्कृतस्यप्रचारप्रसारकार्यं कुर्वन् अवलोक्यते। देहलीस्थितस्य अस्य विश्वविद्यालयस्य भारते विभिन्नाः परिसराः सन्ति, तत्र स्वस्वशास्त्रेषु निष्णाताः प्रकाण्डाः विद्वांसः संस्कृताध्यापनेनवीनसाहित्य-सर्जने, नवीनायामानां निर्माणे च संलग्नाः वर्तन्ते। अस्य विश्वविद्यालयस्य न केवलं परिसराः सर्वसाधनसम्पन्नाः द्वाविंशतिः आदर्शमहाविद्यालयाः अपि सन्ति। येषु महाविद्यालयेषु अनेके विद्वांसः संस्कृताध्यापने निरताः सन्ति। अध्ययनम् अतिरिच्य संस्थानं पाठ्यसहगामिक्रियाणाम् अपि आयोजनं करोति। कौमुदीमहोत्सवः- अस्मिन् महोत्सवे सर्वेऽपि परिसराः कस्यचित् नाट्यग्रन्थस्य मञ्चनं कुर्वन्ति। पुनः च प्रेरणार्थं प्रथमः द्वितीयः तृतीयः च पुरस्काराः अपि दीयन्ते। एवमेव युवमहोत्सवः अपि आयोज्यते। अस्मिन् महोत्सवे तु विभिन्नाः कार्यक्रमाः भवन्ति येषां माध्यमेन आवर्षं सञ्चाल्यमानगतिविधीनाम् आकलनं कर्तुं शक्यते। तथा च संस्थानम् अखिलभारतीयप्रतियोगिताम् अपि आयोजयति, यत्र भारतस्य संस्कृतच्छात्राः सर्वेऽपि भागं वोढुम् अर्हन्ति। अस्यां प्रतियोगितायां स्वर्णपदकं, रजतपदकं, कांस्यपदकं च दीयते।

एतत् सर्वं विहाय संस्थानेन संस्कृतस्य प्रसाराय विश्वस्मिन् विश्वे अनौपचारिककेन्द्राणि अपि चाल्यन्ते। यैः आभारतं संस्कृतस्य प्रचार प्रसारः च जायमानः परिदृश्यते। संस्कृतसंस्थानस्य मुक्तस्वाध्यायपाठ्यक्रमः अपि अद्भुतः अस्ति यत्र यः कोऽपि भागं स्वीकर्तुम् अर्हति। संस्थानं देहल्यां स्थितानां विद्यालयानां छात्राणां परस्परं प्रतियोगितां कारयति। छात्रान् च प्रोत्साहयति येन संस्कृतवाङ्मयस्य प्रसारः भवति।

लालबहादुरशास्त्रिसंस्कृतविद्यापीठम् अपि संस्थानस्य देहल्यां कार्यं करोति। अस्य विद्यापीठस्य अनेके छात्राः देहली-अधीनस्थसेवाचयनबोर्डमध्ये कार्यं कुर्वन्ति। तथा च भारतस्य विभिन्नक्षेत्रेषु संस्कृतस्य प्रसारं प्रचारं च कुर्वन्ति।

संस्कृत-अकादमी देहल्यां नितरां रोचकतया संस्कृतस्य कार्यं प्रोत्साहनदृष्ट्या च करोति। कविसम्मेलनं, संस्कृतसम्मेलनं, प्रतियोगिता, कवितापाठः, नाट्यमञ्चनं, विद्वत्सम्माननं, संगोष्ठी-आयोजनं, परिचर्चा-कार्यक्रमः इत्यादीनां कार्यक्रमाणाम् आयोजनम् अकादमी करोति। संस्कृत-वाङ्मयस्य प्रचारप्रसारयोः उत्तमं किञ्चन केन्द्रम् अकादमी अस्ति देहल्याम्।

देहलीविश्वविद्यालयस्य संस्कृतविभागः एवं च विभिन्नमहाविद्यालयानां संस्कृतविभागाः देहल्यां संस्कृतवाङ्मयस्य प्रचाराय प्रसाराय च सम्यक् कार्यं कुर्वन्तः अवलोक्यन्ते, अस्य विश्वविद्यालयस्य हिन्दूमहाविद्यालयस्य संस्कृतच्छात्राः संस्कृतेन सम्यक् व्यवहरन्ति, काव्यरचनादिकार्याणि अपि कुर्वन्ति तथा च देहल्यां संस्कृतप्रसारकार्यं कुर्वन्ति इति।

जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृतविभागः अपि देहल्यां संस्कृतस्य कार्यं करोति। अत्रत्याः छात्राः आचार्याः च शोधक्षेत्रे विभिन्नानि प्रसारकार्याणि नूतनकार्याणि च कुर्वन्तः सन्ति। शोधक्षेत्रे अयं विश्वविद्यालयः नवीनकार्याणि कर्तुं प्रयतते। एतेन संस्कृतस्य प्रसारः सम्यक् भवति।

## संस्कृतभाषानिमित्तं कार्यं कुर्वत्यः सर्वकारीयेतरसंस्थाः

संस्कृतभारती समग्रे भारतदेशे संस्कृतवाङ्मयस्य प्रसाराय कार्यं कुर्वती विद्यते। देहल्यां विभिन्नेषु स्थलेषु शिविरान्दोलनमाध्यमेन शिविरचालनं च कृत्वा प्रसारं प्रचारं च करोति। संस्कृतवाङ्मयस्य प्रचाराय विश्वस्य विभिन्नेषु देशेषु भारतस्य विभिन्नेषु राज्येषु ग्रामेषु च सर्वकारीयेतरसंस्थाः सर्वसमर्पणपुरस्सरं कार्यं कुर्वत्यः अवलोक्यन्ते, यासां माध्यमेन अद्यत्वे भारते विदेशेषु महान् प्रभावः संस्कृतं प्रति अवलोक्यते। विश्वसंस्कृतसम्मेलने श्रीमान् कुटुम्बशास्त्री महोदयः उक्तवान् 'यदा अहम् अमेरिकादेशं गतवान् तदा अस्य देशस्य जनाः संस्कृतं कदाचित् न अवगच्छेयुः इति विचिन्त्य

सरलसंस्कृतेन आङ्ग्लप्रयोगपुरस्सरं भाषणम् आरब्धवान्। एकहोरायाः मम भाषणात् परं संस्कृताध्यापनविषये वर्गविषये च तैः अनुवभवकथनं कृतम्। तदा अहम् आश्चर्यान्वितः सन् चिन्तयन् आसम् यत् सर्वेषाम् अपेक्षया मम एव संस्कृतं दुर्बलम् आसीत् इति।' तत्रत्यानां संस्कृतं शुद्धं परिष्कृतं प्रवाहपूर्णं च आसीत्। एषः प्रभावः संस्कृतभारत्याः एव आसीत्। संस्कृत-भारत्याः अनेके प्रकल्पाः सम्प्रति प्रचलन्ति, तेषु संवादशाला, शिविरम्, संस्कृतग्रामः, संस्कृतपाठ्यक्रमरचना, संस्कृतग्रन्थरचना, लघुकौमुदीयोजना, भाषाव्युत्पत्तियोजना विकीपीडिया योजना च।

देहल्याम् ऑल्डराजेन्द्रनगरे स्थितं संस्कृतसंवर्धनप्रतिष्ठानं संस्कृतकार्यम् आभारतं कुर्वत् अस्ति, तस्य विभिन्नाः योजनाः सन्ति यथा विद्यालये संस्कृतम्, परिचर्चा, टिटोरियलनिर्माणं, विकीपीडियाकार्यक्रमः ग्रन्थरचना इत्यादीनि अनेकानि कार्याणि प्रतिष्ठानं करोति।

श्रीनिवाससंस्कृतविद्यापीठम् अपि संस्कृतप्रचारकार्यार्थं सम्यक् ग्रन्थाध्ययनं प्रति छात्रान् प्रेरयति येन छात्राः प्रेरिताः सन्तः अग्रे शास्त्राणि अध्येतुं रुचिमन्तः भवन्ति। अस्य प्रतिष्ठानस्य अनेके योग्याः छात्राः सम्प्रति समग्रे देशे संस्कृतकार्यं कुर्वन्तः सन्ति। अस्य संस्थापकः व्यवस्थापकः आचार्यः च श्रीगोविन्दाचार्यवर्यः

विश्वहिन्दूपरिषदः संस्कृतविभागः संस्कृतप्रसारकार्यार्थं सर्वदा सक्रियः भवति। आभारतं तेन संस्कृतस्य सम्यक्तया प्रचारः प्रसारः वा क्रियते।

संवादशाला संस्कृतप्रसारकार्यं कुर्वती अस्ति, सम्पूर्णदेशात् विदेशेभ्यः च अनेके जनाः समागत्य संवादशालायां सम्यक्तया संस्कृतस्य अभ्यासं कृत्वा गच्छन्ति, वस्तुतः एतत् अभ्यासकेन्द्रं वर्तते इति वक्तुं शक्यते। पञ्चदशसु दिनेषु सम्यक् संस्कृतेन सम्भाषणकौशले दाक्ष्यं समुत्पाद्य अनेके सर्वत्रापि संस्कृतेन भाषितुं कृतसङ्कल्पाः सन्तः प्रतिष्ठन्ते। प्रायशः अष्टादशभ्यः देशेभ्यः समागत्य जनाः अत्र प्रशिक्षणं प्राप्तवन्तः।

आर्यसमाजस्य गुरुकुलानि अपि सम्यक्तया संस्कृतवाङ्मयस्य प्रसाराय प्रयतन्ते। अद्यत्वे भारतस्य सर्वेषु क्षेत्रेषु गुरुकुलानि सन्ति एव। तत्र

प्राचीन– व्याकरणपद्धत्या व्याकरणाध्यापनं क्रियते। छात्राः सम्यक् वेदानां व्याकरणादिग्रन्थानां च अध्ययनं कृत्वा आभारतं संस्कृतवाङ्मयस्य प्रसारं प्रचारं च कुर्वन्ति।

देहल्यां संस्कृतवाङ्मयस्य प्रसारकार्ये प्रायशः पञ्चदश पत्रपत्रिकाः रताः सन्ति। एताः संस्थाः देहल्यां विभिन्नप्रकारेण संस्कृतस्य प्रचारप्रसारकार्येषु रताः सन्ति, येन आधुनिकसमये जनानां मनःसु लेखनविषये अध्ययनविषये च प्रवृत्तिः समुत्पन्ना भवेत्। येषां पत्राणां माध्यमेन जनाः संस्कृतं पठन्ति लेखान् च लिखन्ति। संस्कृते कुत्र किं नूतनतया जायमानं वर्तते इत्यादीन् विषयान् अधिगच्छन्ति। येन संस्कृतवाङ्मयस्य प्रसारः भवति जनानां ज्ञानम् अभिवर्धते। पत्रिकाणां माध्यमेन देहली समुचितरीत्या संस्कृतकार्यं करोति इति अस्माभिः अवगन्तव्यम्।

निष्कर्षरूपेण वक्तुं शक्यते यद् देहल्यां संस्कृतवाङ्मयस्य प्रसारार्थं प्रचारार्थं च विभिन्नाः संस्थाः कार्यं कुर्वत्यः सन्ति, यत्र सर्वकारस्य अपि सहयोगः इतोऽप्यधिकः अपेक्षितः वर्तते। संस्कृतेन एव अस्य देशस्य गौरवं वर्तते इति तु सर्वैः अङ्गीक्रियते। परन्तु प्राथमिकस्तरे माध्यमिकस्तरे च संस्कृतस्य विकल्पत्वेन अन्ये भाषे स्थापिते स्तः इति तु निन्दनीयः विषयः। अतः वास्तविकरूपेण रोचकतया श्रद्धया गौरवपूर्णरूपेण संस्कृत–प्रसारार्थम् अस्माभिः सर्वैः अपि संस्कृतज्ञैः संस्कृतनादः संस्कृतजयघोषः च करणीयः येन संस्कृतं रक्षितं सुरक्षितं च भवेत् इति। वस्तुतः तु तदा एव संस्कृतस्य प्रसारः प्रचार : च भविष्यति यदा सर्वत्रापि संस्कृतविषयः अनिवार्यरूपेण स्वीकृतः भविष्यति। अतः अनिवार्यः विषयः संस्कृतं भवेत् इत्येतदर्थं सर्वाभिः एताभिः संस्थाभिः संस्कृतज्ञैः संस्कृतानुरागिभिः देशप्रेमिभिः च तथा प्रयतनीयम्।

## द्वादशोऽध्याय:

# संस्कृतभाषाविज्ञानम्

संस्कृतभाषाविज्ञानं स्वनिंस्वरविज्ञानं, ध्वनिविज्ञानं, रूपविज्ञानं, वाक्यविज्ञानम् इत्येतेषां संक्षिप्तपरिचय: चयनितप्रकरणेषु भाषाप्रयोगशालाया: सहायतया अभ्यासश्च इति विषयो: वर्तते। अस्मिन्विषये सर्वादौ अस्ति संस्कृतभाषाविज्ञानं किम्? वयं जानीम:- सार्थकमौखिकसाधनं भाषा। भावानां सार्थिकं मौखिकं च यत् साधनं वर्तते तत्साधनमस्ति भाषा। भाषया एव वयं स्वीयान् व्यवहारान् कर्तुं शक्नुम:। आत्मन: पूर्णप्रकाशनाय यदिकिमपि साधनमस्ति तत्साधनमस्ति भाषा। पुनश्च स्पष्टं विषयंप्रतिपादयितुं किञ्चसामर्थ्यमस्ति तत्सामर्थ्यमस्ति भाषा। न केवलम् एतावदेव भाषा वर्तते। अपितु मनन-चिन्तन-विचाराणां साधनमपि भाषा एव वर्तते। मननं भाषया एव क्रियते। चिन्तनं भाषया एव विधीयते। पुन: विचाराभिव्यक्ति: विचाराणां लेखनं वा भाषया एव भवितुमर्हति। अत: भाषा बहुमहत्त्वपूर्णं तत्त्वमस्ति भावाभिव्यक्ते:। लिखितं चास्ति, काव्यादर्शे-

**इदमन्दतम:कृष्णं जायते भुवनत्रयम्।**
**यदि शब्दा: ज्योति: आसंसारं न दीप्यते॥**

सम्पूर्णजगति भुवनत्रयेऽपि अन्धकार: स्यात् इति शब्दनामकं ज्योति: आसंसारं सम्पूर्णसंसारं न प्रकाशयेत्। अत: वयं वक्तुं शक्नुम: शब्दा: भाषा वा तादृशं एकं साधनमस्ति। येन साधनेन आप्लाविता: सन्त: वयं स्वीयान् विचारान्प्रकटयितुं शक्नुम:। अन्यान् अपि प्रकाशयितुं शक्नुम:। स्वम् आत्मानं वाप्रकाशयितुं प्रभवेम। द्विशतवर्षेभ्य: पाश्चात्त्यदेशेषु अस्मिन् विषये गम्भीरचिन्तनं प्रवर्तते। तत्र कश्चन वर्तते सर विलियम-जोनस-असौ षडशीत्युत्तरसप्तदशशततमे वर्षे संस्कृतभाषाया: लैटिन-ग्रीकभाषाभि: सह तुलनामकरोत्। तस्यैव आरब्धकार्यम् अद्य नूतनरूपेण दरीदृश्यते।

भाषाविज्ञानस्य आरम्भतः बहूनि नामानि अस्माभिः अवलोकयितुं शक्यन्ते। तत्र नामानि कानि-कानि वर्तन्ते इति यदा अस्माभिः विचार्यते तदा अस्ति कम्पेरिटिव ग्रामर, द्वितीयमस्ति कम्पेरिटिव फोलोलोजी, ग्लासोलोजी, अयं शब्दः ग्लासोलोजीशब्दः यः वर्तते सः सर्वादौ सप्तदशोत्तराष्टादशशततमे वर्षे डेविज इति नामकः कश्चनभाषाविद् प्रत्यपादयत। ग्लासोलोजी इति शब्दं सः समुत्पाद्यत। ततः परं एकाशीत्युत्तरनवदशशतमे वर्षे प्रीचर्ड इति नामधेयः कश्चन ग्लाटोलोजी इति शब्दं प्रत्यपाद्यत। पूर्वमासीत् ग्लासोलोजी ततः परं प्रीचर्डमहोदयः ग्लाटोलोजी इति शब्दं प्रत्यपाद्यत। इदानीं यावत् फिलोलोजी इति शब्दः अस्माभिः भाषाविज्ञानसन्दर्भे उपयुज्यमानः वर्तते। आङ्ग्ले सांइस ऑफ लेंग्वेज इति रूपेण अस्माभिः चिन्त्यते। वर्तमानं नाम यदि वयं विचारयामः संस्कृतभाषाविज्ञानस्य तर्हि वर्तमानं नाम वर्तते लिंग्विस्टिक्स इति। लैटिन इत्यस्य लिंगुवा इति शब्दस्य वर्तते जीभ तर्हि जिह्वया एव वयम् उच्चारयामः। जिह्वया एव सर्वविधं व्यवहारं कुर्मः। अतः लिंग्विस्टिक्स इति शब्दः अत्र अस्माभिः आधुनिकसमये समुपयुज्यते। एवञ्च फ्रांसे अस्य कश्चन शब्दः वर्तते लैंगिस्टिक इति शब्दः। भाषाविज्ञानार्थे फ्रांसदेशे लैंगिस्टिक इति शब्दः प्रचलितः वर्तते। नवदशशताब्द्यां लिंग्विस्टिकतः लिंग्विस्टिक्सरूपेण परिवर्तितं वर्तते इदम्। जर्मनदेशे स्पाकविसेनसाप्ट इति शब्दः भाषाविज्ञानरूपेण समुद्घोतितः वर्तते। रूसमध्ये यजिकान इजिका जानिये इति शब्दः अस्मिन् अर्थे प्रयुज्यमानः भवति। यजिका इति शब्दस्य अर्थः भाषा जनानिये इति शब्दस्य अर्थः वर्तते विज्ञानम्।

एवं कृत्वा भाषाविज्ञानस्य यदि वयम् इतिहासं पश्यामः तर्हि भिन्न-भिन्नरूपेण भिन्न-भिन्नदेशेषु भाषाविज्ञानं केनापि केनापि रूपेण समुद्घोतितं परिव्याप्तं च परिदृश्यते। सामान्यरूपेण यदि वयं विचारयामः तर्हि भाषाविज्ञानस्य अस्मिन् समये जिह्वायाः भाषायाः च विकासः संस्कृतं विशिष्य मुख्यभाषारूपेण वर्तते। यस्य यथा उच्चारणं तस्य तथा एव व्यवहारः इत्यादिकं क्रियते इति कारणेन च संस्कृतभाषाविज्ञानं बहुमहत्त्वपूर्णम् आधानं स्वीयम् उपस्थापयति। भाषाविज्ञानं प्रत्येकं वर्णपदवाक्यानां सूक्ष्मत-मावयवानां विवेचनं विश्लेषणं च करोति। भाषाविज्ञानं यदि वयं चर्चयामः

तर्हि वर्णानां विषये पदानां विषये वाक्यानां च विषये सूक्ष्मतमावयवाः वर्तन्ते। तेषां विश्लेषणं विवेचनं च भाषाविज्ञानं करोति।

लिखितञ्चास्ति श्लोकरूपेण–

**भाषायाः यत्तु विज्ञानं सर्वाङ्गं व्याकृतात्मकम्।**
**विज्ञानदृष्टिमूलं भाषाविज्ञानमुच्यते।**

भाषाविज्ञानम् एतद् वर्तते। अस्य भाषाविज्ञानस्य क्षेत्रं यदि विचारयामः तर्हि मानवमात्रं भाषाविज्ञानस्य क्षेत्रमस्ति। भाषाविज्ञानस्य क्षेत्रं मानवमात्रमस्ति। तदा वयं भाषाविज्ञानस्य कानिचन अङ्गानि विचारयामः। भाषाविज्ञानस्य कानि अङ्गानि वर्तन्ते। तर्हि अङ्गानि वयं चतुर्षु भागेषु विभक्तुं शक्नुमः। प्रथमः भागः वर्तते ध्वनिविज्ञानम्। द्वितीयः भागः वर्तते पदविज्ञानम्। तृतीयभागः अस्ति वाक्यविज्ञानम्। चतुर्थः भागः वर्तते अर्थविज्ञानम्।

## ध्वनिविज्ञानम्

ध्वनिविज्ञानविषये यदा अस्माभिः चिन्तनं क्रमेण क्रियते तर्हि प्राप्यते लघु एककः वर्तते ध्वनिः। सर्वादौ उच्चारणमेव भवति। ध्वनौ मूलतत्त्वानां विवेचनं विधीयते। ध्वनयः कति प्रकारिकाः वर्तन्ते इत्यादिकः विषयः अपि ध्वनिविज्ञाने एव वर्णितः वर्तते। तथैव ध्वनिवर्गीकरणं कीदृशमस्ति– इत्यादिविषयः पुनः कुतः ध्वनिः उत्पद्यते? कथं ध्वनीनां सम्प्रेषणं विधीयते एकाधिकध्वनीनां संयोगेन किं परिवर्तनं जायते। ध्वनिषु कथं तीव्रता मन्दता च जायते। एवञ्च स्वनिम स्वनिमि च किं वर्तते इत्यादीनां विषयाणां यत्र प्रतिपादनं व्यवस्थिततया च क्रियते तद् भवति ध्वनिविज्ञानम्। द्वितीयमस्ति पदविज्ञानम्।

## पदविज्ञानम्

पदविज्ञाने किं क्रियते? अनेकध्वनिभिः पदं समुत्पद्यते। एतस्य एव अपरं नाम अस्ति–रूपविज्ञानम्। परस्परस्य पदस्य घटकावयवाः के इत्यस्य विवेचनम् अस्मिन् क्रियते। पदानां विभाजनं कथं भवितुमर्हति इत्यस्यापि विवेचनं पदविज्ञाने भवति। लिङ्गविभक्तिवचनपुरुषकालप्रकृतिप्रत्ययोप–सर्गतत्त्वानि कानि कः एतेषां तत्त्वानामुपयोगः इत्यादि विवरणमपि सुसम्यक्तया

पदविज्ञाने एव विधीयते। शब्दपदयोः को भेदः? इत्यपि पदविज्ञाने एव विवरितं भवति। अनन्तरमस्ति पदनिर्माणं कति प्रकारकम्? पदनिर्माणं कथं जायते? इत्यादिकं यत्र विवरणं भवति तदस्ति पदविज्ञानम्। तदनु आयाति वाक्यविज्ञानम्।

### वाक्यविज्ञानम्

वाक्यविज्ञानं किमिति यदा विचार्यते तर्हि अनेकपदैः वाक्यं भवति। अत्र वाक्यविज्ञाने वाक्यानां संरचना कथं भवति? पदानाम् अन्वयः कथं जायते? अन्वयाधारः कः भवति? अन्वयस्य आधारः कः? पुनः कर्तृकर्म-क्रियादीनां निवेशः कुत्र जायते? वाक्यस्य कति भेदाः वर्तन्ते? वर्णात्मकं वाक्यम् ऐतिहासिकं वाक्यम् अनन्तरं वर्तते। तुलनात्मकं वाक्यम्। अनन्तरमस्तितुलनात्मकवाक्यात्परमस्ति। एवं सर्वेषां वाक्यानाम् अत्र विवरणं विधीयते वाक्यविज्ञाने। तदनु अस्ति अर्थविज्ञानम्।

### अर्थविज्ञानम्

अर्थविज्ञानम् इत्यस्य वर्तते आत्मार्थः कः? अर्थः कः भवति? शब्दार्थयोः कः सम्बन्धः? अर्थनिर्धारणं कथं जायते? अर्थपरिवर्तनं कथं भवति? अर्थपरिवर्तनस्य दिशाः काः सन्ति? अर्थपरिवर्तनस्य कानि कारणानि वर्तन्ते? पुनश्च समकालीनाध्ययनम् ऐतिहासिकाध्ययनं तुलनात्मकमध्ययनं पर्यायवाचीशब्दाः के? नानार्थकशब्दाः के? विलोमशब्दाः के? इत्यादीनां यत्र विवेचनं वर्तते तद् वर्तते अर्थविज्ञानम्। आहत्य यदि वयम् उपसंहाररूपेण चिन्तयामः तर्हि भाषाविज्ञानस्य यानि मुख्यानि अङ्गानि वर्तन्ते। तानि अङ्गानि यदि वयं व्यवस्थिततया अवगच्छामः तर्हि वयं भाषायाः लघुतम-अन्वितितः बृहत्तम-इकाईपर्यन्तं वाक्यनिर्माणं वाक्यखण्डनिर्माणं गद्य-पद्यनिर्माणम् एकस्य उपन्यासस्य निर्माणपर्यन्तम् आत्मनः विकासं कर्तुं प्रभवामः। यदि भाषाविज्ञानस्य प्रत्येकमङ्गं सम्यक्तया अधिगच्छामः। तदा तत्र बाहुल्येन चत्वारि अङ्गानि वर्तन्ते। ध्वनिविज्ञानं पदविज्ञानं वाक्यविज्ञानं अर्थविज्ञानञ्च। एतेषु चतुर्षु ध्वनिविज्ञानेषु सर्वमपि यद् भाषाशास्त्रमस्ति यद् भाषाविज्ञानमस्ति तत् सम्पूर्णमपि च भाषाविज्ञानं सुव्यवस्थिततया समुत्पादितं प्रतिपादितं च वर्तते।

## ध्वनिविज्ञानम्

ध्वनिविज्ञानं किम्? अधुना वयं विचारयामः। ध्वननं ध्वनिः ध्वन्यते इति ध्वनिः। ध्वनिविज्ञानं बहुमहत्त्वपूर्णः विषयः वर्तते। फोनोलोजी इति शब्दः एतदर्थं प्रसिद्धः वर्तते अपरश्च कश्चन शब्दः वर्तते फोनेटिक्स इति शब्दः। ग्रीकभाषायाः फोनोशब्दात् ध्वनिविज्ञानं निष्पन्नं वर्तते। अत्र शब्दद्वयमस्ति एकः शब्दः वर्तते फोनोलोजी। द्वितीयः शब्दः वर्तते फोनोटिक्स इति। फोनोलोजी इति शब्दस्य वर्तते अधिकव्यापकार्थबोधकः फोनोलोजी शब्दः वर्तते। द्वितीयम् अत्र फोनेटिक्स स्वनिम स्वनिमि फोनेमिक्स इत्यादीनां सर्वेषामपि पदानाम् अन्तर्भावः भवति। फोने फोनोलोजी मध्ये। अतः व्यापकार्थः व्यापकशब्दः कश्चन वर्तते फोनोलोजी। द्वितीयः शब्दः वर्तते फोनेटिक्स अत्र ध्वनिशिक्षा, ध्वनिपरिभाषा, भाषाविविधध्वनयः, वाग्यन्त्राणि, ध्वनीनां वर्गीकरणम् इत्यादयः विषयः फोनेटिक्स इत्यत्र अन्तर्भूताः भवन्ति। परन्तु व्यापकरूपेण यदि कश्चन शब्दः अस्माभिः विचार्यते तर्हि ध्वनिविज्ञाने फोनोलोजी इति शब्दः कश्चन व्यापकशब्दः वर्तते व्याप्यशब्दः तु फोनेटिक्स इति वर्तते किमर्थमिति चेद् यदि विचार्यते तदा फोनेटिक्स फोनोलोजी इत्यत्र अन्तर्भूतः शब्दः वर्तते। ध्वनिविज्ञानं यदि वयं संस्कृतभाषया चर्चयामः तर्हि **ध्वनेर्विश्लेषणं शिक्षा वर्णनं च विभाजनं परिवृत्त्यादि इतिहासश्च ध्वनिविज्ञानमुच्यते।** ध्वनिविज्ञानं किमिति यदा वर्णनं क्रियते तर्हि ध्वनेर्विश्लेषणं भवति। तादृशी शिक्षा एव ध्वनिविज्ञानरूपेण वर्ण्यते। वर्णनं च विभाजनं यत्र वर्णनमपि भवति विभाजनमपि भवति तद् ध्वनिविज्ञानं भवति। परिवृत्यादि इतिहासश्च ध्वनेः इतिहासः कः? इत्यादि परिवर्तनादि इतिहासः कः? इत्यादीनां यत्र वर्णनंभवति। परिवृत्त्यादि इतिहासस्य वर्णनं भवति। तद् ध्वनिविज्ञानमुच्यते। नाम परिवर्तनं ध्वनेः कथं जायते? इत्यादीनां विषयाणां यत्र वर्णनं सुष्ठुतया जायते। तद्ध्वनि-विज्ञानमुच्यते। आहत्य यदि ध्वनिविज्ञानं वयं चिन्तयितुमिहामहे तर्हि ध्वनिविज्ञानं तद्विज्ञानमस्ति यत्र ध्वनेः विश्लेषणं वर्णनं च भवति। ध्वनेः प्रतिपदं विभाजनं क्रियते। एवञ्च ध्वनेः परिवर्तनं कथं भवति? इत्यादि इतिहासस्यापि चर्चा भवति। तद् ध्वनिविज्ञानं भवति। इदानीं प्रश्नः उदेति

ध्वनिविज्ञानस्य का आवश्यकता वर्तते? तदा ध्वनिविज्ञानस्य आवश्यकतां यदा वयं चिन्तयामः तर्हि ध्वनीनां ज्ञानम् उच्चारणशिक्षा। ध्वनीनां ज्ञानमेव उच्चारणशिक्षां परिबोधयति। यतः ध्वनिः उच्चारणं सम्यक् भविष्यति तर्हि तद् ध्वनितः शब्दः अपि समीचीनः भविष्यति। नो चेत् उच्चारितशब्दा अपि सुष्ठुशब्दाः न स्युः। अत एव लिखितमस्ति– **एकः शब्दः सम्यक्ज्ञाता सुप्रयुक्तः स्वर्गे लोके च कामधुक् भवति।** एवमेव एका पङ्क्तिः अपरा अपि वर्तते। अत्रैव ध्वनिविज्ञानस्य अन्तर्भूतता अस्माकम् अवगन्तुं शक्यते।

**यद्यपि बहूनाधीषे पठ पुत्र तथापि व्याकरणं स्वजनः श्वजनो माभूत् सकलं शकलं सकृत् शकृत्।** अर्थात् अतः वयम् अत्र ध्वनिविज्ञानस्य सन्दर्भे यदा चिन्तयामः तर्हि उच्चारणस्य महत्त्वभूताङ्गरूपेण ध्वनिविज्ञानं भवति यच्च उच्चारणे सहकारं करोति उच्चारणस्य आधारेणैव ध्वनिविज्ञानं संतिष्ठते इत्यपि अस्माभिः वक्तुं शक्यते।

ध्वनिविज्ञानस्य उपयोगितायाः विषये अस्माभिः अवगतम्। ततः परमस्ति मुख्याः बिन्दवः के ध्वनिविज्ञाने? तर्हि अत्र विषयत्रयम् अस्माभिः चिन्तयितुं शक्यते ध्वनिविज्ञाने एकं विश्लेषणं, द्वितीयं वर्णनं, तृतीयं वर्गीकरणञ्च। ध्वनिविज्ञानस्य विश्लेषणं शब्दानां पदानाञ्च विश्लेषणं वर्णनं तेषां वर्गीकरणञ्च। अत्र कश्चन एकः शब्दः समुद्भूतः भवति– स्वनिमविज्ञानम्। स्वनिमविज्ञानमेव संस्कृतभाषायां यदि वयं विचारयामः तर्हिध्वनिग्रामविज्ञानमिति उच्यते। एतवदेव **फोनीमिक्स** इति आङ्ग्लभाषायाः वर्तते। एतत्सन्दर्भे लिखितमस्ति। **स्वनिमाख्यं तु विज्ञानं मूलध्वनिविबोधकृत ध्वनिविश्लेषविप्रत्यालिप्यङ्कनमिहोद्यते**। भाषाविशेषसम्बद्धं साम्यवि– वृतिमूलकं ध्वनेः साम्यं च वैषम्यं विकृतिश्चेह वर्ण्यते। अत्र किमस्ति ध्वनिमाख्यं यद् विज्ञानं वर्तते तद् मूलध्वनेः बोधनं करोति। एवञ्च ध्वनिविश्लेषणं संद्योतयति। तथा च लिप्यङ्कनं कथं विधीयते तत् विषयं अपि स्वनिम इति प्रतिपादयति। भाषासम्बद्धम् एतद् वर्तते साम्यं पुनश्च भेदस्य एतदेव मूलकं भवति स्वनिम एव। तथा च ध्वनेः साम्यं किं वैषम्यं च किम्? इति विवेकमपि एतदेव समुत्पादयति स्वनिमविज्ञानमेव।

अतः लिखितमस्ति–

**भाषाविशेषसंबद्धौ लघिष्ठसार्थको ध्वनिः समध्वनेःप्रतिनिधिः भेदकृतस्वनिमो मतः**। स्वनिमः कीदृशः भवति? तर्हि प्रथममस्ति लघिष्ठः सार्थकध्वनिः भाषायाः सम्बद्धः कश्चन लघिष्ठसार्थकध्वनिः एव स्वनिमः मतः। अन्यत् च किमस्ति? तर्हि समध्वनेः प्रतिनिधिः समानध्वनिः यद् वर्तते समानध्वनिशब्दाः एव वर्तन्ते। तेषां प्रतिनिधिः वर्तते। पुनश्च भेदकृत् स्वनिमो मतः। अन्यध्वनिभ्यः यः भेदं जनयति। सः भेदजनकः एव अस्माभिः चिन्तयितुं शक्यते स्वनिमः इति। स्वनिमः एव भेदं जनयति भेदञ्च द्योतयति। स्वनिमविज्ञानस्य विभिन्नानि–विभिन्नानि स्वनिमस्य नामानि वर्तन्ते। तानि वयं यदि अवगच्छामः तर्हि स्वनिमविषये इतोऽपि स्पष्टज्ञानम् अस्माकं भवितुमर्हति। तत्र स्वनिमविज्ञानस्य कानि नामानि वर्तन्ते, तत्र यदि विचार्यते तर्हि एकमस्ति फोनीमिक्स।

एतद् वयम् आदौ विभज्य युञ्जमहे एकः शब्दः वर्तते फोन–द्वितीयशब्दः वर्तते फोनितृतीयशब्दः वर्तते फोनिमिक्स इति। फोनशब्दस्य अर्थः वर्तते स्वन् फोनिम् शब्दस्य अर्थः वर्तते स्वनिम–फोनिमिक्स–शब्दस्य अर्थः वर्तते स्वनिमविज्ञानमिति। फोन इत्यस्य प्रथमः शब्दः स्वन् द्वितीयः शब्दः वर्तते ध्वनिः। स्वन् इत्यस्य अर्थः वर्तते ध्वनिः। फोनिम् इत्यस्य स्वनिम, स्वनिम इत्यस्य अर्थः वर्तते ध्वनिग्रामः। फोनिमिक्स इत्यस्य स्वनिमविज्ञानं तृतीयशब्दः वर्तते **ध्वनिग्रामविज्ञानमिति**। स्वनिम–विज्ञानस्य फोनिमिक्स एतस्य एव अर्थः वर्तते **ध्वनिग्रामविज्ञानम्**। एषः शब्दः बहुप्रचलने वर्तते अधिकप्रचलितः शब्दः वर्तते ध्वनिग्रामविज्ञानमिति शब्दः। ततः वर्तते स्वनिमि स्वानिमि स्वनियमविज्ञानम् अयमपि शब्दः बहुप्रचलितः वर्तते ततः वर्तते स्वनग्रामिकी, ध्वनिग्रामिकी ततः परं ध्वनितत्त्वविज्ञानम्। ततः एव वर्तते ध्वनिमात्राविज्ञानं च।

तदनु आयाति **वर्णविज्ञानम्**। एतस्यैव अपरं नाम अपि अस्तिवर्ण–विज्ञानम्। कश्चन यः पृष्ठवान् आसीत् वर्णविज्ञानमपि एतस्य एव नाम वर्तते। अत्र वयं विचारयामः स्वनिमविज्ञानं किं भवति? तदा स्वनिमविज्ञानं फोनोमिक्स भाषान्तरस्य एकं प्रमुखमङ्गमस्ति। एतद् स्वनिम यद् वर्तते

फोनोमिक्स यद् वा वर्तते तद् भाषाविज्ञानस्य बहुमहत्त्वपूर्णमङ्गमस्ति। भाषाया: स्वनिमानाम् इत्युक्ते फोनिम् इत्यादीनां वैज्ञानिकविश्लेषणपद्धत्या: संकलनं यत्र क्रियते येन आधारेण प्रत्येकं भाषायै सुव्यवस्थितवैज्ञानिकलिपि: सज्जीक्रियते तद् वर्तते स्वनिम इति। स्वनिम इत्यस्य स्वरूपं यदि वयं विचारयाम: स्वनिम इत्यस्य स्वरूपं किमिति अस्माभि: विचार्यते। तदा एतद् एतस्य विषये बहूनाम् आचार्याणां भिन्नानि-भिन्नानि मतानि वर्तन्ते। तत्र एक: आचार्य: अस्ति।

ब्लूमफिल्ड डेनियल जोनसमहोदय:, स: कथयति भौतिक-इकाईरूपेण एतद् मन्यते।

द्वितीय: वर्तते एडवर्ड सपीरकुर्तिनमहोदय: असौ कथयति मनोवैज्ञानिकइकाईरूपेण स्वनिम वर्तते इति।

तृतीय: वर्तते प्रो. टवाडे अयं वर्तते अमूर्तकाल्पनिक-इकाईरूपेण स्वनिम: वर्तते।

अन्ये च केचन सन्ति चिन्तका: दार्शनिका: वा भाषावैज्ञानिका: ते वदन्ति बीजगणितीय-इकाईरूपेण वर्तते। एतेषां सर्वेषामपि आचार्याणां यदि वयं चिन्तनम् अङ्गीकुर्म: चिन्तयामश्च तदा विचारणेन ज्ञायते। स्वनिम फोनिम अमूर्तकाल्पनिक-इकाईरूपेण अधिकमुचितं मन्यते। एतदेव अमूर्त-काल्पनिक: एकक: इति रूपेण एतस्य अधिकमहत्त्वभूतमाधानं भवितुमर्हति। स्वनिम: ध्वनिसमूहस्य द्योतकोऽस्ति। अत: जातिरस्ति। स्वनिम: क: वर्तते? तर्हि ध्वनिसमूहस्य द्योतक: अस्ति। अत: एष: स्वनिम: जातिरूपेण अस्ति। अत्र विचारयाम: व्यक्तिजातिशब्दद्वयमस्ति। व्यक्ति: जाति:। व्यक्ति: मूर्त: भवति। जाति: अमूर्त: भवति। यथा प्रयोगे व्यवहारे च वयं पश्याम: स्वन् स्वन् संध्वनि: स्वनिम मूलस्वरूपं द्योतकमस्ति। मूलस्वरूपद्योतकमस्ति अमूर्तमस्ति जाति:। पश्यतु राम: यदि यदा वयम् उच्चारयाम: तदा व्यक्ति: राम: भवति तत्र जाति: रामत्वादिविशिष्टाजाति: काचिद् विशेष:। स्वनिम फोनिम् इत्यस्य संक्षिप्तम् इतिहासं यदा वयं पश्याम:, एतस्य संक्षिप्तम् इतिहासं द्रष्टुमिच्छाम: तर्हि वर्णमालाकालादेव अस्य उत्पत्ति: वर्तते।

फोनिम्–शब्दस्यजन्मदाता हेवेड एषः षड्सप्तत्युत्तराष्टादशशततमे वर्षे एनं शब्दं प्रथमतया प्रयुक्तवान्। तदनु प्रो. ब्लूमफिल्ड एडवर्ड समीरः पुनश्च दासोल्यूरः प्रारम्भे एतस्य वर्धनं कृतवान् पुनः भाषाशास्त्री पाइक वर्नल्ड ब्लाक टेगर ग्लीसन पुनः असमिक पीशन टूवेजकाय टवाडेलहाकेट याकोसन इत्यादयः दार्शनिकाः अस्य शब्दस्य निष्पादने महत्त्वपूर्णं योगदानं प्रददुः। आरम्भतः एतस्य अनेके आचार्याः एतस्य विकासने स्वीयां महत्त्वपूर्णां भूमिकां प्रतिपादितवन्तः। तदनु अयं स्वनिमशब्दः प्रचलने आयातः। एतस्य वयं परिभाषाः ज्ञात्वा अर्थं ज्ञातुं शक्नुमः। अतः स्वनिमस्य परिभाषा स्वनिमभाषायाः लघु एककः वर्तते। एककः नाम इकाई।

**या समानध्वनीनां प्रतिनिधिः भवति।**
**एककः यः समानध्वनीनां प्रातिनिध्यं करोति।**

अन्यध्वनिभ्यः भिन्नः भाषाविशेषेण सम्बद्धाः भवति। यासु परिस्थितिषु एकः स्वनिमः आयाति साक्षात् तस्यामेव परिस्थितौ द्वितीयस्वनिमः न आयाति। प्रत्येकं स्वनिमः उच्चारणस्थान–प्रयत्नसमानताधारेण स्वनिमानां निर्धारणं जायते। स्वनिमसंघटकध्वनयः सनस्वनध्वनयः समुच्चयन्ते। स्वनियमस्य विशेषता यदा अस्माभिः विचार्यन्ते तदास्वनिमभाषायाः लघुतमः अखण्ड्यः एककः वर्तते। यथा आ इ उ च ट त प एते सर्वे स्वनिमः एव वर्तन्ते। द्वितीयमस्ति स्वनिमः समानध्वनीनां प्रतिनिधित्वं करोति। तृतीयमस्ति स्वनिमे अर्थपरिवर्तनशक्तिः भवति। यथा काल–गाल–लाल एते स्वतन्त्रशब्दाः वर्तन्ते। पश्यन्तु यत्रकालः अस्ति तत्र अकारः समानः वर्तते। गाल इत्यत्र अकारसमानध्वनिः वर्तते। किन्तु स्वनिमे अर्थपरिवर्तन–शक्तिः तु विद्यमानः भवति। स्वनिमसमीपवर्तिध्वनिभिः प्रभावितः भवति। एषः शब्दः समीपवर्तिभिः ध्वनिभिः प्रभावितः भवति। यथा लाल इति शब्दं पश्यतु लालशब्दे अकारः वर्तते। लूट इत्यत्र उकारः वर्तते। तुलटा इत्यत्र अत्रापि पश्यतु टा इत्यस्य तत्र समीपवर्ती प्रभावितः भवति स्वनिमः।

पञ्चममस्ति स्वनिमेषु ध्वन्यात्मकसमानतां प्रति प्रवृत्तिः भवति।

षष्ठमस्तिस्वनिमानां प्रवृत्तिः परिवर्तनं प्रति भवति। च ट त द

इत्यादिषु। प्रत्येकं भाषायां ध्वनिक्रमो भवति। स्वनिमस्य प्रकारद्वयं खण्ड्यः अखण्ड्यः च। खण्ड्यः इत्यत्र स्वर-व्यञ्जनम्, अखण्ड्य इत्यत्र मात्रा-स्वरः-बलाघातः-संङ्गमः-अनुनासिकता च। स्वनिमस्य प्रकारद्वयं खण्ड्यः अखण्ड्यः च। पुनः नवममस्ति केषुचिद् स्थलेषु स्वछन्दपरिवर्तनं यथा वयं पश्यामः यजमानःशब्दः अस्ति जजमानः इति उच्चारयामः। षट्कोणशब्दः वर्तते खट्कोण इति उच्चारयामः। ज्ञानशब्दः अस्ति ज्ञानम् उच्चारयामः। एवं स्वनिमस्य काश्चन विशेषताः अस्माभिः चिन्तयितुं शक्यन्ते। याभिः विशेषताभिः स्वनिमस्य एकं स्वरूपम् अस्माकं पुरस्तात् समुद्द्योतितं भवितुमर्हति। स्वनिमः संस्वनभेदः संस्वनस्वनिममध्ये कः भेदः वर्तते इत्यपि विचारयामः।

स्वनिमजाति वंशः वा यतः क् एकं स्वनिम एकमेव। संस्वन किमस्ति व्यक्तिःक् उच्चारणभेदेन। का की कि कु ता ला भिन्नं भिन्नमस्ति। किमपि कला कुल कलाम क च कसंस्वनम् एतत् सर्वेऽपि शब्दाः संस्वनरूपेण उच्चार्यन्ते। तर्हि स्वनिम्जातिरूपेण भवति, संस्वनव्यक्तिरूपेण भवति इति वयं विचारयितुं शक्नुमः, तर्हि जातिरूपेण का इति एकं ककारः कुत्रापि दृश्यते तर्हि सः एकः एव भवति। किन्तु अत्र जातिरूपेण यदा भवति तदा उच्चारणभेदेन का कु की कि इत्यादिभेदेन तस्य भेदत्वं समुत्पद्यते इति अस्माभिः संस्वनस्वनिममध्ये कश्चन भेदः अपि अनुमातुं शक्यते। आहत्य यदि वयं विचारयामः चिन्तनं वा कुर्मः तर्हि अत्र महीयान् भेदः नास्ति किन्तु अत्र स्वनिमः लघुतमः एककः (इकाई) वर्तते।

तद् वयं वर्णरूपेण अङ्गीकर्तुं शक्नुमः। एतस्य उच्चारणादिभेद-माध्यमेनापि एतस्य परिज्ञानबलेन वयं शुद्धोच्चारणप्रवृत्तौ अग्रे गन्तुमर्हामः। एतद् बलेनैव वयं सामाजिकव्यवहारान् समुत्पादयितुं शक्नुमः। तर्हि ध्वनिविज्ञानस्य किञ्च अङ्गरूपेण वयं संस्वन इति अनुमातुं शक्नुमः।

### पदविज्ञानम्

इदानीं क्रमप्राप्तविषयः वर्तते पदविज्ञानम्। अत्र प्रश्नः उदेति पदविज्ञानम् इत्युक्ते किम्? पश्यन्तु कस्मिंश्चिदपि वाक्ये विषयत्रयं

समुद्भूतं भवति। वाक्यं, पदं, वर्णश्च। वाक्यं तद् भवति येन माध्यमेन व्यवस्थितोऽर्थः प्रतिपादितः भवेत् तद्वाक्यम्। **पदं तद् भवति न सार्थकोऽर्थः। येन द्योतितः भवति तद् भवति पदविज्ञानम्। वर्णः इत्यस्य अर्थः वर्तते नार्थः इति वर्णः।** यद्यपि एतद् तात्कालिकरूपेणैव अस्माभिः स्वीक्रियते। पूर्णरूपेण एतत् सत्यं नास्ति यतः वर्णानामपि अस्मद् संस्कृतभाषायां तु कश्चन अर्थः भवत्येव। पदस्यापि अर्थः भवत्येव किन्तु वाक्येन व्यवस्थितार्थज्ञानं भवति। पदेन न सार्थकार्थः ज्ञायते। वर्णेन न अर्थः ज्ञायत एव साक्षात् कमपि वर्णम् उच्चारयामः चेत् च इति कथनमात्रेण कश्चनापि अर्थः समुद्योतितः न भवति। जलमिति उच्चारयामः तर्हि जल इति पदस्य किम्? कः अर्थः भवेत्? इति द्योतितं न भवति। कः अर्थः ततः ज्ञेयः भवेत् इत्यपि ज्ञातं न भवति। अतः पदम् इत्यस्य अर्थः वर्तते न सार्थकोऽर्थः इति तत्पदम्। किन्तु यदि वाक्यं प्रयुञ्जमहे तत्र जलपदस्य प्रयोगं कुर्मः। जलम् आनयतु। जलं पिबतु। जलेन स्नानं करोतु। जलम् उष्णं करोतु इत्यादिकं यदा वयं वाक्यानि वदामः तदा सार्थकः अर्थः ज्ञापितः भवति। तर्हि श्लोकमाध्यमेन यदि वयं पदविज्ञानं अवगन्तुमिहामहे तदा लिखितमस्ति–

**प्रकृतिप्रत्ययैर्मिश्रं सार्थकध्वनिसंगतम्।**
**रूपनिर्माणसम्बद्धं पदविज्ञानमिष्यते॥**

**भाषाविशेषसम्बद्धो लघिष्ठसार्थको ध्वनिः।**
**बद्धमुक्तगुणैर्युक्तो रूपिमा कथितो बुधैः।**

एतस्य अर्थः वर्तते – पदमित्युक्ते किं भवति? यत्र प्रकृतिप्रत्ययः मिश्रितः भवति। उदाहरणरूपेण पश्यामः रामः इति पदमस्ति। रामः इत्यत्र राम इति प्रातिपदिकमस्ति। सु इति प्रत्ययः वर्तते। पुनश्च रामः इति किमस्तिसार्थकध्वनिसंगतम्। सार्थकध्वनियुक्तम् एतत्पदं वर्तते। पुनश्च रूपनिर्माणसम्बद्धं रूपनिर्माणं नाम येन शब्देन कस्यचित् अर्थस्य ज्ञानं भवेत्। तादृशमेतद् पदविज्ञानम् अस्माभिः चिन्त्यते।

भाषाविशेषसम्बद्धो भाषया सह सम्बद्धः भवति अयं लघिष्ठः सार्थको ध्वनिः। लघिष्ठः नाम सर्वेषामपेक्षया लघुः कश्चन सार्थकध्वनिः

भवति पदम् इति। बद्धमुक्तगुणैर्युक्तः रूपिमः कथितः बुधैः। एतत् किं वृतं बद्ध एवं मुक्तगुणादिभिः युक्तं यद् वर्तते तद् रूपिमः इत्युक्ते पदविज्ञानं कथितं वर्तते। एकः अपरः अपि अत्र वाक्यपदीयकारेण कश्चन विषयः समुपस्थापितः वर्तते। **पदेन वर्णाः विद्यन्ते वर्णेषु अवयवा इव। वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन**। अर्थात्पदानां विवेकः अत्यन्तरूपेण तु वाक्ये एव भवति इतरत्र न भवति। तर्हि विषयद्वयम् अवगन्तव्यम् एकं भवति पदं द्वितीयः भवति शब्दः। शब्दः इत्युक्ते वर्तते सार्थकध्वनिसमूहः। अत्र पदमिति भवति तत्र प्रकृति-प्रत्ययसम्पृक्तं भवति पदम्। शब्दः इति भवतिप्रातिपदिकम्। यत्र प्रकृतिः भवति तत् प्रकृतिः शब्दरूपेण भवतु धातुरूपेण वा भवतु। साप्रकृतिः प्रातिपदिकम् इत्युच्यते। अत्र अस्माकं ग्रन्थेषु लिखितमस्ति - न केवला प्रकृतिः प्रयोक्तव्या नापि केवलः प्रत्ययः। न तु केवलं प्रकृतेः प्रयोगः अर्थावगमकारी भवति। न तुकेवलं प्रत्ययस्य प्रयोगः अर्थं गमयति। तर्हि किं पदमेव प्रयुञ्जमहे। अतः एव कथितमस्ति अपदंन प्रयुञ्जीत। अपदं नाम केवलं प्रकृतेः प्रयोगः न कर्तव्यः व्यवहारे। तर्हि प्रकृतिः कीदृशी भवतितर्हि वयं यदि चिन्तयामः तर्हि त्रिधा वयम् एतत् चिन्तयितुं शक्नुमः। रूढः, यौगिकः, योगरूढः च। रूढः इत्यस्य उदाहरणं वयं चिन्तयामः तर्हि मणिः, रत्नः, नुपुरः, आढ्यः, स्थूलः इत्यादयः ये शब्दाः वर्तन्ते ते सर्वेऽपि शब्दाः कीदृशाः वर्तन्ते रूढाः वर्तन्ते। एतानिसर्वाणि अपि पदानि रूढत्वं धारयन्ति। नाम एतस्य व्युत्पत्तिः अर्थः कश्चनापि न समुद्योतितः भवति। यौगिकं यदि चिन्तयामः तर्हि वयं यौगिकपदेषु कर्ता, कारकः, भौतिकः, धनवान् इत्यादीनि एतानि पदानि यौगिकानि भवन्ति। अत्र कृत्तद्धितः अस्ति मासादिप्रत्ययाः अन्तर्भूताः भवन्ति। कर्ता इत्यत्र कृधातोः तृच्प्रत्ययः वर्तते। तदा कर्तरिपदं निष्पद्यते। कारकमिति पदं यदा वयम् एतस्य पदपदार्थं चिन्तयामः, तर्हि कृधातोः ण्वुल्-प्रत्ययः कृतः, तदा कारकंकरोतीति कारकः। एते शब्दाः यौगिकाः वर्तन्ते। तृतीयः क्रमः भवति - **योगरूढः**। यौगिकाः अपि भवन्ति रूढानि अपि एतानि पदानि भवन्ति। यौगिकानि अपि एतानि पदानि भवन्ति। एतद् वयं विचारयामः।

पश्यन्तु सरसिज सरसिजा इति पदं वयं विचारयामः। सरसिजः इतिपदं किम्? सरसि जायते इति सरसिजः। कः भवति? तदा कमलमिति भवति। तर्हि कमलं किमस्ति? पङ्कजः। पङ्कात् जायते। पङ्के बहूनि वस्तूनि समुत्पद्यन्ते किन्तु पङ्के नाम यद्जलयुक्तं किञ्चित् नाम क्लिष्टं कीचड़ इति भवति। तत्र अनेके समुत्पद्यन्ते। किन्तु पङ्कजः इति यौगिकः अपि वर्तते रूढः अपि वर्तते। पङ्कजकथनमात्रेण कमलमेव स्वीकरिष्यते न तु इतरमिति किमपि। अनन्तरमस्ति पदं द्विधा भवति सुबन्तं तिङन्तञ्च। सुप्प्रत्ययाः आयान्ति तद् पदं भवति प्रातिपदिकात्। तिङन्तम् अष्टादश तिङ् प्रत्ययाः आगच्छन्ति। तेभ्यः तिङ्प्रत्ययाः आगच्छन्ति धातुभ्यः तिङ्प्रत्ययाः आगच्छन्ति। तदापि पदम् उपयुज्यते। तदा पदस्यैव प्रयोगः करणीयः भवति। यदि पदस्य वयं विभागं कुर्मः। विभागः कःपदस्य? तर्हि चत्वारः विभागाः वर्तन्ते। नाम-आख्यात-उपसर्ग-निपाताः। नाम इत्युक्ते संज्ञाशब्दाः वर्तन्ते पदानि एव। द्वितीयमाख्यात इत्युक्ते क्रियाशब्दाः। आख्यात इत्युक्ते क्रियापदानि। पठति, खादति, लिखति, वदति इत्यादिक्रियाशब्दाः प्रातिपदिकम् आख्यातरूपेण उपयुञ्जमहे। उपसर्गः इत्यत्र प्र परा अप सम इत्यादयः उपसर्गाः तेऽपि पदरूपेण अस्माभिः उच्चार्यन्ते। निपात इत्युक्ते च हा बहिः इत्यादिपदानि निपातरूपेण उच्चार्यन्ते।

आहत्य वयं निष्कर्षरूपेण यदि विचारयामः तर्हि संस्कृतजगति भाषाविज्ञाने चपदविज्ञानस्य महत्त्वभूतं स्थानं भवति। पदविज्ञानस्य ज्ञानं विना वयं वाक्यानि शुद्धतया उच्चारयितुं न शक्नुमः यतः यावत्पर्यन्तं प्रातिपदिकेभ्यः धातुभ्यः वा सुप्प्रत्ययः कृत्प्रत्ययः नसमुत्पद्यन्ते तावत्पर्यन्तं पदनिर्माणं न भवति, यावत्पर्यन्तं पदनिर्माणं न भवति तावत्पर्यन्तं तेषां व्यवहारः न शक्यते। तावत्पर्यन्तं वाक्यं शुद्धं न भविष्यति। तर्हि वाक्यस्य आधारस्तम्भरूपेण पदं भवति। तत्पदं तत्पदस्य यद् विज्ञानमस्ति तदेव विज्ञानं पदविज्ञानरूपेण उच्यते। एतदेव पदविज्ञानं अस्माकं वाक्यव्यवहारे अस्माकं भाषाशुद्धतायै भाषासहजतायै च महत्त्वपूर्णं योगदानम् आवहति इति। इह विश्वे भाषाविज्ञानम् अत्यन्तम् उपकारकं वर्तते। भाषाविज्ञानेन एव शब्दानां व्यवहारदृष्टिः समुत्पद्यते। व्यवहारेणैव कथमग्रे शब्दानां

नियन्त्रणादिकं कर्तव्यम् इत्यादीनामपि विकासः जायते। इतः पूर्वं पदविज्ञान-स्यापि सम्यक् चर्चा अस्माभिः कृता एव।

अधुना ध्वनिनियमानां विषये किञ्चित् अवगच्छामः। भाषासु यथा समयं परिवर्तनादि जायन्ते। अर्थात् भाषापरिवर्तनशीला वर्तते। सा एव भाषा स्वीयमस्तित्वं संरक्षति या भाषापरिवर्तनशीला भवति। सततं विकासं प्राप्तुं च यस्यां भाषायाम् अवसरः भवति। व्यापकपरिवर्तनानि नियमेन बद्धुं प्रयतन्ते। यानि परिवर्तनानि भाषायां जायन्ते, तानि सर्वाणि अपि परिवर्तनानि नियमसम्बद्धानि स्युः। नियमप्रतिबद्धानि स्युः। एतादृशा एव कतिपयनियमाः ध्वनिनियमाः उच्यन्ते ये व्यापकपरिवर्तनानि नियमेन बद्धुं प्रयतन्ते। तत्र ध्वनिनियमः, विज्ञाननियमः, प्राकृतिकनियमः च। यदि त्रिधा ध्वनिनियमाः अस्माभिः चिन्तयितुं शक्यन्ते। ध्वनिनियमः न तथा व्यावहारिकपरिवर्तनशीलाः ध्वनिनियमाः भवन्ति।

मानवव्यवहारः परिवर्तनशीलो अतः एकरूपता न सम्भवति। वयं जानीमः समाजव्यवहारेऽपि सर्वेषामपि व्यवहारः समानः न भवति। मानवस्य अपि व्यवहारः परिवर्तनशीलः इति कारणेन तत्र सततं परिवर्तनानि जायन्ते। कानिचन परिवर्तनानिकालविशेषे भवन्ति कानिचन परिवर्तनानि सहजतया जायन्ते एव। ये विज्ञाननियमाः भवन्ति ते तात्त्विकरूपेण कदापि परिवर्तनयोग्याः नभवन्ति। प्राकृतिकनियमः अनिवार्यः सार्वत्रिकः च। प्राकृतिकनियमाः ये भवन्ति तेअनिवार्याः अपि भवन्ति पुनः सार्वत्रिकाः अपि भवन्ति। सर्वत्र तेषां नियमानां सन्दर्भेसमानाभिमतमपि जायते।

ध्वनिनियमः ध्वनिनियमसम्बद्धाः काश्चन परिभाषाः सन्ति ताः परिभाषाः अवगच्छामः।

**परिभाषा-**

ध्वनिनियमस्य सम्बद्धता कयाचित् विश्वभाषया भवति। ध्वनिनियमः केनचित् कालविशेषेण सम्बद्धाः भवन्ति। तृतीयम् एतादृशः ध्वनिनियमाः कासुचित् विशेषपरिस्थितिषु भवन्ति। ध्वनिनियमाः विशेषध्वनिं प्रभावयन्ति। आहत्यपरिभाषाबलेन वयं ज्ञातुं शक्नुमः ध्वनिनियमस्य कश्चन सम्बन्धः

भाषाविशेषेण भवतिकालविशेषेण च सम्बन्धः एते भवन्ति। परिस्थित्या सह एते सम्बद्धाः भवन्ति। पुनश्च ध्वनिविशेषमपि एते प्रभावयन्ति। विशिष्टध्वनिनियमाः केचन सन्ति। अत्र प्रथमः नियमः अस्ति ग्रमनियमः। असौ नियमः याको क्रिम पुनश्च मैक्समूलर ग्रिमनियमः इत्यपि उच्यते। द्वितीयः नियमः वर्तते ग्रासमाननियमः। अयं नियमः हेडमणि ग्रासमान इत्यद् द्वाराप्रतिपादितः। तृतीयनियमः अस्ति वार्नरनियमः। असौ नियमः कार्लवार्नर इत्यनेन प्रतिपादितः। पुनः चतुर्थः नियमः वर्तते तालब्यनियमः। विलहेल्म थामसन द्वारा असौ नियमः समुत्पादितः। अनन्तरमस्ति मूर्धन्यः नियमः। प्रो. फोरतुन्नातो इत्यनेन असौ नियमःसमुत्पादितः। एवं भाषायाः नियमाः भवन्ति। ध्वनेः नियमाः भवन्ति ये नियमाः ध्वनेर्नियन्त्रणं व्यवस्थितीकरणं च संद्योतयन्ति। एतेषां नियमानां विस्तृताध्ययनम् अस्माभिः अवश्यं संकर्तव्यं करणीयमेव स्यात्।

## वाक्यविज्ञानम्

भाषाविज्ञानस्य महत्त्वभूतः विषयः भवति वाक्यविज्ञानम्। अत्रादौ विचारयामःवाक्यविज्ञानम् इत्युक्ते किम्? तत्र कश्चन प्रसिद्धः श्लोकः वर्तते–

**वाक्यानां रचनाभेदाः विवृत्तिपदक्रमः।**
**वाक्यविश्लेषणं चैव वाक्यविज्ञानमिष्यते।।**

वाक्यानां रचनाभेदाः। वाक्यानां कथं रचना करणीया? रचनाभेदाः कथंवर्तन्तेवाक्यानां तेषु परिवर्तनं कथञ्च जायते? पदक्रमः कः भवति वाक्यानाम्? वाक्यानां विश्लेषणं चैव यत्र वाक्यानां विश्लेषणं भवति तद् वाक्यविज्ञानमिष्यते। अस्मिन् वाक्यविज्ञाने विभिन्नपदानां परस्परं सम्बन्धविचारः क्रियते। पश्यामः चेत् अत्र महत्त्वभूतः विषयः अस्माभिः चिन्तनीयः। सर्वादौ अस्ति ध्वनिः। द्वितीयमस्ति पदम्। तृतीयमस्ति वाक्यम्। अत्र वयं यदि विचारयामः तर्हि ध्वनिः उच्चारणसम्बद्धोऽस्ति। शारीरिकव्यापारेण ध्वनिः उत्पद्यते। सत्प्राकृतिकतत्त्वस्य अत्र प्रधानता भवति। त् इत्युक्ते प्राकृतिकतत्त्वस्य यत्र प्राधान्यं वर्तते, तद् ध्वनिः भवति। तदैव द्वितीयमस्ति पदम्। पदमिति अस्माभिः इष्टिका इत्यपि चिन्तयितुं शक्यते। अत्र पदानां

विवेचनं भवति पदविभाजनं क्रियते। अत्र संज्ञा, क्रिया, विशेषणम्, कारकम्, वचनम्, लिङ्गम्, कालः, पुरुषादिबोधकाः शब्दाः कथं निष्पद्यन्ते इतिविचारः पदविज्ञाने क्रियते। अत्र ध्वनिसार्थकतयोः समन्वयः अत्र भवति ध्वनिः नाम शारीरिक-सम्बद्धः भवति ध्वनिः। सार्थकतया अर्थतापूर्वकता अत्र भवतीति कारणेन मानसिकपक्षसम्बद्धः भवति पदम् इत्युक्ते अत्र सत् चित् इति उभयं भवति नाम ध्वनौ केवलं सत् आसीत् परन्तु पदे सत् चित् इति उभयमपि भवति। तृतीयमस्ति वाक्यम्। वाक्यमित्युक्ते उभयम्। पदैः निर्मितशब्दानां कथमुपयोगः इति विचारः यत्र क्रियते तद् वाक्यं भवति। **ध्वनिसार्थकताविचाराणां समन्वयः वाक्यम्**। अर्थात् विचाराणाम् इत्युक्ते पूर्णाभिव्यक्तिः विचारैः जायते। अस्माकं या कापि अस्माभिः विधीयते सा च अभिव्यक्तिः अस्माकं विचारानुगुणमेव जायते। अर्थात् वाक्यमेव अभिव्यक्तरूपं भवति। तत्कारणेन अत्र सच्चिदानन्दे त्रयमपि अन्तर्भूतं भवति अर्थात् सदपि अस्ति, चित् अपि अस्ति, वाक्ये पुनश्च आनन्दः अपि भवति इत्युक्ते भावानुभूतिः, रसानुभूतिः, आनन्दानुभूतिः साधनं वाक्यम्। यत्र भावस्य अनुभूतिः जायते, रसस्य अनुभूतिः जायते, आनन्दस्यापि च अनुभूतिः जायते तद्वर्तते वाक्यम् अर्थात् पदसमूहो वाक्यम्। यत्र विविधानि पदानि सम्युक्तानि भवन्ति तद्वाक्यं भवति। वाक्यं भाषायाः सार्थकैककः भवति इत्युक्ते भाषायाः सार्थकैककः एव वाक्यमिति। पदवादः यः वर्तते तत्र अभिहितान्वयवादः। अभिहितान्वयवादः इति कुमारिलभट्टस्य वर्तते। तस्मादेव अभिहितानाम् पदानाम् अन्वयः अभिहितानाम् इत्युक्ते पदवादः। अन्वयः यत्र भवति तत्पदं भवति। वाक्यं किमस्ति? प्रभाकरः कथयति अन्विताभिधानवादः। अन्वितानां पदानाम् अभिधानं वाक्यं भवति। अन्वितानां नाम वाक्यवादः। पदेन वर्णाः विद्यन्ते वर्णेषु अवयवानां न च वाक्यात्पदानाम् अत्यन्तं विवेको न कश्चन। अत्र अस्माभिः यदि विचार्यते, तर्हि वाक्यप्रयोगस्य मनोवैज्ञानिकपक्षाः यदि चिन्त्यते तर्हि अत्र चत्वारः विषयाः अन्तर्भूताः भवन्ति।

प्रथममस्ति चिन्तनम्। द्वितीयमस्ति चयनम्। तृतीयमस्ति भाषिकघटनम्। चतुर्थमस्ति उच्चारणम्। तर्हि वाक्ये मनोवैज्ञानिकप्रक्रमस्य यदि चिन्तनं

भवति तर्हि एतेषां चतुर्णां विषयाणामाधारेणैव वाक्यप्रयोगादीन् कृत्वा वयं सामाजिकसांसारिकांश्च व्यवहारान्समुत्पादयितुं शक्नुमः। वाक्यस्य वयं परिभाषाः अवगच्छामः। तर्हि प्रथमा परिभाषा वर्तते।

एकतिङ्वाक्यम्। एतस्य अन्तर्भूतत्वात् इति भाष्ये प्रतिपादितमस्ति। तथा च आख्यातं साव्ययकारकविशेषणं वाक्यं सक्रियाविशेषणञ्च। आख्यातं सविशेषणमिति महाभाष्ये प्रतिपादितमस्ति। द्वितीयमस्ति वाक्यस्य लक्षणम् अर्थैरेकत्वात् एकं वाक्यं साकानुशं चेद्विभागे स्यात् इति मीमांसकाः भवन्ति।

तत्रैव पदसमूहो वाक्यम् अर्थसमाप्तौ। वात्स्यायनः मञ्जूषायां प्रतिपादयति। तथा च मिथः साक्षात् शब्दस्य व्यूहो वाक्यम्। शब्दशक्ति-प्रकाशिकाग्रन्थे इति प्रतिपादितमस्ति।

तृतीयमस्ति वाक्यं स्यात् योग्यता-आकांक्षा-आसत्तियुक्तः पदोच्चयः साहित्यदर्पणे प्रतिपादितमस्ति।

**चतुर्थमस्ति आख्यातशब्दः संघातोजातिसंघातवर्तिनि एको अनवयवः शब्दः क्रमो बुद्धि अनुसंशति। पदमाद्यं पृथक् सर्वपदं साकांक्षम् इत्यपि वाक्ये प्रतिमतिर्भिन्ना बहुधा न्यायवादिनाम्। वाक्यपदीयकारेणसमुपस्थापितमस्ति। पतञ्जलि थोक्स द्योनिसिथिस थोक्स इत्यत्र लिखितमस्तिपूर्णार्थप्रतीतिकारकः शब्दसमूहो वाक्यम्।**

अर्थात् येन पूर्णार्थस्य प्रतीतिः जायेतप्रतीतिकारकः यः शब्दसमूहः वर्तते, स शब्दसमूहः एव वाक्यं भवति अर्थात् वाक्यस्यबहुमहत्त्वपूर्णं स्थानं भवति वाक्यं विना सम्पूर्णस्य सर्वेषां पदानाम् अर्थावगमः भवितुं नार्हति। अत्र वाक्यस्य व्यावहारिकपरिभाषा उच्यते सार्थं लघिष्ठं पूर्णार्थं वाक्यं स्याद् भाषणाङ्गकम्। वाक्यस्य निर्माणतत्त्वानि त्रीणि अस्माभिः चिन्तयितुं शक्यन्ते। तानि आकांक्षा योग्यता आसत्तिः च। योग्यता इत्युक्ते सार्थकता अन्वीतिः।

आसत्तिः इत्युक्ते सन्निधिः। आकांक्षायाः तु उपसमनं भवेदेव इति वाक्यस्य त्रीणि तत्त्वानि अनिवार्याणि वर्तन्ते। इदानीं वाक्यानां प्रकारं

चिन्तयामः। वाक्यानि अनेकप्रकारकाणि भवन्ति। बाहुल्येन यदि वयं वाक्यानि चिन्तयामः तर्हि वाक्यानां षड्प्रकारकाणि भवन्ति।

- आकृतिमूलकानि वाक्यानि।
- रचनामूलकानि वाक्यानि।
- अर्थमूलकानि वाक्यानि।
- क्रियामूलकानि वाक्यानि।
- शैलीमूलकानि वाक्यानि।
- आवर्तकवाक्यानि च।

एवं कृत्वा वाक्यानाम् अनेकप्रकाराः भवितुमर्हन्ति। तत्र एक-एकशः वाक्यानां प्रकारान् वयं चिन्तयामः। सर्वादौ अस्ति आकृतिमूलकानि वाक्यानि।

आकृतिमूलकानि वाक्यानि चतुःप्रकारकाणि भवन्ति।

तत्र प्रथममस्ति अयोगात्मकवाक्यानि।

तत्र अयोगात्मकवाक्यानि तादृशानि भवन्ति बोतानि इत्यादीनि वाक्यानि बोतानि इत्युक्ते (तू मुझे मारता है।)

**अयोगात्मकवाक्यानि।**

द्वितीयमस्ति श्लिष्टयोगात्मकवाक्यानि। वृक्षात् पत्रं पतति। एतस्य श्लिष्टयोगात्मकवाक्यं वर्तते।

अश्लिष्टयोगात्मकवाक्यानि अत्र तुर्कीभाषायाम् एलिम डे (मेरे हाथ में है।)

चतुर्थमस्ति प्रश्लिष्टयोगात्मकवाक्यानि तत्र अस्ति प्रश्लिष्टयोगात्मक-वाक्यानि भोजपुरी भाषायाम् (सुनलेहनिह, उन्येका) इत्यादीनि वाक्यानि प्रश्लिष्टयोगात्मकवाक्यानि उच्यन्ते।

रचनामूलकवाक्यानि त्रीणि प्रकारकाणि भवन्ति। तत्र सामान्यवाक्या-निमिश्रितवाक्यानि संयुक्तवाक्यानि च। सामान्यवाक्यानि इत्युक्ते रामः ग्रामं गच्छति इति सामान्यं वाक्यम्।

मिश्रितवाक्यम् इत्युक्ते रामः विद्यालयं गत्वा पुस्तकानि पठति तत्र जनान्मिलित्वा कार्याणि संसाधयति एतद् मिश्रवाक्यम्। यत्र वाक्यानां मिश्रता भवति।

संयुक्तवाक्यानि नाम सप्त अष्टवाक्यानि मिलित्वा एव अर्थावगमः यत्र जायते तानि वाक्यानि संयुक्तवाक्यानि समुच्यन्ते। ततः परं वर्तते अर्थमूलकवाक्यानि। अर्थमूलकवाक्यानि अष्टप्रकारकाणि भवन्ति। तत्र विधिवाक्यानि।

विधिवाक्यानि इत्युक्ते रामः कार्यं कुर्याद्विधिवाक्यम्।

निषेधवाक्यम् निषेधवाक्यम् इत्युक्ते कलङ्ग्यं मा भक्षेत्। पलाण्डुं मा भक्षेत्। इत्यादीनि वाक्यानि निषेधवाक्यानि।

पुनः प्रश्नवाक्यानि प्रश्नवाचकवाक्यानि भवान् कार्यं करोतु। पुनः वर्तन्ते अनुज्ञावाक्यानि। अनुज्ञावाक्यानि त्वं कुरु। एतादृशवाक्यानि यानिभवन्ति तानि अनुज्ञावाक्यानि उच्यन्ते।

पुनः सन्देहवाच्यवाक्यानि। सन्देहवाचकवाक्यानि तादृशानि भवन्ति सः कृष्णः कार्यं कुर्वन् भविष्यति वा न वा सन्देहः यत्र भवति।

इच्छार्थकवाक्यानि इच्छार्थकवाक्यानि इत्युक्ते सः अध्ययनं कुर्यात् इच्छा अस्ति अस्माकम्।

संकेतार्थकवाक्यानि भवन्ति कृष्णः पठिष्यति चेदेव उत्तीर्णः भविष्यति सन्देहार्थकवाक्यानि।

विस्मयार्थकवाक्यानि अष्ट प्रकारकाणि वाक्यानि भवन्ति। यत्र विस्मयः समुद्योतितः भवति। कीदृशः विस्मयः ओ! अहो! भवान् समुत्तीर्णः वाह! एवं विस्मयः भवति।

पुनः चतुर्थप्रकारकाणि वाक्यानि भवन्ति क्रियामूलकानि वाक्यानि। क्रियामूलकानि वाक्यानि द्विधा भवन्ति।

- एकं क्रियायुक्तवाक्यानि।
- द्वितीयं क्रियाहीनवाक्यानि।

- क्रियायुक्तवाक्यानि त्रिधा भवन्ति।
- कर्तरिवाच्यवाक्यानि, कर्मवाच्यवाक्यानि, भाववाच्यवाक्यानि च।
- कर्तरिवाच्यवाक्यानि तानि भवन्ति रामः विद्यालयं गच्छति।
- कर्मवाच्यवाक्यानि तानि भवन्ति बालकेन विद्यालयं गम्यते।
- तृतीयवाक्यानि भवन्ति भाववाच्यवाक्यानि भवन्ति।
- भाववाच्यवाक्येषु तु कर्मः न भवति। क्रिया कर्तरि तृतीया भवति।

क्रिया सर्वदा प्रथमपुरुष-एकवचनस्य भवति। कारणेन भूयते इत्यादीनि वाक्यानि।

द्वितीयप्रकारकाणि वाक्यानि भवन्ति क्रियाहीनवाक्यानि। क्रियाहीन-वाक्यानि इत्युक्ते येषु वाक्येषु क्रिया एव न भवति। इदं न मम इत्यादीनि यानि उच्चार्यन्ते सः मदीयः इत्यादीनि वाक्यानि क्रियाहीनवाक्यानि उच्यन्ते। एषु वाक्येषु क्रिया न भवति।

पञ्चमप्रकारकाणि वाक्यानि भवन्तिशैलीमूलकवाक्यानि। शैलीमूलक-वाक्यानि त्रिधा अस्माभिः वक्तुं शक्यन्ते।

- प्रथममस्ति शिथिलवाक्यानि।
- द्वितीयमस्ति समीकृतवाक्यानि।
- तृतीयमस्ति आवर्तकवाक्यानि च।

शैलीमूलकवाक्यानि शिथिलवाक्यानि भवन्ति। यत्र बहुविशालता भवति वाक्येषु। एका राज्ञीकुन्ती आसीत्। तस्याः नाम, तस्याः पितुः नाम भोजः आसीत् इत्यादीनि वाक्यानिशिथिलवाक्यानि उच्यन्ते। समीकृतवाक्यानि यत्र मुहावरारूपेण लघु-लघु लोकोक्तिरूपेण यानि वाक्यानि उच्यन्ते, तानि वाक्यानि समीकृतवाक्यानि उच्यन्ते। अल्पो घटः घोषः, अर्धोघटः घोषः समुपैति नित्यम् इत्यादि न घर का घाट का इत्यादीनि वाक्यानि यानि लोकभाषायामुच्यन्ते तानि वाक्यानि समीकृतवाक्यानि भवन्ति।

**तृतीयमस्ति आवर्तकवाक्यानि।**

आवर्तकवाक्यानि तादृशानि भवन्ति यदि सुखम् इच्छति यदि शक्तिम् इच्छति तर्हि विद्याध्ययनं करोतु एतादृशवाक्यानि यानि भवन्ति, तानि आवर्तकवाक्यानि भवन्ति। कथनस्य अभिप्रायः वर्तते वाक्यस्य वर्तते वाक्यस्य यत्र प्रपञ्चः वर्तते वाक्यविज्ञानस्य सः प्रपञ्चः महीयान् वर्तते।

उपसंहाररूपेण यदि विचार्यते तर्हि ज्ञायते यत् भाषाविज्ञानाध्ययनस्य महती आवश्यता दृश्यते यदि भाषाविज्ञानस्य अध्ययनं विधीयते तर्हि बहुविधं शब्दज्ञानं सिद्धान्तज्ञानं स्वयमेव जायते। एतेन प्रपञ्चेन यदि सम्यक् वाक्यानि विचिन्त्य अस्माभिः व्यवहारः क्रियते लेखनप्रयत्नः च संधार्यते। निरन्तरं भाषायाः अभ्यासः च विधीयते। तर्हि निश्चप्रचम् अस्माकं ज्ञानं सुतरां दृढतया प्रस्फुटितं भवितुमर्हति। एवञ्च वयं समाजे भिन्न-भिन्नवाक्यैः न केवलं लघुगद्यं पद्यं लघुप्रकरणं वा लेखितुं प्रभवामः अपितु विशालकायं सद्ग्रन्थमपि लेखितुं शक्ष्यामः इत्यत्र नास्ति संशयः लेशः इति।

## त्रयोदशोऽध्यायः

# पाठ्यसहगामिक्रियाः

विश्वेऽस्मिन् विश्वे अध्यापनक्षेत्रे रुच्युत्पादनं महत्त्वभूतमस्ति। यतः रुचिं विना यदि छात्राः विषयमधीयते तर्हि तेषां पूर्णं ज्ञानं न जायते। अतः बालानां मनोरञ्जनाय शाश्वतनियन्त्रणाय प्रेरणायै च महत्त्वपूर्णं साधनमस्ति पाठ्यसहगामिक्रियाभिः बालानां सुतरां प्रेरकरीत्या पाठनम्। यदि प्रेरकरीत्या रुचिपूर्णरीत्या च छात्राणां पाठनं विधीयते तर्हि छात्राः शीघ्रतया विषयम् अधिगच्छन्ति, तेषां विषयज्ञानञ्च सुष्ठुतया सञ्जायते। बाहुल्येन अस्माभिः समाजे अवलोक्यते यत् जनाः पाठ्यसहगामिक्रियाणां माध्यमेन अध्ययनाय प्रवृत्ताः भवन्ति। अत्र पाठ्यसहगामिक्रियाणाम् उद्देश्यानि चिन्तयामः।

- यदि पाठ्यसहगामिक्रियाभिः अध्यापनं क्रियते तर्हि आत्म-विश्वासः वर्धते।
- पाठ्यसहगामिक्रियया अध्यापनेन सर्जनात्मकता समुत्पद्यते।
- पाठ्यसहगामिक्रियाभिः छात्राणां स्वभाविकज्ञानाय प्रवृत्तिः सञ्जायते।
- मनोरञ्जनपूर्वकम् अध्ययनसामर्थ्यं समुत्पद्यते।
- नैतिकाधारेण अध्ययनप्रवृत्तिः समुत्पद्यते।
- नेतृत्वं कर्तुं सामर्थ्यं समधिगच्छति।
- उदारचरितत्वं निर्मीयते।
- स्नेहभावः पाठ्यसहगामिक्रियाभिः समुत्पद्यते।
- तर्कनिरीक्षणकलानाम् अभिव्यक्तिकौशलं समुद्योतितं जीवने भवति।

- ➢ व्यवहारिककोशवृद्धिः सञ्जायते।
- ➢ शुद्धोच्चारणसामर्थ्यं समुत्पद्यते रचनात्मकतायाः वर्धनञ्च जायते।

बहुविधोद्देश्यानि पाठ्यसहगामिक्रियाभिः सम्पूरितानि भवन्ति। तासां प्रयोगः यदि अध्यापने सुतरां क्रियते तर्हि छात्राः विविधतामपि प्राप्नुवन्ति विषयज्ञानमपि दाक्ष्यं समुत्पादयन्ति। तेषां शनैः शनैः सर्वविधविषयज्ञानमपि सञ्जायते। पाठ्यसहगामिक्रियाः वयं द्विधा विभक्तुं शक्नुमः। साहित्यिक-गतिविधयः सांस्कृतिकगतिविधयः च। साहित्यिकगतिविधिषु वाद-विवादः, भाषणं (विदुषां भाषणं, छात्राणाञ्च भाषणम्), कविसम्मेलनं, श्लोकपाठः, कथाकथनं, कथालेखनं, विद्यालयपत्रिका, विद्यालयगोष्ठ्यः, संस्कृतसाहित्य-सम्बद्धक्रीडाः, संस्कृतप्रश्नोत्तरी, अन्त्याक्षरी, सुभाषितानां प्रतियोगिता, समस्यापूर्तिः, प्रहेलिका, विनोदकर्णिका, शब्दक्रीडाः च इति साहित्यिक-गतिविधिषु अन्तर्भूताः भवन्ति। सांस्कृतिकगतिविधिषु संस्कृतगीतं, संस्कृत-दिवसायोजनं, संस्कृतसप्ताहायोजनम्, एकाङ्की-अभिनयः, एकांकी नाटकं, कवीनां जन्मदिवसानाम् आयोजनं, संस्कृतग्रन्थानां पाण्डुलिपीनाञ्च प्रदर्शनं, यज्ञादीनाञ्च निर्वहनम् इत्यादयः गतिविधयः सांस्कृतिकगतिविधयः उच्यन्ते। एवं सांस्कृतिकगतिविधिभिः साहित्यिकगतिविधिभिः च छात्राणां शैक्षिकविकासः अपि भविष्यति सामाजिकविकासः, शारीरिकविकासः, भाषास्तरे च विकासः सहजतया भवितुमर्हति। एवं रीत्या एक-एक साहित्यिकगतिविधीनां सांस्कृतिकगतिविधीनाञ्च अधुना विवरणं चिन्त्यते।

**वाद-विवादः**- अत्र छात्रैः सह कमपि एकं विषयं स्वीकृत्य चर्चा विधीयते। एकः गणः अथवा एकः छात्रः पक्षम् उपस्थापयति अपरः छात्रः च विपक्षम् उत्पादयति। द्वयोः अपि छात्रयोः लक्ष्यमेकमेव भवति यतः पूर्णः उत्तमः विषयः पुरस्तात् स्थितानां जनानां समक्षे उपस्थापितः भवेत्। एतत् मनसि निधाय एकः बालः पक्षम् उपस्थापयति एकः च विपक्षम्। एवं कृत्वा तयोः द्वयोः मध्ये वाद-विवादः जायते। अस्माकं शास्त्रेषु अपि लिखितमस्ति– वादे वादे जायते तत्त्वबोधः। तत्त्वबोधस्य साधनं केवलं वादः विवादः च वर्तते। यदि वादं कुर्मः तर्हि सिद्धान्तः समुत्पन्नः भवति तर्हि छात्राः परस्परं वादं विवादं कृत्वा भाषायाः सज्जीकरणं

व्यवहारे आनयनं च कुर्वन्ति। तेन न केवलं तेषां ज्ञानं वर्धते, अपितु तेषां सामर्थ्यमपि दृग्गोचरी भवति।

द्वितीयमस्ति **भाषणम्**। भाषणं द्विधा। एकं भाषणं विद्वद्भि: क्रियते। विद्वत्समवाया: विदुष: आहूय तेभ्य: एकं विषयं प्रददति तान् च निवेदयन्ति अस्माकम् आचार्यान् छात्रान् च उद्दिश्य अस्मिन् विषये गभीरं व्याख्यानं कुर्वन्तु,येन व्याख्यानेन अस्मिन् अनुसन्धानात्मके विषये अस्माकं छात्रा: शिक्षका: च एकां दृष्टिं प्राप्नुयु:। एतद् मनसि निधाय कश्चन प्रतिष्ठित: विद्वान् विषयमवलम्ब्य भाषणं प्रददाति। तेन भाषणेन तस्य ग्रन्थस्य सन्दर्भे, तस्य विषयस्य सन्दर्भे च अनुसन्धानदृष्टि: सर्वेषां समुत्पद्यते। यथा विषयरूपेण वयं चिन्तयितुं शक्नुम:। साहित्ये यदि चिन्तयाम: तर्हि कालिदासस्य अभिज्ञानशाकुन्तले उपमा। तर्हि शिक्षका: अनुसन्धानपूर्वकं समीचीनरीत्या उपमालङ्कारं प्रतिपादयति। उपमा कथं तेन उपस्थापिता अस्ति उपमा अलङ्कार: कथं भवति? इत्यादिविषयमाश्रित्य स: पूर्णं व्याख्यानं कुत्र-कुत्र उपमा वर्तते अभिज्ञानशाकुन्तले इति प्रतिपादयति। उपमा नाम संभृतिं करोति सर्वान् बोधयति च। एवं च व्याकरणस्तरे व्याकरणे कश्चन विषय: भवितुमर्हति विधिसूत्राणां व्याकरणे प्रतिपादनम् अथवा अष्टाध्याय्याम् उपस्थापनम्। एनं विषयं स्वीकृत्य कश्चन विद्वान् सर्वाणि सूत्राणि अधीत्य प्रौढिकृत्य छात्राणां पुरस्तात् समुपस्थापयति। तर्हि भाषणं भवति विदुष: तेन समेषाम् एका दृष्टि: निर्मिता भवति।

द्वितीयं भाषणं भवति– **छात्राणां भाषणम्**। छात्रेभ्य: विषय: दीयते। छात्रा: विषयं सज्जीकृत्य तस्य विषयस्य समुपस्थापनं समेषां पुरस्तात् कुर्वन्ति, तेन भाषणेन छात्राणां सहग्रन्थस्थ: विषय: दृढीयान् भवति। तस्य ग्रन्थस्थविषयस्य ते प्रतिपादने सामर्थ्यं धारयन्ति, तेषाम् एकत्र ज्ञानं वर्धते, अपरत: एक: विषय: पूर्ण: तेषां सज्जीभवति। एतेन भाषणं साहित्यिक- गतिविधिना छात्रेषु आत्मविश्वासोऽपि जायते। सर्जनात्मकता अपि आगच्छति। मनोरञ्जनरीत्या ते अध्येतुमपि सामर्थ्यं संधारयन्ति।

तृतीयमस्ति **कविसम्मेलनम्**। कविसम्मेलनमाध्यमेनापि कक्षाया:

समञ्जनं भवति। कविसम्मेलनमाध्यमेनापि कविसम्मेलनं कुर्वन्ति कश्चन एकः विषयः दीयते छात्रेभ्यः तं विषयं छात्राः आत्मनः विषयं समुद्योतयन्ति। तेन विषयेण साकं समञ्जनपूर्वकम् उपस्थापनपूर्वकं विविध-विविधविषयान् संचर्चयन्ति। तेषां तेन एकत्र लेखनसामर्थ्यं वर्धते, कविसम्मेलनमपि द्विधा भवितुमर्हति। शिक्षकस्तरे कविसम्मेलनं छात्रस्तरे कविसम्मेलनं च। छात्राः अपि कविसम्मेलने भागं स्वीकर्तुं शक्नुवन्ति। शिक्षकाः अपि स्वीकर्तुं शक्नुवन्ति। तत्रापि नियतविषये कविसम्मेलनम् अनियतविषये। नियतविषये नाम यत्र विषयः निर्धारितः अस्ति, अस्मिन् विषये एव कविता लेख्या। अनियतविषये नाम कमपि विषयं स्वमनसि आगतविषयं समसामयिकविषयं स्वीकृत्य अपि श्लोकाः कविताः गीतानि लेखितुं शक्यन्ते। कविसम्मेलन-माध्यमेन सर्जनात्मकतायाः सामर्थ्यविषयप्रतिपादनशैली च समुत्पन्ना भवति। श्लोकनिर्माणं, गीतनिर्माणं, भावनिर्माणं सामर्थ्यस्य च विकासः जायते।

अनन्तरमस्ति **श्लोकपाठः**- श्लोकपाठः बहुमहत्त्वपूर्णः विषयः वर्तते। श्लोकपाठादिभिः अपि छात्राणां सम्यग्ज्ञानस्य वर्धनं जायते। छात्राणां कौशलवर्धनं भवति। पाठनसामर्थ्यं तेषाम् आगच्छति। तेभ्यः छात्रेभ्यः विविधच्छन्दःसु श्लोकाः प्रदीयन्ते। तेषां श्लोकानां माध्यमेन ते पठन-पाठनपूर्वकं रटनपूर्वकं उक्तान् श्लोकान् श्रावयन्ति। तेषां श्लोकपाठन-सामर्थ्यस्य अपि विकासः भवति ज्ञानस्य अपि विकासः जायते।

**कथाकथनम्**-अत्र छात्रेभ्यः कथाकथनाय अवसरः प्रदीयते। ते विविधशब्दानाश्रित्य क्रियापदानि चाश्रित्य कथायाः निर्माणं कुर्वन्ति कथायाः कथनञ्च कुर्वन्ति। तेभ्यः रिक्तस्थानानि अपि प्रदीयन्ते। तानि रिक्तस्थानानि पूरयित्वा अपि छात्राः कथाः लेखितुं शक्नुवन्ति। अनया प्रक्रियया तेषां कौशलविकासः अपि भवति आन्तरिकभावनायाः अपि बहिरानयनमपि कार्यते। तेषां कथाकथनमाध्यमेन तत्रैव कथालेखनमपि तादृशमेव क्रियापदानि आश्रित्य अव्ययपदानि आश्रित्य भिन्न-भिन्नशब्दानां माध्यमेन कथालेखनं छात्राः कुर्वन्ति। कथालेखनेन तेषां भावप्रकाशनं भवति। सामान्यरूपेण हिन्दीभाषाभिः याः कथाः श्रुताः भवन्ति, तासामपि कथानां लेखनं कुर्वन्ति। तेन अपि छात्राणां ज्ञानवृद्धिः भवति।

**विद्यालयपत्रिका–** विद्यालयपत्रिकायां प्रत्येकं छात्रः एकं लेखं प्रयच्छति। कश्चन सम्पादकगणः भवति, यः शिक्षकाणां परामर्शेन तस्याः पत्रिकायाः सम्पादनं करोति। तेन छात्रस्य सम्पादनसामर्थ्यं शुद्धतासम्पादनं पुनः लेखनसामर्थ्यञ्च वर्धते। सर्जनात्मकता छात्रेषु विकसिता भवति। कथं तर्हि लेखनीयः? एतद्विधिना छात्रेषु ज्ञानमपि जायते। छात्राणां प्रक्रिया अपि उत्तमा भवति। ते निरन्तरं पत्रिकायाः सम्पादनं कुर्वन्ति। ते तु केचन एव भवन्ति, किन्तु सर्वैः अपि छात्रैः विद्यालयपत्रिकायै कश्चन लेखः प्रदेयः भवति। तेन कारणेन तेषाम् आरम्भः एव लेखनप्रवृत्तिः जागरिता भवति।

**विचारगोष्ठ्यः–** विभागेन प्रतिसप्ताहं प्रतिपक्षं प्रतिमासञ्च काश्चन गोष्ठ्यः आयोज्यन्ते। यासां गोष्ठीनां सञ्चालनं छात्राः एव कुर्वन्ति। तत्र छात्राः एव भाषणकर्तारः भवन्ति। गोष्ठीनां द्विधा आयोजनं छात्राः विद्यालये कुर्वन्ति। विचारगोष्ठ्यः द्विधा भवन्ति एकः तु ताः विचारगोष्ठ्यः भवन्ति, यत्र शिक्षकाणामेव बाहुल्यं भवति। ताः विचारगोष्ठ्यः भवन्ति, यत्र छात्राणां बाहुल्यं भवति। शिक्षकाणां बाहुल्यं यत्र भवति, तत्र शिक्षकाः एव अध्यक्षाः, मुख्यातिथयः, मुख्यनिर्णायकाः भवन्ति। छात्राः यत्र विचारगोष्ठीं प्रस्तुवन्ति, तत्र छात्रा एव प्रमुखाः भवन्ति। शिक्षकः केवलम् अवलोकयन्ति। एतेन छात्रस्य विचारप्रक्रिया तीक्ष्णा भवति। ते विचारं विधातुं सामर्थ्यं संधारयन्ति।

**संस्कृतसाहित्यसम्बद्धक्रीडाः–** संस्कृतसाहित्यसम्बद्धक्रीडासु गीतश्रवणक्रीडाः, लेखनक्रीडाः, क्रियाकथनक्रीडाः, अव्ययपदानि कथनक्रीडाः, एवं कथनक्रीडाः संस्कृतसाहित्यसम्बद्धक्रीडाः क्रियन्ते, पुटे अक्षरान्वेषणक्रीडाः एवं क्रीडाभिः संस्कृतसाहित्यसम्बद्धक्रीडाभिः छात्राणां पठनसामर्थ्यं वर्धते। ते विषयं पठितुं प्रवृत्तिम् आधारयन्ति।

**संस्कृतप्रश्नोत्तरी–** इयं क्रीडा अत्यन्तं छात्रपोषिका भवति। अनया क्रीडया छात्राः संस्कृतप्रश्नोत्तरीमाध्यमेन संस्कृतवाङ्मयस्य ज्ञानं प्राप्नुवन्ति। तत्र संस्कृतसाहित्यस्य अपि प्रश्नाः भवन्ति, व्याकरणस्यापि प्रश्नाः भवन्ति। पुनश्च लघु-लघु-विषयान् आश्रित्य प्रश्नाः भवन्ति। एतेन माध्यमेन छात्रेषु सामर्थ्यम् आगच्छति। तात्कालिकबुद्धेः वर्धनं भवति। तत्र मञ्चे अनेके

छात्राः समुपस्थिताः भवन्ति। शिक्षकः प्रश्नान् पृच्छति। प्रथमः गणः उत्तरं ददाति। प्रथमः गणः यदि उत्तरं दातुं न शक्नोति, तर्हि द्वितीयः गणः ददाति, द्वितीयः गणः न दातुं शक्नोति तर्हि तृतीयः गणः ददाति, एवं कृत्वा प्रश्नोत्तरीमाध्यमेन छात्राणां विकासः कार्यते। छात्राः विकसिताः सन्तः प्रश्नानाम् उत्तराणि सम्यक्तया वदन्ति। तेषाम् उत्तराणां माध्यमेन तत्र कक्षायाम् एकं वातावरणं सुष्ठुनिर्मितं भवति।

**अनन्तरमस्ति अन्त्याक्षरी**– अन्त्याक्षरीमाध्यमेन छात्राः बहुविध-श्लोकान् रटन्ति। श्लोकरटनप्रवृत्तिः छात्रेषु समुत्पन्ना भवति। तेषां ज्ञानकौशलमपि वृद्धं भवति। तेषां निरन्तरता अपि भवति। एतत् बहु तेषां हितकारकं भवति। तत्र श्लोकान्त्याक्षरी भवति, सूत्रान्त्याक्षरी भवति, अन्त्याक्षरी भवति, अव्ययपदानि आश्रित्य अन्त्याक्षरी भवति, अन्तिमपद-माश्रित्य अन्त्याक्षरी भवति, अन्तिमहलन्तशब्दमाश्रित्य अन्त्याक्षरी भवति, अन्तिमस्वरपदमाश्रित्य अपि अन्त्याक्षरी भवति। येन छात्रस्य सम्यक् सूत्राणां, श्लोकानां, क्रियाणां, अव्ययानां च अभ्यासः जायेत।

**सुभाषितानां प्रतियोगिता–** प्रत्येकं छात्रः एकम्-एकं सुभाषितं सार्थं कथयति। अत्र सुभाषितानां प्रतियोगिता द्विधा कारयितुं शक्यते। एका अभिनयाधारित-सुभाषितप्रतियोगिता, एका सामान्यरूपेण सुभाषितप्रतियोगिता। यत्र सामान्यरूपेण सुभाषितप्रतियोगिता भवति, तत्र छात्राणां पुरस्तात् सामान्यतया विषयः उपस्थाप्यते। तं विषयमाश्रित्य छात्राः प्रश्नान् वदन्ति उत्तराणि च कथयन्ति। सुभाषितं वदन्ति सुभाषितं पुनः अग्रिमः छात्रः वदति। एवं यत्र अभिनयाधारेण सुभाषितप्रतियोगिता कार्यते तत्र अभिनयं कृत्वा छात्रः सुभाषितस्य स्वरूपं दर्शयति, तम् अभिनयं दृष्ट्वा एव छात्राः 'किं सुभाषितं भणितमस्ति' इति निर्णयं कृत्वा तस्य सुभाषितस्य कथनं कुर्वन्ति। इयं प्रतियोगिता अभिनयसामर्थ्यं चिन्तनसामर्थ्यं च विकासयति। एतेन छात्रेषु कौशलजागरणं भवति।

**समस्यापूर्तिः**– समस्यापूर्तिः वाक्यस्तरे भवति। समस्यापूर्तिः श्लोकस्तरे भवति। तत्र वाक्यस्तरे एकं वाक्यम् उक्तं भवति, अर्धं वाक्यम्, अन्तिमपदं किम् इति छात्रैः योजनीयं भवति। अत्रैव समस्यापूर्तौ एकः श्लोकः, एकं

पादं शिक्षकेण उच्यते। अन्यपादत्रयं छात्रेण स्वयं लेखनीयं भवति। तस्मिन्नेव छन्दसि तत् भावपूरकपदत्रयम्। अनया स्पर्धया छात्रेषु एकं भावनिर्माणं भवति। पुनश्च अन्येन भावेन साकं स्वभावनिर्माणं महत्त्वमपि संद्योतितं भवति।

**पुनः भवति पहेलिका–** पहेलिका का भवति? तत्र अर्थः विच्छिन्नः भवति। अर्थभिन्नः भवति छात्रैः पहेलिकानां माध्यमेन स्वीयविषयः उपस्थापनीयः भवति, तेन बलेन छात्राः स्वकीयं सर्वमपि मतवैविध्यं तत्र संद्योतयन्ति। तेन कारणेन तेषां पूर्णतया ज्ञानसरणिः समाभूता भवति तेषां ज्ञानञ्च विकसितं भवति।

**अनन्तरमस्ति विनोदकर्णिका–** विनोदकर्णिकामाध्यमेन तत्र संस्कृत–सम्बद्धाविनोदकर्णिका स्वीक्रियते, हास्यकर्णिका स्वीक्रियते, संस्कृतभाषया कथनीया भवति। तेन संस्कृतभाषाविकासः भवति। संस्कृतपदानि आश्रित्य हास्यकर्णिका भवति। तया हास्यकर्णिकायाः विकासोऽपि जायते भाषाभ्यासः अपि छात्राणां भवति। तेन भाषाधिगमेन छात्राः पूर्णरूपेण सामर्थ्यशीलाः भवन्ति। छात्राः पाठ्यसहगामिक्रियायाः अर्थं भावप्रकटनं च कुर्वन्ति।

## चतुर्दशोऽध्यायः

# विविधविधाः तत्पाठयोजनाश्च

**विधाः-**

भारतीयं वाङ्मयं सुतरां विशालं वर्तते तत्र विद्यमानविषयाः अपि अनेके सन्ति। प्रामुख्येण गद्य-पद्य-व्याकरण-नाटक-रचना-अनुवाद-उच्चारणादीनां महती भूमिका दरीदृश्यते। अस्मिन् अध्ययने क्रमेण गद्य-पद्य-व्याकरण-नाटक-रचनानुवादोच्चारणादीनां संक्षिप्तरूपं ज्ञानपुरस्सरं तत्पाठ-योजनास्वरूपम् अवलोकितुं शक्यते। अनेन स्वरूपेण आप्लाविताः सन्तः छात्राः पाठयोजनायाः प्रयोगपूर्वकं पठितुं प्रभविष्यन्ति। गद्यविधापद्य-विधाव्याकरणविधानाटकविधारचनाविधा-अनुवादविधाः च सन्ति।

**पाठयोजना**

विविधाः पाठयोजनाः निश्चितच्छात्रसमूहं, निश्चितं पाठ्यवस्तुच स्वीकृत्य या योजना क्रियते सैव योजना पाठयोजना भवति। व्यवस्थितरूपेण पाठनात् पूर्वं किञ्चित् चिन्तनं भवतितच्चिन्तनमेव पाठयोजना उच्यते। एवञ्च पाठनाय यः पूर्वचिन्तितः निश्चितक्रमः भवति स एव क्रमः पाठयोजना उच्यते।

**पाठयोजनायाम्-** समयः पाठ्यवस्तु विधिः उपकरणानि इत्येते विषयाः अन्तर्भवन्ति। अत्र त्रयः विषयाः मुख्याः भवन्ति यथा कक्षायाः प्राक् पाठ्यसंबद्धतथ्यानाम् एकत्रीकरणम्। छात्राणां स्तरज्ञानं, कक्षापरिस्थितेः ज्ञानं च।

**वर्शिग**-महोदयानुसारम्-शिक्षणोद्देश्यानि ज्ञातुं प्राप्तुं वा निश्चितसमये शिक्षकः याः क्रियाः नियोजयति तासां क्रियाणां वर्णनरूपैव पाठयोजना भवति।

**कार्याणि–**

- उद्देश्यानां परिभाषीकरणम्।
- पाठ्यवस्तुनः चयनम्।
- विधीनां प्रस्तुतीकरणम्।
- विषयस्य व्यवस्थितीकरणम्।

**उद्देश्यानि–**

- यथासमयं विषयबोधनम्।
- सहायकोपकरणानां यथासमयं प्रयोगः।
- विभिन्नपाठ्यविषयाणां बिन्दूनां च विमर्शज्ञानम्।
- छात्राणां बौद्धिकस्तरवर्धनाय उपायचिन्तनम्।
- सशक्तमूल्याङ्कनाय उचितप्रविधीनां चयनम्।
- विधि–प्रविधि–युक्ति–उपागमादीनां यथासमयचिन्तनम्।
- पाठयोजनायाः निर्माणकाले छात्रक्रियाणां समुचितस्थाननिर्धारणम्।
- विभिन्नोदाहरणानां चिन्तनम्।
- शिक्षणक्रमस्य व्यवस्थीकरणम्।
- शिक्षकात्मविश्वासवर्धनाय कार्यकरणम्।
- विभिन्नमनोवैज्ञानिकतत्त्वानां प्रयोगः।

**पाठयोजनायाः महत्त्वम्–**

- बारम्बारलेखनस्य अभ्यासेन लेखनं स्पष्टं जायते।
- चिन्तनसामर्थ्यं वर्धते।
- कल्पनाशक्तेः विकासः जायते।
- क्रमेण पाठ्यांशस्य बोधने उपयोगिनी।
- विभिन्नोदाहरणानां चिन्तनाय अवसरः लभते।

- शिक्षकस्य आत्मविश्वासः वर्धते।
- मूल्याङ्कनस्य उचितविधेः प्रयोगः कर्तुं शक्यते।
- पूर्वज्ञानेन सम्बन्धितविषयज्ञानानुसारं पठयितुं शक्नुमः।
- अध्यापनक्रियायाः अधिगमेन सह समञ्जनं कारयति।
- छात्राणां कल्पनाशक्तेः वर्धनाय उपयोगिनी।
- विषयेषु पारस्परिकसम्बन्धं संस्थाप्य पाठयितुं शक्यते।

**पाठयोजनायाः स्वरूपम्–**

- वार्षिकपाठयोजना
- मासिकपाठयोजना
- पाक्षिकपाठयोजना
- साप्ताहिकपाठयोजना
- दैनिकपाठयोजना।

**दैनिकपाठयोजना–**

गद्यपद्यव्याकरणरचनासुलेखश्रुतलेखनाटकादीनां पाठयोजना भवति। आवश्यकज्ञानं शिक्षकस्य छात्रस्य विषयस्य समयस्य च भवेत्। उद्देश्यस्मरणम्–विषयस्योचितोपस्थापनम् पुनरावृत्तिमूल्याङ्कनप्रश्नानां चिन्तनं, प्रयोगः गृहकार्यं च।

पाठयोजनाभिः छात्राणां पाठनेन व्यवस्थितक्रमानुसारं बोधः जायते, छात्राः च उचितमार्गे स्वीयज्ञानं वर्धयन्ति अत्र पाठयोजनायाः स्वरूपोपस्थापनात् पूर्वं गद्यं किम् इति जानीमहे।

**गद्यम् –**

- वृत्तबन्धरहितं वाक्यं गद्यं भवति।
- गद्यं कवीनां निकषं वदन्ति।
- गद्यं संश्लिष्टता–संक्षिप्ततायुक्तं भवति।

गद्येन शीघ्रीतया अल्परिश्रमेण सर्वैरपि अभ्यासः विधीयते।

**गद्यस्य वैशिष्ट्यम् –**

- यजुर्वेदे प्रथमतया गद्यक्रमः उपलभ्यते।
- व्यवहाराय गद्यमेव महत्त्वपूर्णम्।
- गद्यस्यैव व्यवहाराय समाजे प्राधान्यम्।
- गद्–व्यक्तायां वाचि धातोः गद्यशब्दः निष्पद्यते।

**ग्रन्थानुगुणं गद्यप्रकाराः**

वैदिकम् — यजुर्वेदे

पौराणिकम् — पुराणेषु

शास्त्रीयम्

कौटिल्यादिअर्थशास्त्रे ब्राह्मणादि–क्वचित् (भागवतस्यग्रन्थेषु पञ्चम–स्कन्धे)

**गद्यप्रकाराः –**

मुक्तक–उत्कलिकप्रायम्–वृत्तगन्धिचूर्णकानि।

**गद्यस्य विशेषताः –**

- समासबहुला शैली भवति।
- भाषातत्त्वानां ज्ञानं जायते।
- गद्य–पद्ययोः सम्मिश्रणम्।
- विचारविनिमयसिद्धान्तः आश्रियते।

**उद्देश्यानि –**

- ज्ञानात्मकोद्देश्यम्।
- अर्थग्रहणात्मकम्।

- अभिव्यक्त्यात्मकम्।
- अभिरुच्यात्मकम्।
- कौशलात्मकम्।

प्राथमिक-माध्यमिकोच्चस्तरेषु उद्देश्ययानि भिद्यन्ते।

**गद्यस्य विधयः –**

व्याख्यानविधिः, स्पष्टीकरणविधिः, प्रत्यक्षविधिः, टीकाविधिः, तुलनात्मकविधिः प्रयोगविधिः, व्युत्पत्तिविधिः प्रसङ्गविधिः, कौशलविधिः, कोषविधिः।

**सोपानानि-**

सामान्यप्रविष्टयः, सामान्योद्देश्यानि, विशिष्टोद्देश्यानि, सहायकोप-करणानि, पूर्वज्ञानम्, प्रस्तावना, उद्देश्यकथनम्, प्रस्तुतिकरणम, आदर्शवाचनम्, अनुवाचनम्, अशुद्धिसंशोधनम्, काठिन्यनिवारणम्, भाषानुवादः, बोधात्मक-प्रश्नाः, अध्यापककथनम्/अध्यापकसारः, मौनवाचनम्, पुनरावृत्त्यात्मकप्रश्नाः, कक्षाकार्यम्, गृहकार्यम्।

**पद्यम्-**

पद्यमेव काव्यं भवति। काव्यग्रन्थाः अनेके वर्तन्ते। श्वाक्यं रसात्मकं काव्यम्श्विश्वनाथानुसारम्।श्रूपकम्श्इति नाम्ना अपि अभिधीयते। रूपकाणि-दश उपरूपकाणि - अष्टादश कवेः इदं कर्मभावो वा काव्यम्। काव्यस्यात्मा ध्वनिः (आनन्दवर्धनः) रीतिरात्मा काव्यस्य (वामनः) वक्रोक्तिकाव्यजीवितम् काव्यं यशः प्रददाति। पद्यविधायाः महत्त्वपूर्णं योगदानं वर्तते।

**उद्देश्यानि –**

- संस्कृतकाव्यं प्रति अभिरुच्युत्पादनम्।
- छात्रेषु स्वर-यति-गति-लय-भावानुसारं काव्यपाठनस्य योग्यतोत्पादनम्।
- छात्रेषु कल्पनाशक्तेः तर्कशक्तेः च विकासः।

- श्रवण–वाचन–लेखन–पठनकौशलानां विकासः।
- छात्राणां शब्दभण्डारस्य विकासः।
- संस्कृतशिक्षणेन छात्रेषु नैतिकमूल्यानां विकासः जायते।
- कवेः शैल्याः तस्य जीवनदर्शनस्य च परिचयप्रदानम्।
- छात्रेषु सर्जनात्मकशक्तेः विकासः।
- छात्राणाम् अन्तःकरणेषु उच्चादर्शानां स्थापना।
- विविधसभ्यतानां संस्कृतीनां च परिचयप्रदानम्।

**उपायाः –**

- विशिष्टश्लोकानां सुभाषितानाञ्च कण्ठस्थीकरणाय प्रेरणा देया।
- कक्षायां समवेतस्वरेण सस्वरवाचनस्य अभ्यासः करणीयः।
- श्लोकान्त्याक्षरी – श्लोकपाठप्रतियोगितादीनाम् आयोजनम्।
- विविधसंस्कृतकवीनां जयन्त्यवसरे काव्यपाठनस्य आयोजनम्।
- काव्ये आगताः भावाः छात्राणां जीवने आनेतव्याः।
- श्लोकाः अखण्डपाठरूपेण पाठनीयाः।
- काव्यरचना अधिका दीर्घा चेत् मध्ये सुभाषितवाक्यानि वक्तव्यानि।

**काव्यसौन्दर्यानुभूतेः मुख्यसिद्धान्ताः –**

- काव्यस्य प्रस्तुतीकरणं सस्वरं मर्मस्पर्शि च भवेत्।
- उच्चप्राथमिकस्तरे काव्यमयवातावरणनिर्माणाय श्लोकानां संस्कृत- गीतानाञ्च उच्चारणं समवेतस्वरेण कारणीयम्।
- माध्यमिकस्तरे वर्णनात्मकं तथा च उच्चस्तरे साहित्यिक-काव्यांशाः पाठनीयाः।
- अधिकाधिकशिक्षणेन अभ्यासेन च बालकानां काव्यात्मकरुचेः काव्यरसास्वादनस्य योग्यतोत्पादनाय प्रयासः विधेयः।

- ➢ शिक्षकाः स्वयमपि काव्यशिक्षणे रुचिं गृह्णन्तु।
- ➢ एकाग्रचित्तेनभूत्वा उत्तमप्रसङ्गानां सौन्दर्यात्मकरीत्या व्याख्या करणीया।
- ➢ छात्राणां मनसि काव्यशिक्षणं प्रति जाग्रतिः आनेतव्या।

**विधयः–**

गीतविधिः नाट्यविधिश्च गीतं गीत्वा वयं विषयं बोधयामः– गीतविधिः। नाटकद्वारा गीतं गीत्वा विषयं बोधयामः इति नाट्यविधिः।

- ➢ भाषानुवादविधिः अनुवादमाध्यमेन विषयं बोधयामः।
- ➢ व्याख्याविधिः– प्रत्येकं पदं व्याख्यानपूर्वकं छात्रान् बोधयामः।
- ➢ दण्डान्वयविधिः–अस्यापरं नाम व्याकरणविधिः

**उदाहरणम्–**

येषां न विद्या न तपो न दानं, ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भूवि भारभूताः, मनुष्यरूपेण मृगाश्चरन्ति।।

अत्र कर्तृपदं किम्? किं विशेषणम्? छात्राध्यापकः श्लोकमाधारीकृत्य प्रश्नं पृच्छेत्। आद्ये विशेषणं योज्यं विशेष्यं तदनन्तरम्। क्त्वाण्मुल्यप्–प्रभृत्येवं पूर्वं दण्डान्वये भवेत्।

**खण्डान्वयविधिः** -

साहित्यिकविधिः आकांक्षाविधिश्च अस्य नामान्तरे। अस्मिन् विधौ कः, कस्मै, केषां, कस्मात् अनेन क्रमेण प्रश्नाः भवन्ति।

**कर्तृकर्मक्रियास्तावत् श्लोके योज्यास्ततः परम्,**
**किं रूपं पुरस्कृत्य तृतीयादिविभक्तिं नियोजयेत्।**

**ल्यबन्तञ्च तुमन्तञ्च क्तवान्तं कर्मविभूषितम्।**
**खण्डान्वये पुनः प्रश्नः पूर्वमन्ते प्रयोजयेत्।।**

**प्रश्न**–जलेन का वारयितुं शक्या?

**उत्तरम्**- पिपासा।

छत्रेण कः निराकर्तुं शक्यः?

उत्तरम्-सूर्यः।

**भाष्यविधिः–**

- भाष्यकर्मणा विषयबोधनम्।
- प्रत्येकं पदस्य विवरणं दीयते।
- व्युत्पत्तिः अपि आवश्यकी।
- गुणकथनम्।
- अर्थकथनम्।

**तुलनाविधिः–**

- समभावात्मकश्लोकानां प्रतिपादनम्।
- श्रमाधिक्याभावात् सामान्यश्लोकानां प्रतिपादनमपि शक्यम्।
- अल्पकाले श्लोकस्य अवगमनं शक्यम्।
- तर्कनिरीक्षणशक्तेः विकासः जायते।

**समीक्षाविधिः**

- प्रश्न भाषाशैली कीदृशी अस्ति?
- प्रश्न अलङ्कारः कः?
- प्रश्न छन्दः किम्?
- प्रश्न भाषातत्त्वानि कानि?
- प्रश्न विचाराः के?

**टीकाविधिः–**

- कवेः भावान् प्रकटयति।
- पूर्वसम्बद्धविषयान् प्रकटयति।

- ➢ समञ्जनमुपस्थापनं च भवति।
- ➢ विषयस्य यथार्थप्रतिपादनं भवति।

**पद्यपाठयोजनायाः सोपनानि–**

सामान्यप्रविष्टयः, सामान्योद्देश्यानि विशिष्टोद्देश्यानि सहायकोपकरणानि पूर्वज्ञानम्– प्रस्तावना–उद्देश्यकथनम् प्रस्तुतीकरणम्, आदर्शपाठः, अनुपाठः, अशुद्धिसंशोधनम् काठिन्यनिवारणम् निर्देशनम् पाठप्रदर्शनम् (खण्डान्वयविधिः, दण्डान्वयविधिः) (आकाङ्क्षाप्रश्नाः) अन्वयनिष्कासनम्सारकथनम्, सस्वरपाठः सौन्दर्यानुभूतिप्रश्नाः, पुनरावृत्तिप्रश्नाः गृहकार्यम्।

**नाटकम्–**

नाटकं पञ्चमवेदत्वेन स्वीक्रियते, नाट्यपरम्परा अत्यन्तप्राचीना। भरतमुनिः – रामलीला कृष्णलीला रासलीला कृष्णस्य बाल्यलीला। धनञ्जयः – अवस्थानुकृतिः नाट्यम्। अभिनवगुप्तः– कल्पितकथासारः अथवा विनोदविश्रान्त्योपदेशजनको व्यापारः नाट्यम्। कालिदासः नाट्यं भिन्नरुचेः जनस्य बहुधापि। ऐक्यं समाराधनं समाधानं वा।।

**महत्त्वम् –**

नाट्यशिक्षणेन छात्राणां शाररिकमानसिकनैतिकसामाजिक सांवेगिक–विकासः जायते। नाटकेन छात्रः अल्पश्रमेण सर्वानपि विषयान् अवगन्तुं शक्नोति। मनोवैज्ञानिकदृष्ट्या अन्यविधीनामपेक्षया नाट्यमहत्त्वपूर्णं यतः एतेन सर्वाणि इन्द्रियाणि सक्रियाणि भवन्ति। अनेन अभिनयवास्तुमूर्तिसङ्गीत–चित्र– कलादीनां शिक्षा प्राप्तुं शक्यते। अवकाशक्षणानां सदुपयोगः नाटकेन भवितुमर्हति।

**भरतमुनिना उक्तम्–**

**न तत् – शास्त्रं न तत् शिल्पं,**
**नसा विद्यान सा कला।**
**नसो योगः न तत् कर्म,**
**यन्न नाट्येऽस्मिन् दृश्यते।**

भासः प्रथमः नाट्यकारः भारते कालिदासः द्वितीयः नाट्यकारः - भारते शूद्रकः अश्वघोषः भट्टनायकः भवभूतिः मुरारी - विशाखादत्तः राजशेखरः च।

**उद्देश्यानि –**

- भरतमुनिना नाट्यस्य त्रीणि उद्देश्यानि उक्तानि।
- हितोपदेशजननम्।
- विश्रान्तिजननम् च।
- विनोदजननम्।
- छात्राणाम् उचितारोहावरोहेण उचितभावभङ्गिमया च नाट्याभिनये योग्यतोत्पादनम्। छात्राणाम् अभिनयकलयोः परिचयप्रदानम्।
- छात्राणां भाषाज्ञानस्य वर्धनम्।
- छात्राणां मनोरञ्जनम्।
- छात्रेषु नाट्यसमीक्षायोग्यतायाः अभिवर्धनम्।
- छात्रेषु उच्चसामाजिकाचरणस्य अभिवृत्तिनिर्माणम्।
- छात्रेभ्यः भावाभिव्यक्त्यर्थम् अवसरप्रदानम्।
- छात्रेभ्यः आत्मप्रकाशनस्य अवसरदानम्।

**विधयः–**

आदर्शनाट्यविधिः - शिक्षकः स्वयमेव अभिनयं करोति। शिक्षकः आदर्शमुपस्थापयति।

**गुणाः–**

सर्वासु परिस्थितिषु आदर्शनाट्यविधिं स्वीकर्तुं शक्नुमः। अयं विधिः प्राथमिकस्तरे उपयोगी वर्तते, यतः नाटकानि बोधगम्यानि आकर्षकाणि च भवन्ति।

**दोषाः–**

- अस्मिन् छात्राः निष्क्रिया भवन्ति।
- कठिनशब्दानाम् अत्र व्याख्या न क्रियते।
- व्याख्यायाः अवसरः न भवति।

**व्याख्याविधिः –**

शिक्षकः नाटकस्य व्याख्यां प्रश्नोत्तरमाध्यमेन करोति, विषयञ्च बोधयति।

**गुणाः –**

- गुणदोषाणाम् आलोचनां करोति।
- नाटकस्य कथाभाषाशैल्यादीनां समुचितव्याख्यां करोति।

**दोषाः -**

- अस्मिन् छात्राः निष्क्रियाः भवन्ति।
- विभिन्नोच्चकक्षाणां कृते उपयोगि भवति।
- शिक्षणं निरसं भवति।

**रङ्गमञ्चाभिनयविधिः–**

अस्मिन् विधौ सम्पूर्णनाटकं छात्राः रङ्गमञ्चे एव दृष्ट्वा अधिगच्छन्ति प्रस्तुवन्ति।

**गुणाः –**

- रङ्गमञ्चे अभिनयस्य अवसरः प्रदीयते।
- एतेषाम् उद्देश्यानां प्राप्त्यर्थं नाटकानि लिखितानि भवन्ति।
- तेषाम् उद्देश्यानां प्राप्तिः च भवति।
- रङ्गमञ्चसज्जा–नाटकनिर्देशन–सञ्चालनादीनाञ्च अवसरः प्राप्यते।

**दोषाः–**

- अस्य कृते शक्तेः अधिकावश्यकता भवति।
- साधनानाम् अधिका आवश्यकता भवति।
- लघुनाटकं प्रस्तौतुमपि महान् कालः गच्छति।

**कक्षाभिनयविधिः–**

- छात्राः स्वयं पाठ्यांशं स्वीकृत्य स्वभूमिकां निर्वहन्ति।
- शिक्षकः सर्वेषां भूमिकानिर्धारणं करोति।
- वाचिकाभिनयपुरस्सरं शिक्षणकार्यं कुर्वन्ति।

**गुणाः–**

अनेन नाट्यशिक्षणं रुचिकरं भवति। अस्मिन् छात्राः भावाभिव्यक्तेः अवसरं प्राप्नुवन्ति, येनतेषां व्यक्तित्वे विकासः जायते। अस्मिन् रङ्गमञ्च-व्यवस्थायां, सज्जायां, प्रकाशव्यवस्थायां, ध्वनिव्यवस्थायां च समयधनयोः ह्रासः न जायते।

**दोषाः** -

- विधिरयं रङ्गमञ्चाभिनयविधिरपेक्षया प्रभावशाली न भवति, यतः वास्तविकपरिस्थितौ नाटकं न प्रस्तूयते।
- अस्मिन् नाटकस्य अन्योद्देश्यानाम् उपेक्षा क्रियते।
- यथा- नाटकस्य तात्त्विकसमीक्षायाः शब्दानां सन्दर्भाणां च।

  समन्वयविधिः/समवायविधिः

  सर्वेषां विधीनां समञ्जनं भवति।

**नाटकपाठयोजनायाः सोपानानि**-

सामान्यप्रविष्टयः, सामान्योद्देश्यानि, विशिष्टोद्देश्यानि, सहायकोप-करणानि, पूर्वज्ञानम्, प्रस्तावना, उद्देश्यकथनम्, आदर्शवाचनम्, अनुवाचनम्, बोधपरीक्षात्मकप्रश्नाः, भाषाविश्लेषणात्मकप्रश्नाः, सम्पूर्णनाटकस्याभिप्रायः,

गृहकार्यम्।

**कथा–**

- ➢ भारतीयपरम्परायां कथाशिक्षणं महत्त्वपूर्णम्।
- ➢ कथायाः स्वरूपं द्विधा।
- ➢ आख्यायिका।

कथा

नीतिकथा लोककथा

- ➢ लघुविषयाणाम् उच्चारणं कृत्वा विषयबोधनम्।
- ➢ छात्रेषु नैतिकविचारान् उत्पादयितुं शक्नुमः।

**नीतिकथा–**

- ➢ उपदेशात्मककथा पञ्चतन्त्रं, हितोपदेशः, तन्त्रोपाख्यानम्।

**लक्ष्यम्–**

- ➢ छात्राः सदाचार – नैतिकता – राजनीत्यादीनां विषयाणां ज्ञानं प्राप्स्यन्ति।

**लोककथा –**

- ➢ मनोरञ्जनप्रधाना भवति।
- ➢ काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
- ➢ कथाः न केवलं मानवनाम् अपितु पशुपक्षिणामपि भवति।
- ➢ बृहत्कथा।

**आख्यायिका–**

ऐतिहासिकपौराणिकादिघटनाधारिता भवति।

संस्कृतकथानां वैशिष्ट्यं महत्त्वञ्च

- कथाभिः मनोरञ्जनेन सह सदाचारस्यापि शिक्षा प्राप्यते।
- कथाः कौतुहलपूर्णाः भवन्ति।
- कवेः कल्पना जनेभ्यः आनन्दं प्रददाति।
- कथापठनेन जनाः व्यवहारज्ञानं प्राप्नुवन्ति।
- कथया नैतिकगुणानामपि विकासः जायते।
- कथाभिः धर्मार्थकाममोक्षादीनामपि प्राप्तिः सरलतया जायते।
- एतासां पठनेन संस्कृतस्य उच्चारणे लेखने च विकासः जायते।
- कथामाध्यमेन सांसारिकज्ञानं लभते।

**कथापाठनसमये ध्यातव्यांशाः -**

- कथायाः प्रस्तुतीकरणम्।
- शिक्षकः कथाम् एकाग्रचित्तः भूत्वा श्रावयेत्।
- शिक्षकस्य चिन्तनं कक्षायाः विचारधारानुगुणं भवेत्।
- अभिनयपूर्वकं कथा श्रावणीया।
- प्रसङ्गानुगुणं स्वरेऽपि परिवर्तनं करणीयम्।
- छात्राः कथायाः विशेषतामपि अवगच्छेयुः।
- कथासु आगतानां विशिष्टशब्दानां व्याख्या करणीया।
- छात्राणां रचनात्मकशक्तेः वर्धनाय कथालेखनस्य अभ्यासोऽपि कारणीयः।

**कथाशिक्षणस्य विधयः**

**कथनविधिः–**

भावानुगुणं प्रसङ्गानुसारञ्च शिक्षकः कक्षोचितस्वरेण अभिनयपूर्वकं रसास्वादनपुरस्सरं भावप्रदानं कुर्यात्।

**चित्रप्रविधिः–**

- कथाकथनसमये चित्रप्रदर्शनमपि भवेत्।
- प्राथमिकस्तरे चित्रदर्शनेन अधिगमः जायते।
- कथापाठनेन सरलतया चित्रं दृष्ट्वा विषयज्ञानं भवति।

**प्रश्नोत्तरविधिः–**

- प्रश्नोत्तरमाध्यमेन कथाश्रवणं कथानिर्माणं च भवति।

**संवादप्रविधिः**

- संवादेन कथायाः ज्ञानं भवति।

**कक्षाभिनयप्रविधिः–**

- अभिनयपूर्वकं कथाश्रावणेन अधिगमः रोमान्दञ्च जायते।

**गहनाध्ययनप्रविधिः–**

- बहवः गहनाध्ययनं कृत्वा कथाद्वारा उपस्थापनं कुर्वन्ति।

**कक्षाशिक्षणस्य सोपानानि –**

सामान्यप्रविष्टयः, सामान्योद्देश्यानि, विशिष्टोद्देश्यानि, सहायकोप-करणानि पूर्वज्ञानम्, कक्षावस्तु, प्रस्तावना, उद्देश्यकथनम्, काठिन्यनिवारणम्, विषयप्रवेशः, अध्यापककार्यम्, छात्रद्वारा कथकथनम्, आवृत्त्यात्मकप्रश्नाः, गृहकार्यम्।

**रचना–**

- नूतनविषयस्य कलात्मकरूपेण सर्जनमेव रचना।
- विद्यमानविषयस्थनूतनपरिस्थितौ सर्जनमेव रचना।

**रचना**

गद्यात्मक पद्यात्मक टिप्पणीमहाकाव्यम्

सामर्थ्यम् शक्तिः क्षमता चिन्तनम् रचना भवेत्।

- रच्–प्रत्यये रचनाशब्दः निष्पद्यते।
- अस्यार्थः भवति सज्जीकरणं, निर्माणं लेखनं वा।

**रचना**

मौखिकं    लिखितं

- मौखिकरूपेण गद्यपद्यकथादीनां निर्माणं कर्तुं शक्नुमः।
- लिखितरूपेण बहुविद्याः रचनाः कर्तुं शक्नुमः।
- रचनाद्वारा भावस्य प्रकाशनं भवति।
- कवेः आन्तरिकभावस्य प्रकटनं करोति।
- रचना सकारात्मकं तथाच नकारात्मकभावनया जायते।

**स्वरूपम्–**

- रिक्तस्थानानां पूर्तिरूपा रचना।
- चित्रवर्णनरूपेण रचना।
- वार्तालापलेखनेन रचना।
- विवरणात्मिका रचना।
- पुस्तकानां समालोचनात्मिका रचना।
- वाक्यांशानां समञ्जनात्मकरचना।

**मौखिकरचनाशिक्षणम्–**

**लेखनरचनाशिक्षणम्**

**मौखिकरचनाशिक्षणोद्देश्यानि–**

- छात्राणां शब्दकोशस्य वृद्धिकरणम्।
- शब्दध्वनीनां शुद्धोच्चारणाय योग्यतोत्पादनम्।
- सरलसंस्कृतेन मौखिकरचनायाः नैपुण्यसम्पादनम्।
- लघुवाक्यैः भावाभिव्यक्तेः क्षमतोत्पादनम्।

- छात्राणाम् आन्तरिकशक्तीनां बहिरानयनम्।

**प्रक्रिया-**

- शिक्षकः नवीनध्वनीनां शब्दानाञ्च उच्चारणं करोति।
- छात्राः तेषाम् अनुवाचनं करोति।
- शिक्षकः छात्राद्वारा वाक्यानि वाचयति।
- येन छात्राः विषयमवगन्तुं समर्थाः भवन्ति।
- शिक्षकः छात्राणां पुरतः स्वविचारान् प्रकटयति।

**रूपाणि**

- सरलवाक्यस्य रचना।
- प्रश्नोत्तराणि- किं, कुत्र, कति, कदा, कुतः, कथं, किमर्थम्?
- कथाकथनम्- स्वयं श्रावयति छात्राः अपि शृण्वन्ति।
- अभिनयद्वारा कथा
- सम्भाषणम्
- सस्वरवाचनम्
- सरलवर्णनं- संस्कृतेन वर्णनम्।
- साहित्यकगतिविधीनामायोजनम्।
- वादविवादः।
- ध्वनियन्त्राणां प्रयोगः।

**विधयः-**

मनोवैज्ञानिकविधिः- आत्मविश्वासेन वक्तुं शक्यते।

अनुकरणविधिः- स्वयम् उच्चारयति छात्राणाम् उच्चारणमपि कारयति।

अभ्यासविधिः - छात्राः व्यवहारिकरूपेण विषयम् अवगच्छेयुः तदर्थ शिक्षकः अभ्यासं कारयति।

संशोधनविधिः (अक्षरसंशोधनम्) पञ्च दिवसाः -

एतादृशस्य अक्षरस्य शिक्षकः रक्तवर्णालेखन्या चक्रं करोति एवं च शुद्धं रूपं च लिखति।

- छात्रान् शुद्धं लेखितुं प्रेरयति।
- दोषाणाम् उपरि चिह्नं करोति।
- यावन्तः दोषाः सन्ति तावन्ति चिह्नानि करोति।

भावसंशोधनम्।

उपसंहारसशोधनम्।

**अनुवादः**

- एकस्यां भाषायां विद्यमानस्य अपरभाषया समानरूपेण कथनमेव अनुवादः।
- अन्यभाषया अनुकथनमेव अनुवादः।
- भाषान्तरे विचराणां भाषान्तरेण प्रस्तुतिः एव अनुवादः।

**उपयोगिता–**

- अनुवादेन द्वयोः भाषयोः ज्ञानं भवति।
- छात्राः व्याकरणनियमान् अवगच्छन्ति।
- छात्राणां शब्दकोशे वृद्धिः भवति।
- अनुवादप्रक्रियया संस्कृतमातृभाषयोः समीपता जायते येन शिक्षणं सरलं भवति। अनुवादमाध्यमेन शिक्षणं रोचकं भवति।
- विभिन्नभाषासु स्थितसाहित्यस्य ज्ञानं जायते।

**उद्देश्यानि–**

- शुद्धसंस्कृतं लेखितुं योग्यतोत्पादनम्।
- व्याकरणसम्बन्धज्ञानस्य अभिवर्धनम्।
- स्वविचारान् प्रकटयितुं सामर्थ्योत्पादनम्।
- आधुनिकैः भावैः संस्कृतसाहित्यस्य समृद्धिकरणम्।

- शब्दभण्डारस्य वृद्धिकरणम्।

**प्रकाराः—**

- संस्कृतभाषया अनुवादः।
- पुनः मूलभाषया अनुवादः।
- पुनश्च अनुवादः।

**भेदाः**

- अक्षरानुवादः
- भावानुवादः / छायानुवादः
- तथ्यानुवादः

**ध्यातव्याः बिन्दवः**

- अनुवादकार्यं छात्राणां मानसिकस्तरानुगुणं भवेत्।
- पाठ्यपुस्तकानुसारं अनुवादः भवेत्।
- अनुवादकार्याय पूर्वं व्यवहारिकधातुरूपाणां रटनं कारणीयम्।
- अधिकाधिकम् अभ्यासकार्ये बलं दद्यात्।
- लिखितमौखिककार्याणां संशोधनं कुर्यात्।
- व्याकरणनियमानां ज्ञानं निश्चयेन भवेत्।
- अनुवादानन्तरम् अर्थेऽपि समानता भवेत्।

**विधयः**

पुस्तकविधिः

अनुवादं कुर्यात् एवं च उत्तराणि लिखेत्।

**द्विभाषात्मकविधिः**

एकः छात्रः मातृभाषया वाक्यं वदति, द्वितीयः संस्कृतेन अनुवादं करिष्यति।

**तुलनानुकरणविधिश्च**

शिक्षकः मूलभाषां वदति तथा च अनुवादं कृत्वा तुलनाम् अपि करोति। पुनः छात्रा अपि अनुकरणं कुर्वन्ति। स्तोत्रभाषा –विश्लेषणं – कथितभाषाहिन्दी माध्यमः सस्कृतम् उत्पादनम्–

**लिखितरचनाशिक्षणोद्देश्यानि–**

- छात्रेषु शोभनाक्षरैः लेखनसामर्थ्यस्योत्पादनम्।
- संस्कृतेन स्वविचारान् क्रमरूपेण लेखितुं सामर्थ्योत्पादनम्।
- मातृभाषया संस्कृतभाषायां, संस्कृतभाषया मातृभाषायां लेखन–सामर्थ्योत्पादनम्। अनुवादसामर्थ्योत्पादनम्।
- संस्कृतानुच्छेद–सुलेख – श्रुतलेखादीनां सामर्थ्योत्पादनम्।
- स्वतन्त्रात्मकप्रकाशनाय सामर्थ्योत्पादनम्।
- निरीक्षणस्य चिन्तनशक्तेः च विकासः। प्रश्नोत्तरलेखनस्य योग्यतायाः विकासः।
- लेखनी कथं ग्रहीतव्या।
- वर्णशब्दयोः लेखनाभ्यासः।
- वाक्यानाम् अनुच्छेदानां श्रुतलेखानां च लेखनाभ्यासः।
- रिक्तस्थानानां पूर्तिः।
- बहुविकल्पात्मकप्रश्नानाम् उत्तराणि।
- उपसर्गादीनां योजनायां वाक्यनिर्माणम्।
- सर्जनात्मकशक्तेः विकासः।

**विधयः–**

चित्रविधिः –

चित्र द्वारा छात्राणां रचनाज्ञानस्य विकासः।

**उद्‌बोधनविधिः -**

छात्राणां सर्जनात्मकविकासाय उपयोगी।

**सूत्रविधिः -**

सूत्ररूपेण विषयप्रतिपादनद्वारा विषयस्य विस्ताराय प्रेरयति।

**प्रश्नोत्तरविधिः–**

प्रश्नोत्तरमाध्यमेन ज्ञानस्य वर्धनम्।

**मन्त्रणाविधिः -**

शिक्षकः पथप्रदर्शकः भवति। पुस्तकालयस्य सहयोगेन मित्रैः चर्चा च कृत्वा तथा च शिक्षकस्य सहयोगेन रचना करोति।

**स्वाध्यायविधिः–**

अनुसन्धानं कृत्वा नूतनविषयं सर्जयति,स्वाध्यायार्थं प्रेरयति शिक्षकः।

**अनुकरणविधिः–**

निरीक्षणविधिः छात्रान् शिक्षकः निरीक्षणार्थं संसूचयति। एतेन लेखन–सामर्थ्यम् वर्धते।

शब्दलेखनविधिः–शब्दं स्वीकृत्य रचनाकरणमेव।

**तर्कवितर्कविधिः–**

येषु विषयेषु मतभेदः विद्यते तान् विषयान् स्वीकृत्य रचनाकरणम्।

**ध्यातव्याः बिन्दवः -**

- रचनया सार्क शिक्षक लेखनं कारयितुं प्रयतते।
- कक्षाकार्यम् अधिकाधिकं कर्त्तव्यम्।
- रचनाशिक्षणे शिक्षणसूत्राणां पूर्णतः उपयोगमः।
- नूतनसूक्तिषु भाषितादीनां प्रयोगः।
- रचनासु विरामचिह्नानां ज्ञानम्।

- पथप्रदर्शकरूपेण कार्यम्।
- विषयः छात्राणां स्तरानुगुणं देयः।

**रचनापाठयोजनायै सोपानानि–**

सामान्यप्रविष्टयः, सामान्योद्देश्यानि विशिष्टोद्देश्यानि सहायकोपकरणानि पूर्वज्ञानम् प्रस्तावनाप्रश्नाः, उद्देश्यकथनम् प्रस्तुतीकरणं (प्रश्नोत्तरमाध्यमेन), अध्यापककार्यम्, कक्षाकार्यम्, गृहकार्यम्।

**उच्चारणस्य स्वरूपम्**

अभिव्यक्तेः मुख्यं साधनं, आधारशिला वा उच्चारणं भवति।

- सुशक्तता उच्चारणेन आयाति।
- प्रभावोत्पादकता उच्चारणेन समुत्पद्यते।
- शुद्धतायः परिज्ञानम् उच्चारणेन जायते।
- भाषाप्रवाहस्य ज्ञापनम् उच्चारणम् भवति।
- स्वराघातेन अपि उच्चारणे प्रभावः जायते।

**अपेक्षितबिन्दवः भवति**

1. शब्दोच्चारणम्।
2. अक्षराभिव्यक्तिः।
3. बलाघातः।
4. विरामः।
5. सुस्वरता।
6. गतिः।
7. उचितवाचनमुद्रा।
8. उचितध्वनिर्निगमः।

(व्याघ्री यथा हरेत्पुत्रान् द्रंष्ट्राभ्यां च पीडयेत्, भीता पतनभेदाभ्यां तद्वर्णान्प्रयोजयेत्)।

**उद्देश्यानि–**

- ➢ शुद्धोच्चारणस्य शिक्षाप्रदानम्,
- ➢ समासान्तपदानाम् अभ्यासकरणम्
- ➢ वर्णोच्चारणेन भाषापरिज्ञानम्,
- ➢ संस्कृतोच्चारणस्य भाषाभिः परामर्शः
- ➢ प्रत्यक्षं शुद्धोच्चारणाभ्यासः
- ➢ अभ्यासेन शुद्धोच्चारणम्
- ➢ उच्चारणस्थानानां परिचयः

**उच्चारणस्य विधयः**

1. अनुकरणम्
2. आवृत्तिविधिः
3. अवरोधविधिः
4. पूर्णताविधिः
5. वाक्यसंशोधनविधिः
6. व्यवहारविधिः

कठिनशब्दान् आश्रित्य अध्यापनप्रक्रमः विधीयते।

**उपसंहारः**

अस्मिन् अध्याये संस्कृतविधानां पाठयोजनानां च चर्चा यथामति कर्तुं प्रयत्नः विहितः। क्वचित् पाठयोजनाः पूर्णरूपेण लिख्यते क्वचित् च तेषां सोपानानि एव संसूचितानि सन्ति। अग्रिमकाले अवशिष्टकार्यं पूर्णतया विधातुं प्रयत्नः करिष्यते। यद्यपि छात्रः एतेन पाठनेन सम्यक् अवबोधनं कर्तुं शक्नुयुः एव।

## पञ्चदशोऽध्यायः

# संस्कृतभाषाप्रयोगशालायाः प्रयोगः

संस्कृतभाषाशिक्षणक्षेत्रे भाषाप्रयोगशालायाः प्रयोगः नूतनशिक्षणान्वेषणं वर्तते। भाषाप्रयोगशाला व्यवहारिकभाषायाः यथार्थस्वरूपं पुनः पुनः श्रोतुं छात्रेभ्यः अवसरं कल्पयति। भाषाध्ययने श्रवणभाषणकौशलयोः सुतरां महत्वमस्ति। तदर्थं श्रवणाय भाषणाय च भाषाप्रयोगशाला सुतरामवसरं प्रददाति। दृश्यश्रव्ययन्त्राणां च उपयोगेन दीर्घकालं भाषायाः अभ्यसनं छात्राणां विनोदपूर्वकं भवेत्। छात्राणां ज्ञामिता च न जायेत तदर्थं भाषाप्रयोगशाला अत्यन्तं उपयोगिनी भवति। भाषाप्रयोगशालायां समायोजितानि यन्त्रोपकरणानि नूतनभाषायाः वर्णानां पदानां वाक्यानाञ्च उच्चारणस्य सम्यग् श्रवणं संजायते। अक्षराणामुच्चारणे स्वरस्तरः, वेगः, स्पष्टता,बलम्, क्षमता इत्यादीनाम् अवगमनाय ध्वनिमुद्रिकाः, ध्वनिमुद्रणयन्त्राणि, सिरस्पट्टिकाः,ध्वनिवर्धितानि च अपेक्षितानि भवन्ति। तेनैव माध्यमेन भाषायाः सुष्ठुतया अभ्यासः भवति,भाषायाः सन्दर्भे च पूर्णतया ज्ञानं जायते।

**भाषाप्रयोगशालायाः इतिहासः-**

द्वितीयविश्वयुद्धस्य अनन्तरं अमेरिकादेशे सप्तपञ्चाशदुत्तरनवदश-शततमसंवत्सरे प्रथमता भाषाप्रयोगशालायाः स्थापना अभूत्। षोडशोत्तरनवदश-शततमवर्षं यावत् द्विसहस्राधिकाः भाषाप्रयोगशालाः समुपस्थापिताः।

संयुक्तराज्येषु प्रथमतः एकषष्ठ्युत्तरनवदशशततमे वर्षे भाषाप्रयोग-शालायाः प्रतिष्ठापना जाता। एकषष्ठ्युत्तरनवदशसंवत्सरं यावत् एतासां भाषाप्रयोगशालानां संख्या द्विपञ्चशतोत्तरपञ्चशतं जाता। एवं कृत्वा क्रमिकरूपेण भाषाप्रयोगशालायाः स्थापनायाः प्रक्रमः वर्धमानः अभूत्।

### भाषाप्रयोगशालायाः आवश्यकता

व्याकरणशिक्षणे भाषाशिक्षणाय एषा प्रयोगशाला अतीव उपकारिणी वर्तते। शाब्दिकशक्तयः प्रतिव्यक्ति विद्यन्ते। छात्राणां भाषाकौशलानाम् अधिगमनसामर्थ्यमपि समानं न भवति। केचन शीघ्रम् अवगच्छन्ति, केचन विलम्बेन अवगच्छन्ति। अत्र उच्चार्यमाणभाषायाः अनुरोधेन वर्णानां लिपिः निमन्त्र्यते। अध्येतव्यायाः भाषायाः कुशलैः अध्यापकैः मातृभाषारूपेण वर्णानां पदानां वाक्यानाञ्च कृतमुच्चारणं ध्वनिमुद्रिकासु संगृहीतम् अत्र आदर्शरूपेण उपयुज्यते। तेन वर्णानां पदानां वाक्यानाञ्च उच्चारणेन छात्राः उच्चारणं कर्तुं सामर्थ्यमुत्पादयन्ति। छात्राः ताः ध्वनिमुद्रिकाः पुनः पुनः श्रावं श्रावं उच्चारणं कुर्वन्ति। छात्राणाम् उच्चारणं ध्वनिमुद्रणयन्त्रेण गृह्यते। अध्यापकः ततः श्रुत्वा दोषान् निवार्य समीचीनम् उच्चारणं कर्तुं बोधयति। छात्रोऽपि स्वस्य उच्चारणं स्वयं श्रुत्वा आदर्शोच्चारणेन साकं तुलनां विधाय दोषान् दूरीकृत्य पौनःपुण्येन अभ्यासेन उच्चारणकौशलं वर्धयति। भाषाप्रयोगशालायां मौखिकीं भाषां श्रुत्वा प्रतिक्रियां कर्तुं ध्वनीनाम् अनुकरणेन अभ्यासं कर्तुं दोषाणां निवारणेन सम्यग् भाषितुं च छात्रः समर्थो भवति। अस्वतपूर्वायाः नूतनभाषायाः अध्ययनकाले छात्राणां उत्साहः संरक्षितः भवति। अध्यापकस्य क्लेशं परिहर्तुं भाषाप्रयोगशाला नितरां उपयोगिनी भवति। यस्याः प्रयोगेन छात्राणां पूर्णतया संज्ञानं जायते। छात्राः च विषयं सम्यग्तया अधिगच्छन्ति।

### भाषाप्रयोगशालायाः कार्याणि

भाषाप्रयोगशाला भाषायाः संचारमाध्यमत्वेन क्रियाणां भावानाञ्च प्रसारणाय उपकरोति। भाषा बोधनेन छात्राणां भाषा कौशलेषु नैपुण्यं समुत्पादयति। अन्यां भाषामपि मातृभाषावत् छात्राः अवगन्तुं वक्तुं च समर्थाः भवन्तु, तदर्थं भाषाप्रयोगशाला योगदानं प्रददाति। छात्राणां व्यक्तिगतवैविध्येन कक्षायां जायमानाः समस्याः यथा समाप्ताः भवेयुः, तदर्थं भाषाप्रयोगशाला सुतरां योगदानं प्रददाति।

तत्तत् भाषाभाषिणां प्रमुखाणां जनानां भाषणस्य ध्वनिमुद्रिकाः श्रुत्वा छात्राः स्वीयभाषणस्य लिखितस्वरूपं पठितुं तान् द्रष्टुं दृश्यश्रव्योपकरणानां

च प्रयोगे सामर्थ्यं सम्पादयेयुः तदर्थं अवसरं प्रकल्पयति। भाषाश्रवण-शिक्षणस्याभ्यासः, श्रुतभाषणाभ्यासः, श्रवणवाचनक्रियाभ्यासः अत्र पौनः पुन्येन समायोजिताः भवन्ति येन छात्राः स्वीयं व्यवहारं भाषया कर्तुं शक्नुयुः।

भाषाप्रयोगशाला छात्राणामुपकारिका भवति। विभिन्नानां जनानाम् आदर्शभाषणानि ध्वनिमुद्राद्वारा छात्रेभ्यः श्रोतुमवसरं कल्पयति। छात्राः ध्वनिमुद्रिकामाध्यमेन पुनः पुनः श्रवणाभ्यासं कुर्वन्ति। छात्राः स्वेच्छया साधनानि चित्वा स्वगत्या अध्येतुमवसरं प्राप्नुवन्ति। भाषाप्रयोगशाला अध्यापकान् अप्युपकरोति। अध्यापकाः वैयक्तिकरूपेण छात्राणामध्ययनकार्यं ज्ञातुं सहायतां कर्तुं प्रयतन्ते किन्तु ते वैयक्तिकमार्गदर्शनं कर्तुं तथा नैपुण्यं न प्राप्नुवन्ति किन्तु भाषाप्रयोगशालाबलेन एकवारं सज्जीकृतसामग्र्याः पुनः पुनः प्रयोगेण छात्राणामुपकारं कर्तुं शक्नुवन्ति। एकस्य शिक्षणम् अन्यस्य बाधाकरं न भवति तेषामपि शिक्षणं प्रोत्साहयति। अध्यापकः शिक्षणकार्यस्य निर्वहणेन समस्यानां नियन्त्रणेन च छात्राणामध्ययननं निर्विघ्नं वर्धयति। शिक्षकः छात्रान् पुनः पुनः श्रावयित्वा तेषां सामर्थ्यं वर्धयति।

### व्यवस्थापनं विनियोगस्य

भाषाप्रयोगशालायाः कक्षायां प्रत्येकं छात्राणां कृते एकैकं व्यवस्थापितं भवति। प्रत्येकं प्रकोष्ठेषु एकः लघु प्रकोष्ठः भवति। प्रत्येकं प्रकोष्ठेषु श्रवणयन्त्रं ध्वनिकर्षकयन्त्रं ध्वनिमुद्रणयन्त्रञ्च समायोजितमुपस्थापितं भवति। अत्र साधारणतया भाषाशिक्षणमेव प्रचलित। यथा अध्यापकः प्रथमं आदर्शध्वनिमुद्रिकां श्रावयति। सः शब्दः प्रत्येकं प्रकोष्ठेषु ध्वनिमुद्रणयन्त्रेण मुद्रितो भवति। छात्राः यथापेक्षं तान् तान् शब्दान् श्रुत्वा स्वयमुच्चारयन्ति स्वीयं उच्चारणं च मुद्रयन्ति। छात्राः आदर्शशब्दान् स्वीयशब्दांश्च पुनः पुनः श्रुत्वा भेदमवगच्छन्ति। तेन भेदावगमनेन तेषां शुद्धतायै प्रयत्नोऽपि जायते। ततः छात्राः सम्यगभ्यासं कृत्वा समीचीनमुच्चारणमधिगच्छन्ति। उच्चारणकौशलं प्रति उच्चारणकौशलप्राप्तिपर्यन्तम् एषा प्रक्रिया सततं प्रवर्तते। अध्यापकः छात्राणां मुद्रितमुच्चारणं श्रुत्वा उचितान् उपायान् निर्दिशति। एषाऽभ्यासप्रक्रिया छात्राणां भाषाकौशलं यावत् आदर्शकौशलसदृशं

न भवति तावत्पर्यन्तं शिक्षकाः ताः मुद्रिकाः वारम्वारं श्रावयन्ति। भाषाकौशलसम्पादनाय विभिन्नाः क्रियाः जायन्ते, क्रियन्ते वा। एताः सर्वाः अपि भाषाश्रवणप्रक्रियाः इति उच्यन्ते। याभिः क्रियाभिः छात्राणां श्रवणमुच्चारणञ्च सम्यग्जायेत। अनेनाभ्यासेन स्वरः स्पष्टः वेगपूर्णश्च जायते। अयमभ्यासः भाषाऽभ्यासः कथ्यते। अतः प्रथमतः विविधप्रकारकाः शब्दाः पदानि पदवन्तः वाक्यानि च ध्वनिमुद्रिकाद्वारा श्राव्यन्ते। तथा केषाञ्चित् प्रश्नानां उत्तराणि छात्रैः वक्तव्यानि भवन्ति तदर्थं छात्राः पाठ्यपुस्तकं दृष्ट्वा वक्तुं शक्नुवन्ति। अभ्यासात्परं शिक्षकस्य आवश्यकता तु भवति परं पुस्तकस्यावश्यकता न भवति। छात्राः पौनःपुन्येन च शिक्षकाणां अधिगमसामर्थ्यं समुत्पादयन्ति

**भाषाप्रयोगशालायाः प्रयुक्ताः क्रियाः**

अध्यापकः केन्द्रस्थाने स्थित्वा कार्यक्रमं प्रसारयति। छात्राः शृण्वन्ति अध्यापकः कार्यक्रमस्य क्रियान्वयनं करोति छात्राणाञ्च स्वेच्छया सामर्थ्यं वर्धयति।

**पाठागारस्य विनियोगः**

छात्राः केन्द्रस्थानरूपेण अत्र एकस्मिन् प्रकोष्ठे उपस्थापिताः भवन्ति। ताः मुद्रयित्वाऽनेकवारं श्रृण्वन्ति अभ्यासञ्च कुर्वन्ति। यद्यपि अत्र धनव्ययः अधिको भवति तथापि छात्राः स्वेच्छया स्वरुचिनिगुणं अध्येतुं पुनः पुनः प्रयत्नं कुर्वन्ति तेन तेषां सर्वविधदोषाः परिसमाप्ताः भवन्ति।

**संयोजनपद्धति :**

एषा काचित् प्रसारप्रयोगशाला भवति। अत्र छात्राणां कोष्ठकेषु ध्वनिमुद्रणयन्त्राणि श्रवणयन्त्राणि च संयोजितानि भवन्ति। ग्रन्थालय-विनियोगपद्धत्यां अपि ध्वनिमुद्रिकाः अन्यकार्यक्रमाश्च संकेतद्वारा प्राप्तुं शक्यन्ते।

**दूरवाण्या प्राप्तिः**

छात्रः संकेतांकद्वारा स्वयंचालितपद्धत्या एकं कार्यक्रमं श्रोतुं शक्नोति

परन्तु ग्रन्थालये विनियोगपद्धत्यां अपि किमपि ध्वनिमुद्रिकां मध्ये एव स्थगयितुं वा कमपि भागं पुनः पुनः श्रोतुं वा न शक्नोति। एवं कोऽपि छात्रः संकेतांकद्वारा कमपि कार्यक्रमं प्राप्तुमर्हति।

**भाषाप्रयोगशालायाः विशेषाः**

आवृत्तिः, स्वगतिः, साधनानां चयनस्य स्वातन्त्र्यं, केन्द्रस्थानम्।

**आवृत्तिः**

भाषाकौशलानि अभ्यासेनैव प्राप्तुं शक्यन्ते। अभ्यासं विना भाषाकौशलानि न समुत्पद्यन्ते। अतः अत्र वारं वारं छात्राः अनुकरणम् आवृत्तिं च कुर्वन्ति येन तेषां ज्ञानं जायेत।

**स्वगतिः**

अत्र छात्राः स्वगत्यनुसारं अध्ययनं कर्तुं प्रभवन्ति वारं वारं। यतः सर्वेऽपि छात्राः गतिस्तरे भिद्यन्ते। तेषां ज्ञानं सामर्थ्यं च पृथक् पृथक् भवतीति कृत्वा ते स्वगत्यनुसारं वैकल्पिकाधारेण छात्राः अध्ययनं कर्तुं शक्नुवन्ति।

**साधनानां चयनस्य स्वातन्त्र्यम्**

अत्र छात्राः स्वसाधनानुगुणं अध्ययनाय प्रवृत्ताः भवितुं अर्हन्ति। तेषां यथा सामर्थ्यं अस्ति तत्सामर्थ्यानुगुणं ते प्रयत्नपूर्वकं स्वीयं विकासं कर्तुं सामर्थ्यं च संधारयितुं शक्नुवन्ति।

**केन्द्रस्थानम्**

छात्राणां नियन्त्रणाय मार्गनिर्देशनाय च केन्द्रस्थाने अनेकविधाः पिञ्जाः भवन्ति। तैः पिञ्जैः सर्वेषामपि छात्राणां तत्तत्स्थानेषु स्थितानां नियन्त्रणं सहजतया भवितुमर्हति। अतः शिक्षकः तैः साकं प्रत्येकं छात्रेण सह वैयक्तिकं सम्बन्धं स्थापयितुं शक्नोति, वैयक्तिकसम्बन्धेन च कार्यं कर्तुं प्रभवति।

**भाषाप्रयोगशालायाः लाभाः**

छात्रः अध्येतायाः भाषायाः निर्दुष्टं भाषणं सम्यक् सम्यक् कर्तुं शक्नुयात् तदर्थं भाषाप्रयोगशाला महत्त्वपूर्णं योगदानं प्रददाति। अल्पप्रयत्नेन बहु अध्ययनं कर्तुं शक्यते। सहजतया सुन्दरं सुस्पष्टं च वक्तुमवसरः प्राप्यते। स्वगत्यनुकारं छात्रः पठितुं शक्नोति। लज्जायाः अभावः भवति। छात्राणां ज्ञानं वर्धते। छात्राः सुविस्तृतं ज्ञानं प्राप्तुं शक्नुवन्ति। अन्येषां भाषणानां अनुकरणं कर्तुम् अवसरं प्राप्नुवन्ति। लज्जां विना ते ज्ञानं प्राप्तुं शक्नुवन्ति। भीतेः अभावः च जायते।

**भाषाप्रयोगशालायाः सीमाः**

विद्युद्यन्त्राणामुपयोगेन भाषाप्रयोगशालायाः निर्माणं क्लेशकरं बहुव्यय-साध्यं च भवति। भाषाप्रयोगशालायाः निर्माणाय प्रविधिविशेषज्ञानाम् आवश्यकता भवति। भाषाशास्त्रविशेषज्ञानां च अपेक्षा भवति। भाषाप्रयोगशालायाः निमित्तं तादृशाः सामर्थ्यवन्तः दुर्लभतया प्राप्यन्ते। भाषाप्रयोगशालायाः व्यवस्थायै निपुणाः अध्यापकाः आवश्यकाः। तादृशाः अध्यापकाः न लभ्यन्ते इति कारणेन कष्टं समुत्पद्यते। प्राचीनकाले समर्थानां गुरूणाम् उच्चारणमनुकरण-योग्यमासीत्। अधुना समस्या वर्तते, अतः तादृशोच्चारणकर्तॄणामपि अभावकारणेन भाषाप्रयोगशालायाः किञ्चित् सौविध्यं न भवति। विद्यालयेषु महाविद्यालयेषु च सर्वत्र भाषाप्रयोगशालायाः स्थापनं दुष्करमस्ति। दुरूहस्थलेषु च कष्टमयमस्ति। अतः भाषाप्रयोगशालायाः उपस्थापनं महत्करं वर्तते।

## षोडशोऽध्यायः

# मूल्याङ्कनम्

वैदिककालात् एव प्रश्नोत्तरशास्त्रार्थतर्कवितर्कसंवादशलाका-परीक्षादिभिः मूल्याङ्कनमेव जायते स्म। सापेक्षरूपेण मूल्याङ्कनं नवीनपरिभाषिकं पदम् अस्ति। पाठ्यवस्तुनः मूल्याङ्कने वृत्त्यः रुचयः आदर्शाः चिन्तनदृष्टयः, कार्यव्यवस्थापनं, वैयक्तिकसामाजिकानुकूलाः भवन्ति। मूल्याङ्कनं व्यापकपदं वर्तते यत्र मापनं निरीक्षणञ्चान्तर्भूते स्तः। मूल्याङ्कने शारीरिक-मानसिक-नैतिकादयः पक्षाः अन्तर्भूता भवन्ति।

मूल्याङ्कनं परीक्षणरूपेण द्विधा जायते, पाठान्तर्गतत्वेन, पाठान्तत्वेन च। अत्र पाठान्तर्गत्वेन बोध-भाव-विचार-विश्लेषणभावविश्लेषणविषय-विश्लेषणादीनि जायन्ते। पाठान्तत्वेन विविधपाठसम्बद्धान् प्रश्नान् पृष्ट्वा सोद्देश्यं पाठ्यसाफल्याय, छात्रानुपलब्धेः च मूल्याङ्कनं जायते।

शिक्षणस्य प्रारम्भात् पूर्वं शिक्षकः कतिपयोद्देश्यानि निर्धारयति, तदनुकूलविधिं चिनोति, तस्य क्रियान्यवनं च कक्षा शिक्षणे करोति। कृतस्य कार्यस्य सफलतां ज्ञातुं प्रययते, तदर्थं प्रचालितपरीक्षणक्रमः छात्राणां ज्ञानस्तरं वृद्धिकौशलं कार्यशक्तिं च निश्चिनोति। एतेन शिक्षकाणां शिक्षणं सफलं न वा ज्ञायते। केचन परीक्षणोपक्रमाः-

**शलाकापरीक्षा – शलाकापरीक्षयापि**

छात्राणां स्मरणशक्तेः परीक्षणं क्रियते स्म। तत्र स्मरणशक्तिः, तात्कालिकबुद्धिः, विवेचनसामर्थ्यं, उत्तरकथनसामर्थ्यं, भाषणकौशलं स्पष्टता, विविधता च परीक्षन्ते स्म।

विषयस्य स्पष्टीकरणाय दृढीकरणाय च छात्राः चक्रत्रये परीक्षन्ते।

- स्मरणश्रवेण (अनेकवारम्)

- व्याख्याश्रवणेन (अनेकवारम्)
- प्रश्नानामुत्तराणि श्रुत्वा च (अनेकवारम्)

**विवेचनात्मकशक्तिपरीक्षा –**

छात्राणां विषयप्रतिपादनसामर्थ्य ज्ञानाय विवेचनसामर्थ्यं परीक्ष्यते। तत्र हि-

- पठितविषयविवेचनम्।
- अपठितविषयविवेचनम्।
- ज्ञातविषयविवेचनम्।
- आशुविषयविवेचनम्।
- सारकथनम्।
- गद्यस्य विवेचनम्।
- भावात्मकस्वरूपप्रतिपादनम्।

एतैः प्रकारैः विवेचनात्मकशक्तिपरीक्षा छात्राणां क्रियते।

**सामान्यविवेकपरीक्षा -**

विवेको नाम बुद्धिः इति। वास्तविकज्ञानपरीक्षणाय यथार्थज्ञानपरीक्षणाय वा सामान्यविवेकपरीक्षा क्रियते। अत्र ज्ञानस्य, अवगमनस्य गभीरतायाः विद्यायाः, पाण्डित्यस्य वा परीक्षणं क्रियते।

- चिह्नपरिज्ञानपरीक्षा।
- स्वरूपपरिज्ञानपरीक्षा च।

आभ्यां परीक्षाभ्यां विविधैः चिह्नैः छात्राणां कल्पनाशक्तेः विकासः कारयितुं शक्यते।

**योग्यतापरीक्षा –**

अत्र हि छात्राणां शीघ्रपठनस्य, शीघ्रार्थावगमनस्य, अवगमनस्य, अभिवृद्धेः च परीक्षणं भवति। अनेन छात्राणां योग्यतायाः परिज्ञानं जायते।

अत्र परियोजनाकार्याणि, मानसिककार्याणि, प्रगतिः, भाषणं, संवादः, समञ्चनं, अर्हता च परीक्ष्यन्ते। तदनुरूपेणावश्यकपरामर्शाः अपि दीयन्ते।

अध्ययनात् परं परीक्षणं सुतराम् अपेक्षितं भवति। प्राचीनकालादेव मूल्याङ्कनम् अस्माकं परम्परायां दरिदृश्यते मूल्याङ्कनं विना विषयस्य ज्ञातता नावगम्यते।

**मूल्याङ्कनविधयः-**

उद्देश्यानां मात्रात्मकं निर्धारणमेव मूल्याङ्कनम्।

- उद्देश्यम्
- मूल्याङ्कनम्
- शिक्षणपद्धतयः

एते त्रयः अंशाः मुख्याः भवन्ति।

**मूल्याङ्कनम्-**

- मूल्याङ्कनं सततप्रक्रियास्ति।
- छात्राणां व्यवहारिकतत्त्वानाम् एकत्रीकरणस्य काचित् प्रक्रियास्ति।
- शिक्षायाः उद्देश्यैः साकं मूल्याङ्कनस्य कश्चन घनिष्ठसम्बन्धः अस्ति।
- शिक्षणे विविधविधीनां प्रयोगाय प्रेरणां ददाति मूल्याङ्कनम्।

**महत्त्वम्**

- योग्यच्छात्राणां चयने सहायकम्।
- पाठ्यविषयाणां चयने सहायकम्।
- मार्गदर्शने सहायकं ज्ञानवर्धने सहायकम्।
- शिक्षकस्य कार्यस्य परीक्षणं भवितुमर्हति।

**स्वरूपम्**

- आन्तरिकम्
- बाह्यञ्च

**आन्तरिकम्**

- सततमूल्याङ्कनम्।
- उच्चारणगतमूल्याङ्कनम्।
- वाक्यप्रयोगगतमूल्याङ्कनम्।

**बाह्यम्**

- वस्तुनिष्ठप्रश्नः।
- लघूत्तरीयप्रश्नः।

**विधयः**

- परिमाणात्मकप्रविधिः।
- गुणात्मकप्रविधिः।

**परिमाणात्मकप्रविधिः त्रिधा**

- मौखिकपरीक्षा वस्तुनिष्ठप्रश्नः।
- लिखितपरीक्षानिबन्धात्मकप्रश्नः।
- प्रयोगात्मकपरीक्षास्थानप्रयोगात्मकम्।

**गुणात्मकप्रविधिः**

- आन्तरिकमूल्याङ्कनाय महत्त्वपूर्णम्।
- निरीक्षणम्।
- साक्षात्कारः प्रश्नावली।
- मूल्याङ्कनसूची अभिरुचिः,
- अभिवृत्तिः

- Rating scale विशेषक्षेत्रस्य परीक्षणम्
- सञ्चिताभिलेखः
- बालकोत्पादितसामग्री
- मौखिकपरीक्षणम्
- लिखितपरीक्षणम्
- व्यक्तिवृत्त्यध्ययनपरीक्षणम्
- कक्षाकक्षपरीक्षणम्
- आन्तरिकगतिविधिमूल्याङ्कनम्

**परीक्षाधारितमूल्याङ्कनप्रणाली**

ज्ञानस्य अपेक्षायाः परीक्षायाः महत्त्वम्।

- सम्पूर्णपाठ्यक्रमस्योपेक्षा।
- सहयोगस्योपेक्षा।
- प्रश्नपत्राणां दोषपूर्णरचना।
- प्राप्ताङ्कैः योग्यतायाः मूल्याङ्कनाभावः।

**आदर्शप्रश्नपत्रनिर्माणम्–**

- नूतनमूल्याङ्कनप्रणाली।
- उद्देश्यानि आधारीकृत्य बहुविकल्पम्।
- रिक्तस्थानपूर्तिसम्बद्धप्रश्नाः।
- सत्यासत्यसम्पृक्तप्रश्नाः।
- समानतानिर्देशकप्रश्नाः।

प्रथमस्तरे– शब्दस्तरे परीक्षणम्।

द्वितीयस्तरे – वाक्यस्तरे परीक्षणम्।

तृतीयस्तरे – समानार्थकशब्दानां परीक्षणम्

चतुर्थस्तरे- रिक्तस्थानपूर्तिपरीक्षणम्।

पञ्चमस्तरे- सत्यासत्यपरीक्षणम्।

बहुविकल्पात्मकं परीक्षणम्

(क) (ख) (ग) (घ)

**निबन्धात्मकप्रश्नः**

- लेखनसामर्थ्यस्य परीक्षणम्

उद्देश्यानुसारम् अङ्कविभाजनम्

- उद्देश्यानि
- अङ्कभारः
- प्रतिशतम्

| **उद्देश्यानि** | **अङ्कभारः** | **प्रतिशतम्** | **स्थितिः** | |
|---|---|---|---|---|
| ज्ञानात्मकम् | 10 | 40 | सामान्या | कौशलदृष्ट्या |
| अनुबोधात्मकम् | 6 | 24 | मध्यमा | चिन्तनं |
| अनुप्रयोगात्मकम् | 5 | 20 | उच्चस्तरीया | करणीयं |
| कौशलात्मकम् | 4 | 16 | प्रयोगात्मिका | स्यात् |
| **आहत्य** | **25** | **100** | | |

## प्रश्नानुगुणम् अङ्गविभाजनम्

| प्रश्नानां प्रकाराणि | संख्या | अङ्काः | प्रतिशतम् | स्तरम् | परिस्थिति- |
|---|---|---|---|---|---|
| निबन्धात्मकम् | 1 | 4 | 16 | स्तरानुगुणम् | परिवर्तन- |
| लघूत्तरात्मकम् | 1 | 2 | 8 | ,, | पुरस्सरमपि |
| अतिलघूत्तरात्मकम् | 7 | 7 | 28 | ,, | अङ्कविभा- |
| वस्तुनिष्ठात्मकम् | 12 | 12 | 48 | ,, | जनम् |
| **आहत्य** | **21** | **25** | **100** | | |

## विषयवस्तुरूपेण अङ्कविभाजनम्

| विधा | अङ्कभारः | प्रतिशतम् | | |
|---|---|---|---|---|
| गद्यम् | 10 | 40 | विषयवस्तुच्छात्र- | परीक्षण- |
| पद्यम् | 6 | 24 | स्तरा-नुगुणं | स्थितेः |
| व्याकरणम् | 5 | 20 | स्वीकर्तव्यम् | आधारेण |
| रचना | 4 | 16 | | चिन्तनम् |
| **योगः** | **25** | **100** | | |

उपसंहाररूपेण विचार्यते चेत् मूल्याङ्कनम् अध्यापनसाहाय्यम् आचरति। मूल्याङ्कनेन विषयदृढता अपि समुत्पद्यते। ततः प्रत्येकं शिक्षकेण मूल्याङ्कनम् उचितकाले पुनः पुनः विषयवस्तुदृढीकरणाय करणीयम्।

## परिशिष्टम् - 1

# परियोजना ( संस्कृतशिक्षणम् )

1. श्रवणविकासाय विधीन् लिखत।
2. भाषणविकासाय विधीन् लिखत।
3. पठनसामर्थ्य विकासाय विधीन् लिखत।
4. लेखनसामर्थ्यविकासाय विधीन् लिखत।
5. भाषाप्रयोगशालया कथम् उच्चारणाभ्यासः भवति।
6. संस्कृतस्य पाठयोजनाः लिखत -
7. पष्ठकक्षायाः पाठे विद्यमानव्याकरणतत्त्वानि लिखत।
8. सप्तमकक्षायाः पाठे विद्यमानव्याकरणतत्त्वानि लिखत।
9. अष्टमकक्षायाः पाठे विद्यमानव्याकरणतत्त्वानि लिखत।
10. नवमकक्षायाः पाठे विद्यमानव्याकरणतत्त्वानि लिखत।
11. दशमकक्षायाः पाठे विद्यमानव्याकरणतत्त्वानि लिखत।
12. संस्कृतस्य इतिहासं लिखत।
13. संस्कृतस्य स्वरूपम्, व्याकरणस्य उद्देश्यानि, व्याकरणस्य सोदाहरणनि प्रतिपादयत।
14. संस्कृतस्य भाषावैज्ञानिकस्वरूपं लिखत।
15. संस्कृतस्य वैज्ञानिकतां विवेचयत।
16. पारम्परिकविधीन् लिखत।
17. अनेन प्रकारेण सकलविधीनामाधारेण वाच्यानां पाठनं वा अभ्यासं कथं कुर्मः।
18. पष्ठकक्षायाः पाठयोजनां लिखत।
19. सप्तमकक्षायाः पाठयोजनां लिखत।

20. अष्टमकक्षायाः पाठयोजनां लिखत।
21. नवमकक्षायाः पाठयोजनां लिखत।
22. दशमकक्षायाः पाठयोजनां लिखत।
23. पद्यविधायाः विवरणं लिखत।
24. गद्यविधायाः विवरणं लिखत।
25. रचनाविधायाः विवरणं लिखत।
26. अनुवादविधायाः विवरणं लिखत।
27. कथाविधायाः विवरणं लिखत।
28. पद्यविधीन् लिखत।
29. गद्यविधीन् लिखत।
30. कथाविधीन् लिखत।
31. नाटकविधायाः विवरणं लिखत।
32. नाटकविधीन् लिखत।
33. नवमकक्षायाः सर्वपाठस्थसमासविषयान् लिखत।
34. नवमकक्षायाः सर्वपाठस्थसन्धिविषयान् लिखत।
35. नवमकक्षायाः सर्वपाठस्थकृदन्तविषयान् लिखत।
36. नवमकक्षायाः सर्वपाठस्थस्त्रीप्रत्यान्तशब्दान् लिखत।
37. नवमकक्षायाः सर्वपाठस्थतद्धितप्रत्ययान्तशब्दान् लिखत।
38. नवमकक्षायाः सर्वपाठस्थतिङन्तप्रत्ययान्तशब्दान् लिखत।
39. धातूनां पदित्वविज्ञानं लिखत।
40. अकर्मकधातूनां विवरणं लिखत।
41. सकर्मकधातूनां विवरणं लिखत।
42. द्विकर्मकधातूनां विवरणं लिखत।
43. इड्व्यवस्थापाठनप्रकारं लिखत।
44. सकर्मकाकर्मकधातूनां पाठनप्रकारं लिखत।
45. समासपाठनप्रकारं लिखत।

# परिशिष्टम् - 2

**संस्कृतगद्यपाठयोजना-1**

दिनाङ्कः ...................... अवधिः ...................

कक्षा ...................... विषयः ....................

कालाशः ...................... प्रकरणम् ....................

**सामान्योद्देश्यानि –**

- सम्पूर्णसंस्कृतवाङ्मयमाधारीकृत्य छात्रेषु संस्कृतभाषां प्रति अनुरागोत्पादनम्।
- छात्रेषु संस्कृतगद्यं प्रति अभिरुचिजागरणम्।
- छात्राणां शब्दभण्डारस्य अभिवर्धनम्।
- छात्रेषु संस्कृतगद्यांशस्य अर्थग्रहणक्षमतायाः विकासः।
- छात्रेषु गद्यगतभावनानाम् अवबोधनक्षमतायाः च विकासः।
- छात्राणां वर्णनविश्लेषणरचनादिबौद्धिकशक्तीनां वर्धनम्।
- छात्रेभ्यः गद्यगतादर्शानुगुणं स्वजीवने आचरणाय प्रेरणादानम्।

**विशिष्टोद्देश्यानि–**

- छात्राः पाठे आगतानां नूतनशब्दानां ज्ञाने समर्थाः भविष्यन्ति। यथा– कुसुमाकरः, मधुमासः, ऋतुराजः, मधुकरः इत्यादयः।
- छात्राः 'वसन्तऋतुः' इति पाठेन वसन्तऋतुविषये ज्ञास्यन्ति।
- छात्राः सन्धिपदानां विच्छेदने समर्थाः भविष्यन्ति।
- छात्राः नूतनशब्दानामाधारेण वाक्यनिर्माणं करिष्यन्ति।
- छात्राः शब्दार्थज्ञाने समर्थाः भविष्यन्ति।

**सहायकोपकरणानि –**

- श्यामफलकम्
- वसन्तऋतोः सम्बन्धानि वर्णचित्राणि
- स्फोरकपत्राणि
- आङ्कुञ्चनफलकम्
- सङ्केतिका
- प्रतिकृतिः
- विभिन्नवर्णानां सुधाखण्डाः च।

**पूर्वज्ञानम्**–

छात्राः ऋतूनां परिवर्तनविषये किञ्चित् जानन्ति।

**प्रस्तावना**

छात्राध्यापकः/छात्राध्यापिका 'ज्ञातात् अज्ञातं प्रति' इति शिक्षणसूत्रम् अनुसरन्/अनुसरन्ती छात्रान् पाठोन्मुखीकर्तुम् अधोलिखितान् प्रश्नान् पृच्छति।

| छात्राध्यापकक्रिया | छात्रक्रिया |
|---|---|
| प्र. भारते कति ऋतवः भवन्ति?<br>प्र. तेषां नामानि कानि? | उ. भारते षड् ऋतवः भवन्ति।<br>उ. तेषां नामानि– वसन्त– ग्रीष्म– वर्षा – शरद्शिशिर – हेमन्तः चेति। |
| प्र. एतेषु ऋतुषु वसन्तः पञ्चमी कदा आयाति? | उ. एतेषु ऋतुषु वसन्तपञ्चमीवसन्त– ऋतौ पञ्चमदिनाङ्के आयाति। |
| प्र. वसन्तऋतौ किं किं जायते? | उ. छात्राः मौनेन तिष्ठन्ति।<br>किमपि न वदिष्यन्ति। |

**उद्देश्यकथनम्**– अस्तु, अद्य वयं वसन्तऋतौ कानि कानि परिवर्तनानि भवन्ति इत्यस्य विषये पठामः।

**प्रकरणलेखनम्**- अस्मिन् समये छात्राध्यापकः विषयस्य नामोल्लेखं करोति।

**प्रस्तुतीकरणम्**- पाठस्य प्रथमवाक्यं तथा च अन्तिमवाक्यं लिखति।

**आदर्शवाचनम्**- छात्राध्यापकः कक्षोचितस्वरेण, विरामादिचिह्नानुसारेण, भावानुगुणं, समुचितप्रवाहेण, शुद्धतया, स्पष्टतया च गद्यांशस्य आदर्शवाचनं करिष्यति। सर्वे छात्राः ध्यानेन शृण्वन्ति।

**अनुवाचनम्**- छात्राध्यापकः कतिपयान् छात्रान् अनुवाचनाय निर्देक्ष्यति, निर्दिष्टाः छात्राः तथैव पठिष्यन्ति अन्ये श्रोष्यन्ति।

**अशुद्धिसंशोधनम्**- छात्राध्यापकः छात्रैः अनुवाचने पठितानाम् अशुद्धशब्दानां श्यामफलके लिखित्वा छात्राणां सहयोगेन संशोधनं करिष्यति।

**काठिन्यनिवारणम्**- पूर्वं छात्रान् अर्थं पृच्छति,यदि छात्राः जानन्ति तर्हि साक्षात् लिखति अन्यथा छात्राध्यापकः पाठे आगतानां कठिनशब्दानां युक्तिपूर्वकं काठिन्यनिवारणं करिष्यति।

| **क्रमः** | **शब्दः** | **अर्थः** | **युक्तयः** | **युक्तिप्रयोगः** | **मूल्याङ्कनम्** |
|---|---|---|---|---|---|
| 1. | मधुकरः | भ्रमरः | प्रत्यक्षविधिः | चित्रं दर्शयति | मधुकरः पुष्परसं पिबति। |
| 2. | कुसुमाकरः | पुष्पगुच्छः | प्रत्यक्षविधिः | चित्रं दर्शयति | |
| 3. | अम्बुधिः | सागरः | पर्यायविधिः | सागरः, जलधिः, वारिधिः | हनुमान् सागरलङ्घनं कृतवान्। |
| 4. | विभावरी | रात्रिः | विलोमविधिः | दिवसः | |

**निर्देशः-**

बोधनानन्तरं छात्राः स्वसञ्चिकायां लेखिष्यन्ति।

**कक्षानिरीक्षणम्-**

छात्राध्यापकः कठिनशब्दानाम् अर्थलेखनाय निर्देक्ष्यन्ति,छात्राः स्वपुस्तिकासु लेखिष्यन्ति। छात्राध्यापकः कक्षायाः निरीक्षणं करिष्यति।

**बोधप्रश्नाः–**

छात्राणां अर्थावगमनं भवति न वा तदर्थं प्रश्नं करोति। यथा- प्र. भारतदेशः कीदृशः अस्ति? प्र. सर्वेषु ऋतुषु रमणीयः ऋतुः कः?

**मौनवाचनम्–**

छात्राध्यापकः सर्वान् छात्रान् मौनवाचनाय निर्दिश्य स्वयं कक्षायाः निरीक्षणं करिष्यति।

**सस्वरवाचनम्-**

लघुबालानां कृते सस्वरवाचनं भवति उच्चारणगतदोषाणां निवारणाय, स्पष्टोच्चारणाय च छात्राध्यापकः सरस्वरवाचनं कारयति।

**अध्यापककथनम्-**

छात्राध्यापकः दृश्यश्रव्योपकरणानां सहयोगेन पाठस्य विस्तृतव्याख्यानं करिष्यति।

**पुनरावृत्त्यात्मकप्रश्नाः -**

एषः प्रश्नः कठिनः भवति।

1. वसन्तऋतौ पशुपक्षिणः कीदृशाः दृश्यन्ते?
2. वसन्तऋतौ तापः कीदृशः भवति?

**कक्षाकार्यम् –**

छात्राध्यापकः पठितांशस्य परीक्षणार्थं कक्षाकार्यं दास्यति। कक्षाकार्याय

पूर्वमेव श्यामफलके/आकुञ्चनफलके विलिख्य आनयति। तत् वर्णमेलनस्य, रिक्तस्थानपूरणस्य बोधविश्लेषणस्य च प्रश्नाः भवितुमर्हन्ति।

1. रिक्तस्थानानि पूरयत।
2. वर्णान् मेलयत।

**गृहकार्यम्–**

छात्राध्यापकः श्यामफलके गृहकार्यार्थं प्रश्नान् लेखिष्यति यथा–

1. सर्वेषाम् ऋतूनां नामानि विलिख्य चित्रं प्रदर्शयतु।
2. ऋतुफलानि संयोज्य ऋतुविषयं दर्शयतु।

## नाट्यपाठयोजना-2

दिनाङ्कः ...................... अवधिः ...................

कक्षा ...................... विषयः ....................

कालाशः ...................... प्रकरणम् ....................

**सामान्योद्देश्यानि–**

- वार्तालापे सरलसंस्कृतस्य प्रयोगाय प्रेरणा देया।
- संस्कृतभाषां प्रति अभिरुचेः सम्वर्धनम्।
- संस्कृतेन पठन-वाचन-लेखनादिकौशलोत्पादनम्।
- छात्रेषु अभिनयकलायाः विकासः।
- छात्रेभ्यः संस्कृतनाटकानां परिचयप्रदानम्।
- नाट्यमाध्यमेन छात्राणां शब्दभण्डारस्य अभिवर्धनम्।
- नानापरिस्थितिषु छात्राः व्यवहारकुशलाः भवेयुः तदर्थं प्रयासः।

**विशिष्टोद्देश्यानि–**

छात्रेभ्यः विविधरसानां तथा च चातुर्यस्य च ज्ञानप्रदानम्।

**सहायकोपकरणानि–**

नाटकविषयकानि चित्रफलकानि।

**पूर्वज्ञानम्–**

छात्राः अकबरबीरबलविषये हिन्दीभाषया कांश्चन कथाः श्रुतवन्तः।

**प्रस्तावना–**

छात्राणां पूर्वज्ञानपरीक्षणाय अभिप्रेरणायै च "सरलात् कठिनं प्रति" इति सूत्रानुसारम् अधोलिखितान् प्राश्नान् पृच्छति।

प्र. अकबरस्य सभायां कति सदस्याः आसन्?

उ. नव सदस्याः आसन्।

प्र. नवसु सदस्येषु प्रसिद्धः कः?

उ. नवसु सदस्येषु प्रसिद्धः बीरबलः।

प्र. बीरबलः किमर्थं प्रसिद्धः?

उ. चातुर्यकारणेन प्रसिद्धः।

प्र. चतुरः सदस्यः इति विषये ज्ञापयन्तु? (समस्यात्मकप्रश्नः)

**उद्देश्यकथनम्–**

अद्य वयं 'चतुरः परामर्शकः' इत्यस्मिन् नाटके परामर्शकस्य चातुर्यविषये पठिष्यामः।

**प्रस्तुतीकरणम् –**

पाठस्य प्रारम्भतः अन्तपर्यन्तम्।

पठन–श्रवणयोः समुचित–विकासकरणम्। छात्राणां विषयग्रहणे योग्यतोत्पादनम् छात्रेभ्यः कठिनपदानां परिचयप्रदानम् अर्थबोधनं च।

**आदर्शवाचनम्-**

छात्राध्यापकः नाट्यांशस्य उचितस्वरेण आरोहावरोह–सहितं विराम–चिह्नानुसारेण च वाचनं करिष्यति।

**अनुवाचनम्-**

छात्राध्यापकः योग्यछात्रान्। अनुवाचनाय निर्दिशति। छात्राः अनुवाचनं कुर्वन्ति।

**बोधप्रश्नाः-**

**गद्यवत् काठिन्यनिवारणम् –**

गद्यवत् तात्पर्यबोधनम् विषयवस्तु।

**सम्बद्धाः प्रश्नाः**

प्र. अकबरस्य कस्मिन् नितरां प्रीतिः?

**विस्तृतव्याख्या-**

शब्दाः अर्थः युक्तयः।

**भावविश्लेषणात्मक-प्रश्नाः**

अस्ति अकबर ..........

श्रवणकौशलस्य विकासः अभिनयस्य विकासः पठनकौशलस्य विकासः छात्राणाम् अर्जितज्ञानस्य दृढीकरणं, लेखनकौशलस्य विकासः न्यूनातिन्यूनं 10-15 प्रश्नाः।

**वाचिकाभिनयः**

छात्राध्यापकः नाट्यांशस्य वाचिकाभिनयं करिष्यति।

**भूमिकावितरणम्**

छात्राध्यापकः नाट्यांशस्य भूमिकावितरणं द्वयोः छात्रयोः मध्ये करिष्यति।

**अनुकरणाभिनयः**

छात्राः स्वभूमिकानुसारं नाट्यांशस्य वाचिकाभिनयं करिष्यन्ति।

**मूल्याङ्कनम्**

शिक्षकः प्रश्नान् करोति।

**गृहकार्यम्-**

अस्य नाट्यांशस्य हिन्दीभाषया अनुवादः करणीयः।

## कथापाठयोजना -3

| | |
|---|---|
| दिनाङ्कः ...................... | अवधिः ................... |
| कक्षा ...................... | विषयः .................... |
| कालाशः ...................... | प्रकरणम् .................... |

**सामान्योद्देश्यानि-**

- कथां प्रति छात्राणां रुच्युत्पादनम्।
- संस्कृतकथासाहित्यस्य परिचयप्रदानम्।
- कल्पनाशक्तेः तर्कशक्तेः च विकासकरणम्।
- नूतनशब्दानां ज्ञानप्रदानम्।
- शब्दकोषाणाम् अभिवर्धनम्।

**विशिष्टोद्देश्यानि–**

"मूर्खः सिंहः" इति कथामाध्यमेन 'बुद्धिर्यस्य बलं तस्य' इति उक्तेः ज्ञानं कारणीयम्।

**सहायकोपकरणानि-**

- श्यामपट्टः।
- मार्जनी।
- संकेतिका।
- कथाचार्टपत्रम्।
- सुधाखण्डाः च।

**पूर्वज्ञानपरीक्षणम्-**

छात्रैः मूर्खसिंहस्य कथा पूर्वं पठिता, अन्यविषय-शिक्षणे।

**कथावस्तु**

एका लघुः कथा।

पूर्वज्ञानस्य परीक्षणम्।

**प्रस्तावना-**

छात्राध्यापकः चित्रदर्शनेन कथायाः उपस्थापनं करोति।

**प्रथमान्वितिः**

**उद्देश्यकथनम्-**

कथायाः विशिष्टोद्देश्यप्रकटनम्।

**कथोपस्थापनम्**

छात्राध्यापकः चित्रं प्रदर्श्य कथाकथनपद्धत्या प्रश्नोत्तरपद्धत्या च कथां श्रावयति।

**विषयप्रवेशः काठिन्यनिवारणम्**

गद्यगत् कथिनशब्दानां बोधनं कर्तव्यम्।

**बोधप्रश्नाः**

भाषणकौशलस्य सम्पादनम्, अर्थावबोधनञ्च कथां प्रति।

**द्वितीयान्वितिः**

छात्रेषु भाषणकौशलस्य सम्पादनम्।

**प्रस्तुतीकरणम्**

अनुरागोत्पादनं समुचित-श्रवणकौशलस्य सम्पादनञ्च-उच्चारण-कौशलस्य विकासः समीक्षाज्ञानस्य विकासः ज्ञातांशस्य परीक्षा च।

**कथापठनम् -**

छात्राध्यापकः सम्पूर्णकथां भावानुगुणैः पठति।

**उत्प्रेरणात्मकप्रश्नः -**

कथानिष्कासनं चित्रमाध्यमेन, छात्रेभ्यः कथानिष्कासनञ्च।

**नवशब्दानां व्याख्या**

भाषाकौशलस्य अभिवर्धनम् मूल्याङ्कनम् लेखनकौशलस्य विकासः स्मरणशक्तेः अभिवर्धनम्।

**गृहकार्यम्**

छात्राध्यापकः अभ्यासाय मूल्याङ्कनाय गृहकार्यं प्रददाति।

## रचनापाठयोजना–4

| | |
|---|---|
| दिनाङ्कः ...................... | अवधिः ................... |
| कक्षा...................... | विषयः .................... |
| कालाशः:...................... | प्रकरणम् .................... |

**पाठ्यवस्तु**

आर्याणां, मुख्यं पर्व, दीपमालिका, कार्तिकमास,अमावस्या वैश्याणां सुशोभितः अलङ्कृतः, पङ्क्तीनाम्, जनश्रुतिः, विजयं प्राप्य, अयोध्या, महोत्सवः, लक्ष्मीपूजा, परमात्मा, सर्वतः, दृश्यन्ते, सुधालेपनम्।

**सामान्योद्देश्यानि**

- छात्राणां संस्कृतशब्दभण्डारस्य अभिवृद्धिः।
- संस्कृतभाषां प्रति छात्राणाम् अभिरुच्युत्पादनम्।
- शब्दध्वनिना शुद्धोचरणाय योग्यतोत्पादनम्।
- लघुवाक्यभावनाभिव्यक्तेः क्षमतोत्पादनम्।
- छात्राणाम् अन्तःशक्तेः बहिरानयनम्।

**विशिष्टोद्देश्यानि**

**ज्ञानात्मकम्–**

- बालकानां रचनाशक्तिजगरणम्

**अवबोधात्मकम्–**

- विषयस्य सम्यक् बोधनाय।

**भावात्मकम्–**

- बालकेषु रचनां प्रति उत्साहस्य, प्रोत्साहनस्य च वर्धनम्।

**कौशलात्मकम्–**

- बालकेषु चतुर्णा कौशलानाम् अभिवृद्धिविकासाय।

**सहायकोपकरणानि–**

- सामान्यानि विशिष्टानि।
- मार्जनी, सुधाखण्डः चित्रम्।
- सङ्केतिका, आकुञ्चनपुस्तकम्।

**प्रस्तावना ( पूर्वज्ञानस्य )**

प्र. भारते के के पर्वाणि भवन्ति।

उ. भारते होली, दशहरा रक्षाबन्धन, दिपावली।

प्र. ऐतेषु पर्वसु लक्ष्मीपूजा कस्मिन् पर्वणि भवति।

उ. दिपावलीदिवसे लक्ष्मी (परिक्षणम्) पूजा भवति।

प्र. दिपावलीमहत्ताविषये वदन्तु।

उ. केचन वदन्ति।

**उद्देश्यकथनम्**

अस्तु तर्हि अद्य वयं दीपावलीविषये रचनां रचयाम।

छात्राः ध्यानेन श्रुत्वा पश्यन्ति।

**प्रस्तुतीकरणम्**

छात्राध्यापकः श्यामफलके शब्दान्लिखित्वा तेषां रिक्तस्थानपूरणाय निर्दिशति।

छात्राः शब्दान् चित्वा रिक्तस्थानं पूरयन्तु।

**विषयोपस्थापनम्**

छात्रा-छात्राः शब्दं चित्वा रिक्तस्थानं पूरयन्तु।

दिपावली- ----- अत्यन्त-प्रसिद्धं ----- वर्त्तते। येन-------- कथ्यते। कर्तिक-मासस्य--दिवसे समारोहः अयोज्यते। एतत् --- मुख्यपर्व भवति अस्मिन् पर्वाणि सम्पूर्णगृहे ----भवति तथा ---- ऽपि भवति सर्वत्र दीपानां समूहः दृश्यते जनश्रुत्यानुसारेण रामः रावणे --- अत्यन्तं विजयं प्राप्य ---- आगतवान् अतः अस्मिन् दिवसे ---- स्य आयोजनम् अभवत्। एतत् अपि जनाः कथयन्ति। वैश्यानाम् अस्मिन् दिने----- कुवन्ति। येन सर्वदा परमात्मानं प्रार्थयन्ते।

**कक्षाकार्यम् –**

छात्राध्यापकः पठितांशस्य परीक्षणार्थं कक्षाकार्यं दास्यति। कक्षाकार्याय पूर्वमेव श्यामफलके/आकुञ्चनफलके विलिख्य आनयति। तत् वर्णमेलनस्य, रिक्तस्थानपूरणस्य बोधविश्लेषणस्य च प्रश्नाः भवितुमर्हन्ति।

1. रिक्तस्थानानि पूरयत।
2. वर्णान् मेलयत।

**गृहकार्यम्–**

छात्राध्यापकः श्यामफलके गृहकार्यार्थं प्रश्नान् लेखिष्यति।

# सन्दर्भग्रन्थाः


1. शर्मा, लक्ष्मीनारायण, सिंह, फतेहः, संस्कृतशिक्षणं नवीनप्रविधयश्च, आदित्यप्रकाशन, जयपुर।
2. मित्तल, सन्तोष, संस्कृतशिक्षणम्, नवचेतना पब्लिकेशन्स, जयपुर।
3. मिश्र, आजादः, (प्रधानसम्पादक), संस्कृतभाषाशिक्षणम्, मध्यप्रदेश-संस्कृतबोर्ड, मध्यप्रदेश।
4. साम्बशिवमूर्ति, केः, संस्कृतशिक्षणम्, दीपशिखा प्रकाशन, जयपुर।
5. झा, उदयशङ्कर, संस्कृतशिक्षणम् (शास्त्रशिक्षणसहितम्), चौखम्बा सुरभारती प्रकाशन, वाराणसी।
6. मिश्र, लोकमान्य, साहित्यशिक्षणविधिः, मृगाक्षीप्रकाशन, 5/113, विरामखण्ड, गोमतीनगर, लखनऊ।
7. लता, एन., साहित्यशिक्षणम्, राष्ट्रियसंस्कृतसंस्थानम्, तिरुपति।
8. रमेशः, वाई. एस., साहित्यशिक्षणविधिः, हंसाप्रकाशन, जयपुर।
9. चौधरी, प्रभादेवी, साहित्यशिक्षणम्, भोपालपरिसर, भोपाल।
10. पाण्डेय, लक्ष्मीनिवासः, संस्कृतकाव्यशिक्षणम्, श्रीलक्ष्मीसरस्वती-प्रकाशन, वाराणसी।
11. रा., देवनाथः उपाध्याय, बीः, व्याकरणशिक्षणविधयः, भारतीयविद्या संस्थान, वाराणसी।
12. शुक्लः, रजनीकान्तः, व्याकरणशिक्षणम्, राष्ट्रियसंस्कृतविद्यापीठ, तिरुपति।
13. गायत्री, मुरलीकृष्णः, अध्यापनकौशलोद्दीपिका, जगदीश संस्कृत पुस्तकालय, जयपुर।

14. विश्वासः, कौशलबोधिनी, संस्कृत भारती, दिल्ली।
15. सफाया, रघुनाथः, संस्कृत शिक्षण, हरियाणा ग्रन्थ अकादमी।
16. शास्त्री, वासुदेवः क्रियात्मक संस्कृत शिक्षण, राष्ट्रिय संस्कृत संस्थान, नवदेहली।
17. पाण्डेय, इन्दिराचरण, संस्कृत शिक्षण समीक्षण, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालय, वाराणसी।
18. चौबे, विजयनारायण, संस्कृत शिक्षणविधि, उत्तरप्रदेश हिन्दी संस्थान, लखनऊ।
19. सिंह, कर्णः, संस्कृत शिक्षण विधि, एच्. पी. भार्गव बुक हाउस, आगरा।
20. पाण्डेय, अरविन्द कुमार, संस्कृत शिक्षा का विकास, आदित्य बुक सेंटर, दिल्ली।

✦✦✦

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016